ISSN– 2320–5911

# प्रज्ञालोकः

(रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयस्य संस्कृताध्ययनविभागस्य शोधपत्रिका)

## तृतीयः अङ्कः

### प्रथमो भागः

उपदेष्टा

स्वामी आत्मप्रियानन्दः

सम्पादकमण्डली

राकेशदाशः

गोपीकृष्णन् रघुः

वेङ्कटरमणभट्टः

नागराजभट्टः

संस्कृतविभागः

रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयः

वेलुडमठम्

प्रज्ञालोकः
(संस्कृताध्ययनविभागस्य शोधपत्रिका)
*Prajñāloka*
(Research Journal of Department of Sanskrit Studies)

ISSN– 2320–5911

सम्पादकमण्डली–
राकेशदाशः
गोपीकृष्णन् रघुः
वेङ्कटरमणभट्टः
नागराजभट्टः
Board of Editors–
Rakesh Das
Gopikrishnan Reghu
Venkataramana Bhat

Nagaraja Bhat
प्रकाशकः– कुलसचिवः
रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयस्य
वेलुडमठस्थस्य, हावडामण्डले, पश्चिमवङ्गेषु
Publisher– Registrar
Ramakrishna Mission Vivekananda University
Belur Math, Howrah, West Bengal

©प्रकाशकस्य
©Publisher

प्रकाशनवर्षम्– २०१५
Year of Publishing– 2015

मूल्यम्– ₹ ५०/-
Price– ₹ 50/-

Powered by $\LaTeX\,2_\varepsilon$

# सूचीपत्रम्


| क्रमः | निबन्धः निबन्धकारश्च | पुटम् |
|---|---|---|
| १. | निवेदनम् | 01 |
| २. | Foreword<br>Swami Atmapriyananda | 03 |
| ३. | महाभाष्ये चतुर्धा धातुप्रकृतयः<br>टि. यशस्वी | 5 |
| ४. | समासे निपातनम्<br>श्रीमन्तचट्टोपाध्यायः | 14 |
| ५. | राजयोगविमर्शः<br>केशवमिश्रः | 28 |
| ६. | महामायास्वरूपम्<br>दिलीपपण्डा | 39 |
| ७. | सुखप्रकाशविरचितभावद्योतनिकाव्याख्यायाः परिचयः तन्मातृकासमीक्षणञ्च<br>नागराजभट्टः | 48 |
| ८. | ध्यानयोगगूढार्थदीपिकायाम् उपात्तानां योगसूत्राणाम् अद्वैतदृष्ट्या परिशीलनम्<br>भजहरिदासः | 57 |
| ९. | कुन्तकस्यावदानम् : एकं समीक्षणम्<br>सीतानाथ आचार्यः | 71 |
| १०. | राधावल्लभकृतनाट्यद्वयस्य समीक्षा<br>सौम्यजित् सेनः | 83 |
| ११. | वङ्गीयप्रतापनाटके हिन्दूनां सामाजिकदुरवस्थाया वर्णनम् | 90 |

सुमन्तप्रामाणिकः

१२. सम्प्रेषणोपागमः 94
एस.टि.पि. कनकवल्ली

१३. महाभारतकालिकशिक्षणव्यवस्थाया वर्तमानसन्दर्भे उपादेयता 100
मुकेशकुमारः

१४. Some special features of *Vedic* interpretation by Swami Dayananda Saraswati 104
Manabendu Sarkar

१५. Phonetic Changes in Some English Words Those Follow Two *Sūtras* of *Pāṇini's Aṣṭādhyāyī* 111
Priyanka Mandal

१६. *Molla Rāmāyaṇa*: A 16th Century Telugu *Rāmāyaṇa* 116
Gauri Mahulikar

१७. An analysis of intricacies of narration in the *Mahābhārata* 130
R. Deepta

१८. Influence of *Bhakti Bhāva* on *Sufism* and Hinduism through Kabir Das and Sri Ramakrishna: A Comparative Study 137
Parthasarathi Bhattacharya

१९. A Comaparative Study of *Śri Viṣṇu Pañcāyudhas* as found in *Māgha and Vedānta Deśika* 149
Ryali Anupama

# निवेदनम्

विगतवर्षत्रयाद् विश्वविद्यालयस्य संस्कृताध्ययनविभागेन प्राकाश्यमानीयते पत्रिकेयम्। अन्वर्थनाम्नीयं विबुधानां मनस्तोषाय अध्येतृणां च ज्ञानविवर्धनाय भवेदिति सम्पादकानाम् ऐकान्तिको दोहदः। तदर्थं च यतामहे वयम् आ वर्षात्। अस्माकम् इदं सुमहत् प्रमोदस्थानं तथा भागधेयं यद् ऐषमः बहवो विद्वांसः अहमहमिकया अस्माकम् अस्मिन् विनम्रप्रयत्ने स्वीयेन योगदानेन अस्मान् सहकृतवन्तः। संस्कृताङ्ग्लभाषयोः त्रिंशदधिकाः वैदुष्यपूर्णाः प्रबन्धाः पत्रिकायां प्रकाशनाय प्रेषिता विद्वद्भिः देशस्य विविधकोणात्। देहली-हरियाणा-गुजरात-महाराष्ट्र-आन्ध्रप्रदेश-उत्कलादिविविधप्रान्तानां विदुषः वेद-वेदाङ्ग-पुराणेतिहास-प्राचीनार्वाचीनसाहित्य-वेदान्तशैवादिविविधदर्शन-शिक्षाशास्त्र-समाजदर्शनादिविषयांश्च क्रोडीकुर्वन्नयम् अङ्कः विषयवैचित्र्येण देशवैविध्येन च वस्तुत एव आसमुद्रहिमाचलं भारतस्य प्रातिनिध्यं वहत्यद्यत्वे इति अमन्दानन्ददायकोऽयं प्रसङ्गः।

अस्मिन् वर्षे पत्रिकायां प्रकाशनार्थम् आगतानां प्रबन्धानां सङ्ख्या महती आसीद् इति पत्रिकां भागद्वयेन प्रकाशयामो वयम्। सद्यः द्वित्रमासेषु पत्रिकाया द्वितीयः भागः अपि प्रकाशयिष्यते।

वर्षत्रयस्य सफलसम्पादनात् परम् अग्रिमवर्षे पत्रिकाम् इमां विशेषज्ञपरीक्षितां (Peer Reviewed) विधातुम् इष्यते सम्पादकैः। तदर्थम् अपेक्षिताः सूचनाः अग्रे वैद्युतिनवार्तामाध्यमेन अन्तर्जाले च लेखकानां पाठकानां च सकाशं प्रापयिष्यामः वयम्। तदनुसारेण भवतां प्रयत्नाः भवन्त्विति निवेदयामः।

पत्रिकायाः प्रकाशनार्थं नियतम् अस्मान् प्रोत्साहितवद्भ्यः सम्माननीयकुलपतिभ्यः, पत्रिकायाः प्रकाशकेभ्यः विश्वविद्यालयस्य माननीयकुलसचिवेभ्यः, पत्रिकायाः टङ्कनकार्ये अक्षरपरिष्कारादिकार्ये च साह्यम् आचरितवद्भ्यः अस्माकं विभागस्य शोधच्छात्रेभ्यः, संस्कृताध्ययनविभागस्य समायोजकेभ्यः स्वामिजपसिद्धानन्देभ्यः, मुद्रकेभ्यः, सर्वेभ्यः प्राबन्धिकेभ्यः च वयं सविनयं धन्यवादं वितरामः अस्मिन् प्रसङ्गे।

भगवतः अनुकम्पया पत्रिकायाः प्रकाशनस्रोतः अविच्छिन्नं भवत्विति सम्प्रार्थ्य विरमामः।

सम्पादकाः

RAMAKRISHNA MISSION VIVEKANANDA UNIVERSITY
(Declared by Government of India under Section 3 of UGC Act, 1956)
PO Belur Math, Dist Howrah 711202, West Bengal, India

# Foreword

यश्छन्दसामृषभो विश्वरूपश्छन्दोभ्योऽध्यमृताथ्सम्बभूव। स मेन्द्रो मेधया स्पृणोतु। अमृतस्य देव धारणो भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरिविश्रुवम्। ब्रह्मणः कोशोऽसि मेधया पिहितः। श्रुतं मे गोपाय॥ ॐ शान्तिः शान्तिः शान्तिः॥

May that Supreme Lord in the form of *Om* that is the prime component of all *Vedas*, pervading and encompassing all sounds, manifested as the immortal essence of the *Veda*, energize and assure me by granting intuitive intelligence *(Prajñā)*. O Lord, may I become a receptacle for immortality in the form of *Brahman-Knowledge*. May my body be fit and strong [for this purpose], may my tongue speak sweet words, may my ears listen to profuse divine talks. You are the container of *Brahman* (or you are the symbol of *Brahman* as Its covering), [but] you are covered by *medhā* (intellectual prowess). Graciously protect my Knowledge gained through study and listening [to the preceptor and men of *Brahaman-realization*]. Om Peace, Peace, Peace.

The following humble offering to the Divine Language *(Suravāṇī)* is being made on the occasion of the publication of the third issue of *Prajñāloka*, a research journal of the Department of Sanskrit Studies, School of Indian Heritage, Ramakrishna Mission Vivekananda University.

It has been well said by the poet *Bhartṛhari* that the *sanskritavāṇī* (refined and polished speech or Sanskrit language) alone

adorns a person as an ornament. All other worldly ornaments are subject to change and therefore ephemeral and decay every moment. The *Śruti* proclaims that the Divine Sound born of *Nāda-Brahman* is "the Great Support, the Supreme Support". That immortal *Om* which has been described by the *ṛṣis* in innumerable forms in the Vedas is verily *Brahman*. Thus it has been described in the *Kaṭha Upaniṣad*: "This syllable *Om* is indeed *Brahman*, this syllable *Om* is indeed the Supreme". We recall here the words of the poet [*Bhartṛhari*] that *suravāṇī*, born of the immortal *praṇava (Om)*, is the undecaying ornament of all persons.

The most appropriate method of cultivating our love for India's hoary heritage and spiritual culture is to always worship *surabhāratī* (Sanskrit). This third issue of the research journal *Prajñāloka* published by the Department of Sanskrit Studies under the School of Indian Heritage of our University is such an attempt to worship *surabhāratī* by our faculty of the Department of Sanskrit Studies. We offer our congratulations to them all for successfully sustaining this effort of publishing this journal year after year. We therefore pray with humility: May *Surabhāratī Medhādevī Vāgdevī Sarasvatī* make our hearts Her eternal abode.



Belur Math
15 June 2015
(Sacred day of *Phalahāriṇī Kālīpujā*)

Swami Atmapriyananda
Vice Chancellor

# महाभाष्ये चतुर्धा धातुप्रकृतयः

यशस्वी. टि.*

## ०. भूमिका

साधुशब्दान्वाख्यानाय शब्दतत्त्वप्रबोधनाय च महर्षिभिः प्रवर्तिते संस्कृतव्याकरणशास्त्रे पाणिनीयं व्याकरणम् अनितरसाधारणं गरिमाणं बिभर्ति। भगवता पाणिनिना विरचिताया अष्टाध्याय्याः सूत्राणि, अधिसूत्रं भगवता कात्यायनेन प्रणीतानि वार्त्तिकानि चाश्रित्य प्रवृत्तं भगवत्पतञ्जलिविरचितं भाष्यं स्वीयमहत्त्वातिशयेन महाभाष्यपदमलञ्चकार। अशेषशेमुषीसम्पन्नेन महाभाष्यकारेण सूत्राणां वार्तिकानाञ्च व्याख्यानमिषेण शब्दस्य स्वरूपं, प्रकृतिप्रत्ययविभागप्रकाराः, अन्वयव्यतिरेकाभ्यां प्रकृतिप्रत्ययार्थकल्पनं, देशकालभेदात् शब्दार्थपरिवर्तनस्वभावः, शाब्दिकदार्शनिकविचाराश्च पूर्वोत्तरपक्षपर्यालोचनपुरस्सरं मञ्जु सिद्धान्तिताः। तदुक्तं पदवाक्यप्रमाणज्ञेन भर्तृहरिणा–

कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने॥[२] इति।

लोके साम्प्रतं भाषाविज्ञानरूपेण प्रथितस्य शास्त्रस्य आधारभूमिरिव दरीदृश्यते महाभाष्यम्।

## १. मुख्यं तु वाक्यमेवाहुर्भाषायां तत्त्ववेदिनः (वाक्यस्य मुख्यत्वम्)

भाषाया द्राघिष्ठोऽवयवः वाक्यं, लघिष्ठावयवश्च वर्ण इति निश्चप्रचम्। अर्थप्रकाशकेषु वर्णपदादिस्फोटेषु सत्सु वाक्यस्फोटस्यैवार्थाभिधायकत्वात् तस्यैव प्राधान्यमिति शब्दतत्त्वविदां राद्धान्तेन भाषायां वाक्यस्य वैशिष्ट्यं सुतरां प्रसिध्यति। तदुक्तं वाक्यपदीये–

पदे न वर्णा विद्यन्ते वर्णेष्ववयवाश्च न।
वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन॥[३] इति।

---

*अध्यापकः, व्याकरणविभागे, राष्ट्रियसंस्कृतविद्यापीठस्य, तिरुपतिस्थस्य।

[२]वाक्यपदीये वाक्यकाण्डे ४७७

[३]वाक्यपदीये ब्रह्मकाण्डे ७२

अयम्भावः– वाक्यघटकेषु वर्णेषु वर्णावयविषु पदेषु वा निराकाङ्क्षमर्थबोधकत्वं न, अपि तु वाक्य एव तादृशार्थबोधकत्वं वरीवर्त्ति। वर्णस्फोटं पदस्फोटं वाऽऽदाय शास्त्रेण प्रक्रियासिद्ध्यर्थं वर्णस्य पदस्य वाऽर्थवत्त्वं परिकल्प्यते। वस्तुतस्तु शब्दतत्त्वविद्भिर्वाक्यस्फोटस्यैव सिद्धान्तितत्वात् वाक्यस्यैव निराकाङ्क्षमर्थबोधकत्वं तन्मूलकतया मुख्यत्वञ्च फलति।

## १.१. वाक्यस्य परिभाषा

भाषाया मुख्याङ्गभूतं वाक्यं भर्तृहरिरित्थं परिबभाषे–

साकाङ्क्षावयवं भेदे परानाकाङ्क्षशब्दकम्।
कर्मप्रधानं गुणवद् एकार्थं वाक्यमुच्यते॥[४] इति।

अयम्भावः– यत् पदरूपेण विभक्तं सद् आकाङ्क्षावशात् पदान्तराणि काङ्क्षति, अविभक्तरूपेण समुदायोपस्थितौ तु आकाङ्क्षाभावाद् यन्न पदान्तरं काङ्क्षति, यच्च क्रियाप्रधानं, विशेषणपदयुक्तं सद् एकप्रयोजनवद्भवति, तद् वाक्यमित्युच्यते। तद्यथा– यज्ञदत्तो वेदाध्ययनायाचार्यकुलं व्रजतीत्यत्र वाक्यघटकानि पदानि यदि विभज्येरन् तर्हि तान्यन्योऽन्याकाङ्क्षाणि भूत्वा निराकाङ्क्षं (निस्सन्दिग्धम्) शाब्दबोधं न जनयेयुः। प्रागुक्तं यदि कृत्स्नं वाक्यं युगपदुच्चार्यते तर्हि तेन जायमानः शाब्दबोधः निराकाङ्क्षो नाम निस्सन्दिग्धो भवति।

अत्रार्थापत्त्या इदमपि सुवाच्यं यत् कस्मिंश्चित् पदसमूहे उच्चारिते सति यद्यर्थविषयिणी आकाङ्क्षा न शाम्येत् , तर्हि स पदसमूहो न वाक्यम्।

अत एवार्थवत्सूत्रभाष्ये "दश दाडिमानि, षडपूपाः, कुण्डमजाजिनम् " इत्येवमादेः पदसमुदायस्य निराकाङ्क्षबोधजनकत्वाभावमादाय तस्यार्थवत्त्वं भाष्यकारैर्निराकारि। तत्रैव च प्रागुक्तोदाहरणयुतभाष्यप्रतियोगितया "इहेदानीं देवदत्त गामभ्याज शुक्लाम् " इत्यादि भाष्यं प्रस्तुत्य एतत्पदसमूहस्य निराकाङ्क्षबोधजनकत्वमादायार्थवत्त्वं समर्थितम्।

एतेन साकाङ्क्षबोधजनकस्य पदसमूहस्य वाक्यत्वाभावः, निराकाङ्क्षबोधजनकस्य पदसमूहस्य च वाक्यत्वं फलति।

---

[४]वाक्यपदीये वाक्यकाण्डे ४

## १.२. तिङन्तं वाक्यसाधकम् (वाक्ये तिङन्तस्य महत्त्वम्)

यः पदसमूहो निराकाङ्क्षं (निस्सन्दिग्धम्) शाब्दबोधं जनयति, स वाक्यमित्युक्तं पुरस्तात्। निराकाङ्क्षबोधजनकत्वरूपं वैशिष्ट्यञ्च तस्मिन् वाक्ये तिङन्तमेव पदं सम्पादयतीति तिङन्तपदस्य वाक्यसाधकत्वं सुतरामालोक्यते। वाक्यस्य निराकाङ्क्षबोधजनकत्वरूपं वाक्यत्वं तिङन्तपदम् एवावलम्बत इति पर्यालोच्य महाभाष्यकारेण "एकतिङ् वाक्यम्"[५] इति वाक्यलक्षणमभाषि। एतेन वाक्ये तिङन्तस्य महत्त्वं स्फुटीभवति।

न यावद् वाक्ये तिङन्तस्य प्रयोगः, न तावद् वक्तुरभीष्टार्थः प्रकाशते ; नापि श्रोतुराकाङ्क्षा शाम्यति। यत्र क्वचित् तिङन्तं न प्रयुज्यते, तत्र यथाप्रकरणं वक्तृश्रोतृभ्यां बौद्धं तिङन्तं नूनमध्याहार्यम्। अपि च यत्र क्रियाविशेषाभाववशात् तिङन्तं नोच्चार्यते, तत्राप्यस्तीति पदमप्रयुज्यमानमप्युपतिष्ठते; सत्तारूपभावस्य सर्वपदार्थसंबन्धितया अस्तीति तिङन्तपदेन तदभिधीयमानत्वात्। तदुक्तम् "अनभिहिते" (अष्टा० २.३.१.) इति सूत्रभाष्ये "अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्ति" इति। एतेन शाब्दबोधे तिङन्तस्य महत्त्वं सिध्यतितमाम्।

## २. तिङन्तप्रकृतिर्धातुः (धातोः प्राधान्यम्)

अष्टाध्याय्यास्तृतीयाध्यायमाश्रित्य प्रवृत्ते महाभाष्ये तिङन्तप्रकृतिभूतस्य धातोर्वैलक्षण्यं भृशं प्रत्यपादि। तत्र हि तिङन्तप्रकृतेर्धातोः भेदाः, तद्विहितप्रत्ययानां द्वेधा विभागः, पुनस्तेषामुपभेदाः, विकरणाः, काललक्षणं, कालभेदाः, पुनस्तेषामुपभेदा इत्येवमादयो नाना तिङन्तविषयाः पूर्वोत्तरसिद्धान्तपक्षसहिताः सर्वाङ्गतया व्यचार्यन्त।

यथा प्रकृतिम् (उपादानकरणम्) विना न किञ्चिद्वस्तुजातं निर्मीयते, तद्वदेव मूलशब्दं विना सुप्तिङन्तरूपपदस्य निर्मितेरसम्भवात् स मूलशब्दोऽत्र शास्त्रे प्रकृतिरित्यभिधीयते। सामान्यतः यस्या आनुपूर्व्याः प्रत्ययो विधीयते, सा आनुपूर्वी प्रकृतिरित्युच्यते।

## २.१. लक्षणं प्रकृतेर्धातोर्महत्त्वञ्च विचार्यते

---

[५]समर्थः पदविधिः इति पाणिनीयसूत्रस्य महाभाष्यम्

**२.१.१. धातोर्लक्षणम्**–"भूवादयो धातवः" (अष्टा० १.३.१) इति सूत्रभाष्ये महाभाष्यकारो धातुलक्षणमित्थमललक्षत्– "क्रियावचनो धातुः। का पुनः क्रिया? ईहा। का पुनरीहा? चेष्टा। का पुनश्चेष्टा? व्यापारः। सर्वथा भवाञ्छब्दैरेव शब्दान् व्याचष्टे। न किञ्चिदर्थजातं निदर्शयत्येवंजातीयका क्रियेति। क्रिया नामेयमत्यन्ताऽपरिदृष्टा अशक्या पिण्डीभूता निदर्शयितुं, यथा गर्भो निर्लुठितः। साऽसावनुमानगम्या। कोऽसावनुमानः? इह सर्वेषु साधनेषु सन्निहितेषु यदा पचतीत्येतद्भवति, सा नूनं क्रिया। अथवा यया देवदत्त इह भूत्वा पाटलिपुत्रे भवति, सा नूनं क्रिया। कथं पुनर्ज्ञायते क्रियावचनाः पचादय इति? यदेतेषां करोतिना सामानाधिकरण्यम्। किं करोति? पचति। किं करिष्यति? पक्ष्यति। किमकार्षीत्? अपाक्षीदिति।"

अस्यायम्भावः– क्रिया उच्यते अनेनेति क्रियावचनः। तेषामेव क्रियावचनानां "भूवादयो धातवः" इति सूत्रेण धातुसंज्ञा। यथा एध् इति धातुना वृद्धिरूपा क्रिया उच्यते। ईहा, चेष्टा, व्यापार इति तन्नामान्तराणि। क्रिया हि साक्षान्नेन्द्रियग्राह्या। सा तु फलानुकूलयत्नेन फलनिष्पत्त्यनन्तरं वा प्रतिपत्त्राऽनुमीयते। यथा चुल्यधिश्रयणादिनानायत्नान् विक्लित्तिं वा दर्शं दर्शं प्रतिपत्ता पाकक्रियामनुमिनोति। अथवा यस्याः सत्त्वाद् देवदत्तः काशीतः पाटलिपुत्रं प्राप्नोति, सा क्रिया। अत्र पाटलिपुत्रप्राप्तिरूपफलेन क्रियाऽनुमीयते। लोके यथा इयं गौः इति ज्ञाने गोरूपपदार्थ इन्द्रियप्रत्यक्षो भवति, न तथा क्रिया। सा तु अनुमानेनैव बोध्या।

अपि च "इह पचतीत्युक्ते कश्चिच्छब्दः श्रूयते, पच्छब्दश्चकारान्तः, अतिशब्दश्च प्रत्ययः। अर्थोऽपि कश्चिद् गम्यते, विक्लित्तिः, कर्तृत्वमेकत्वञ्च" इति भूवादिसूत्रभाष्यप्रामाण्यात् फलमपि धात्वर्थः। लोके फलपदस्य यदुद्देश्येन प्रवृत्तिः, नात्र तादृशोऽर्थो गृह्यते। अत्र तु फलपदं प्रकृतधात्वर्थव्यापारजन्यार्थकम्। यथा पचतीत्यत्र प्रकृतधातुः पच्-धातुः, तदर्थो यो व्यापारः विक्लित्त्यनुकूलव्यापारः, तज्जन्यं यत्फलं विक्लित्तिः, तदर्थकं फलपदं, न तु लोकप्रसिद्धं भोजनार्थकम्।

**२.१.२.धातोर्महत्त्वम्**– व्याकरणप्रवक्तृष्वन्यतमः शाकटायनो नैरुक्ताश्च। ते तावत् सर्वेषां नामपदानां धातुमूलकत्वमभ्युपयन्ति। तदुक्तम् "उणादयो बहुलम्" (अष्टा० ३.३.१) इति सूत्रभाष्ये– "नाम च धातुजमाह निरुक्ते। नाम खल्वपि धातुजम्। एवमाहुर्नैरुक्ताः। व्याकरणे शकटस्य च तोकम्।

वैयाकरणानाञ्च शाकटायन आह धातुजं नामेति।" निरुक्तकारेण यास्कर्षिणाप्युक्तं– "तत्र नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च"[६] इति।

एतेन सर्वशब्दप्रकृतिभूतस्य धातोर्महत्त्वं स्फुटीभवति। धातोरीदृशं महत्त्वं विज्ञायैव बहुप्राचीनाः शब्दतत्त्वविदः "दधाति विविधं शब्दरूपं यः स धातुः" इति धातुपदं निरूचुः। अर्थादेक एव मूलशब्दो (प्रकृतिः) यदा तिङ्भिर्युज्यते, तदा क्रियारूपमर्थं ; यदा कृद्भिः सुप्प्रत्ययैर्वा युज्यते, तदा द्रव्यरूपमर्थं, गुणरूपमर्थं वा बोधयति। धातुप्रकृतिरेकैव नानारूपं सुबन्तत्वं तिङन्तत्वञ्च भजत इति तदर्थः।

## ३. तिङन्तप्रकृतिर्धातुश्चतुर्धा सम्प्रकीर्तितः (तिङन्तप्रकृतेर्धातोश्चातुर्विध्यम्)

येभ्यः प्रकृतिभूतधातुभ्यः तिङ्प्रत्यया विधीयन्ते, तेषां प्रकृतभूतधातूनां चातुर्विध्यं महाभाष्यस्य तृतीयाध्याये महाभाष्यकारः विशकलय्य प्रास्तौषीत्। ते च चतुर्विधास्तिङन्तप्रकृतिभूतधातव इत्थं भवन्ति– १. मूलधातवः (धातुपाठीयधातवः), २. सनाद्यन्तधातवः, ३. नामधातवः, ४. धातूपात्तधातव इति।

तत्रादावाकररीत्या मूलधातवो विचार्यन्ते।

## ३.१. मूलधातवः (धातुपाठीयधातवः)

"भूवादयो धातवः" इति सूत्रेण येषां धातुपाठीयानां क्रियावाचिनां भ्वेधस्पर्धादीनां धातुसंज्ञा विहिता, त एव मूलधातुत्वेनाभिधीयन्ते। एते धातवः सकर्मकाकर्मकद्विकर्मकभेदेन पुनस्त्रिविधाः।

सकर्मकाकर्मकव्यवस्था महाभाष्यकारैरित्थमकारि– "कर्मस्थभावकानां कर्मस्थक्रियाणाञ्च कर्ता कर्मवद्भवतीति वक्तव्यम्। कर्तृस्थभावकानां कर्तृस्थक्रियाणाञ्च कर्ता कर्मवन्मा भूदिति। कर्मस्थभावकानाम् आसयति देवदत्तं, शाययति देवदत्तं, स्थापयति देवदत्तम्। कर्मस्थक्रियाणां गामवरुणद्धि, करोति कटम्। कर्तृस्थभावकानां चिन्तयति, मन्त्रयते। कर्तृस्थक्रियाणां गच्छति, धावति, हसति"[७] इति। एतद्भाष्यविवरणं सविभागं सोदाहरणञ्चोपरिष्टाद्वर्ण्यते।

---

[६] निरुक्तम् , अध्यायः - १, पादः - ४

[७] कर्मवत्कर्मणा तुल्यक्रियः (३.१.८७) सूत्रस्य भाष्यम्।

**३.१.१ सकर्मकधातवः**– येषां धातूनां भावजन्यफलं क्रियाजन्यफलं वा कर्त्रपेक्षया इतरत्रान्वेति, ते धातवः सकर्मकाः। अत्र भावो नाम अपरिस्पन्दनसाधनसाध्यो धात्वर्थः। सकर्मकभावस्योदाहरणं यथा– शाययति देवदत्तम्। अत्र शयनरूपो यो भावः (परिस्पन्दरहितव्यापारः), तस्य यत् फलं,तत् कर्मणि देवदत्ते एवान्वेति, न तु तत्प्रयोजके यज्ञदत्तादौ। एवञ्च कर्त्रपेक्षया भावरूपव्यापारजन्यफलस्यान्यत्रान्वयात् सकर्मकभावस्योदाहरणमिदम्।

कर्मस्थक्रियाया उदाहरणं यथा– पचत्योदनम्। अत्र दर्वीघट्टनादिप्रयत्नयुक्ता पाकरूपा या क्रिया, तज्जन्यं यत् फलं विक्लित्तिः, तत् कर्त्रपेक्षया इतरत्र तण्डुले अन्वेति। तथा च कर्त्रपेक्षया क्रियाजन्यफलस्यान्यत्रान्वयात् कर्मस्थक्रियाया उदाहरणमिदम्।

**३.१.२. अकर्मकधातवः**–येषां धातूनां भावजन्यफलं क्रियाजन्यफलञ्च कर्तर्येवान्वेति, ते अकर्मकाः। कर्तृस्थभावकस्योदाहरणं यथा– देवदत्तश्चिन्तयति। अत्र चिन्तनरूपो यो भावः (परिस्पन्दरहितव्यापारः), तस्य यत् फलं, तच्चिन्तनकर्तरि देवदत्ते एवान्वेति। अतोऽयं धातुरकर्मकः।

कर्तृस्थक्रियाया उदाहरणं यथा– मैत्रो धावति। अत्र धावनात्मिका या क्रिया, तस्या यत् फलम् उत्तरदेशस्य शीघ्रप्राप्तिः, तत् कर्तरि मैत्रे एवान्वेति। अतोऽयमकर्मकः।

सर्वोऽप्ययं भाष्यविचारो हरिणा इत्थं समगृह्यत– "विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता" [८] इति।

**३.१.३. द्विकर्मकधातवः**– येषां धातूनां फलरूपोऽर्थः कर्मद्वये– प्रधाने अप्रधाने च– कर्मण्यन्वेति, ते द्विकर्मकधातवः। ते च द्विकर्मकधातवः भाष्यकारेणेत्थं परिगणिताः–

दुहियाचिरुधिप्रच्छिभिक्षिचिञाम्-
उपयोगनिमित्तमपूर्वविधौ।
ब्रुविशासिगुणेन च यत्सचते
तदकीर्तितमाचरितं कविना॥
नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च।

---

[८] वाक्यपदीये तृतीयकाण्डे सप्तमाध्याये ६६ कारिका

द्विकर्मकेषु ग्रहणं कर्तव्यमिति निश्चयः ॥ ”[९]

उदाहरणं यथा– गां दोग्धि पयः। पयःकर्मकं गोसम्बन्धिदोहनमित्यर्थः। प्रकृतोदाहरणे कर्तृनिष्ठव्यापारप्रयोज्यफलेन पयसः सम्बन्धुमिष्यमाणत्वात् पयः मुख्यं कर्म। गौस्तु पयसो निमित्तमिति हेतोरत्रोपात्ता। अतस्तदप्रधानं कर्म। अत्राप्रधानस्य गोरपादानत्वाविवक्षायां “अकथितञ्च”(१.४.५१) इति सूत्रेण कर्मसंज्ञा, तन्मूलिका द्वितीयाविभक्तिश्च।

## ३.२. सनाद्यन्तधातवः

सनादिप्रत्ययान्तानां “सनाद्यन्ता धातवः”(३.१.३२) इति सूत्रेण धातुसंज्ञा विधीयते। सनादयश्च द्वादश। तथा हि–

सन्क्यच्काम्यच्क्यङ्क्यषोऽथाचारक्विम्णिज्यङौ तथा।
यगायईयङ्णिङ् चेति द्वादशामी सनादयः ॥ ” इति ॥[१०]

“भावप्रधानमाख्यातम् ”[११], “क्रियावचनो धातुः”[१२] इति निरुक्तमहाभाष्ययोर्निर्देशाद् येषां धातूनां शुद्धं तत्तत्क्रियारूपार्थमात्रं गृह्यते, त एव धातुपाठ उपदिष्टाः, तेषामेव च “भूवादयो धातवः” इति सूत्रेण धातुसंज्ञा। तद्यथा भू इति धातुना केवलः सत्तारूपोऽर्थः बोध्यते। कृतेषु तु सनादिषु तत्तद्धात्वर्थाः सनादिप्रत्ययार्थैस्सह युज्यन्ते। तदा न तेषां विशुद्धक्रियावाचित्वम् , अपि तु इच्छादिविशिष्टक्रियावाचित्वं भवतीति “भूवादयो धातवः” इति सूत्रेण धातुसंज्ञा न सिध्यति। अत एव सनाद्यन्तानां पार्थक्येन धातुसंज्ञा। यथा भू इति धातोः “धातोः कर्मणः समानकर्तृकादिच्छायां वा”(३.१.७) इति सूत्रेण इच्छार्थके सन्प्रत्यये द्वित्वाभ्यासादिकार्ये बुभूष इति जाते “सनाद्यन्ता धातवः” इति सूत्रेण तस्य धातुसंज्ञा। सम्प्रति धातुरयं न केवलं सत्तारूपमर्थं बोधयति, अपि तु इच्छाविशिष्टं सत्तारूपमर्थं बोधयति। अतोऽस्य क्रियामात्रवाचित्वाभावात् न धातुपाठे उपदेशः।

अत्रेदं ध्यातव्यं यद् न सर्वे सनादयो मूलधातुभ्यः (धातुपाठीयेभ्यः) प्रवर्तन्ते। तत्र केचिद् मूलधातुभ्यः, इतरे नामभ्यः (प्रातिपदिकेभ्यः), अपरे मूलधातुभ्यः

---

[९]अकथितञ्च (१.४.५१) सूत्रस्य भाष्यम्

[१०]सिद्धान्तकौमुद्याः बालमनोरमायाम् , “सनाद्यन्ता धातवः” इति सूत्रम्

[११]निरुक्तम् , अ. - १, पा. - १

[१२]धातोः (भूवादयो धातवः इति सूत्रे भाष्ये

नामभ्यश्च प्रवर्तन्ते। तथाहि– सन् , यङ्, णिच् , यक्, आय, ईयङ्, णिङ् इत्येते मूलधातुभ्यः प्रवर्तन्ते। क्यच् , काम्यच् , क्यङ्, क्विप् , क्यष् इत्येते नामभ्यः (सुबन्तेभ्यः) एव प्रवर्तन्ते। णिङ्, णिच् इत्येतौ तु मूलधातुभ्यः नामभ्यश्च प्रवर्तेते।

## ३.३. नामधातवः

प्रागुक्तरीत्या नामभ्य एव ये क्यजादयो विधीयन्ते, तदन्तानां नामधातुरिति व्यवहारः। यद्यपि क्यजादयो नामभ्य एव विधीयन्ते, तथाप्येतदन्तानां धातुसंज्ञा तु "सनाद्यन्ता धातवः" इति सूत्रेणैव प्रवर्तते।

अत्रायं विशेषो यत् क्यजादयो मूलधातुभ्यः (धातुपाठीयेभ्यः) न विधीयन्ते, अपि तु नामभ्य एवेति हेतोः सनाद्यन्तधातुभ्यो नामधातवः पृथक् परिकीर्त्यन्ते।

तथा हि– पुत्रम् आत्मन इच्छति इत्यर्थे पुत्र अम् इति सुबन्तात् "सुप आत्मनः क्यच् "(३.१.८) इति सूत्रेण इच्छार्थके क्यच्प्रत्यये सुब्लुकि "क्यचि च"(७.४.३३) इति सूत्रेण ईत्वे पुत्रीय इत्यस्य "सनाद्यन्ता धातवः" इति सूत्रेण धातुसंज्ञा। ततस्तस्य धातुत्वात् तिबाद्युत्पत्तौ पुत्रीयतीति रूपम्।

नाम्नामपि क्रियावाचित्वाभावात् "भूवादयो धातवः" इति सूत्रेण धातुसंज्ञायामप्राप्तायां "सनाद्यन्ता धातवः" इति पार्थक्येन तेषां धातुसंज्ञा।

## ३.४. धातूपात्तधातवः

येभ्यः धातुप्रकृतिकप्रातिपदिकेभ्यः धातुप्रकृतिकसुबन्तेभ्यो वा क्यजादयो विधीयन्ते, तेषां क्यजाद्यन्तानां "सनाद्यन्ता धातवः" इति सूत्रेण धातुसंज्ञा। अमी क्यजाद्यन्ता एव धातूपात्तधातवः। प्रागुक्तेभ्यः सनाद्यन्तधातुभ्यः नामधातुभ्यश्च एषां धातूनामयं भेदोऽस्ति यत् अत्र मूलधातवः (धातुपाठीयधातवः) आदौ प्रातिपदिकत्वेन परिणम्य क्यजादिभिर्युक्त्वा पुनः धातुत्वमापद्यन्ते। सनाद्यन्तधातूनां प्रकृतिः मूलधातुः (धातुपाठीयधातुः), नामधातूनां च प्रकृतिः विशुद्धं (अव्युत्पन्नम्) प्रातिपदिकं भवति। धातूपात्तधातूनां प्रकृतिस्तु न तथा। सा हि धातुना निष्पन्ना प्रकृतिः (प्रातिपदिकं, सुबन्तं वा) भवति।

**३.४.१. धातुप्रकृतिकप्रातिपदिकस्योदाहरणं–** भवति इति। तथा हि सत्तार्थकात् भूधातोः भवतीत्यार्थे "क्विप् च" (अष्टा० ३.२.७६) इति सूत्रेण कर्त्रर्थके क्विप्प्रत्यये तस्य सर्वापहारिलोपे प्रत्ययलक्षणेन कृदन्तत्वात् "कृत्तद्धितसमासाश्च"

(अष्टा० १.२.४६) इति सूत्रेण प्रातिपदिकसंज्ञायां विशिष्टात् भू इति प्रातिपादिकाद् भूरिव आचरति इत्यस्मिन्नर्थे “सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः” [13] इति वार्तिकेन पुनः क्विप्रत्यये, तस्य सर्वापहारिलोपे प्रत्ययलक्षणेन क्विबन्तत्वात् “सनाद्यन्ता धातवः” इति सूत्रेण धातुसंज्ञायां लटि तिपि शपि गुणे अवादेशे च भवति इति रूपम्।

प्रकृतोदाहरणे भू इति मूलधातुः आदौ कर्त्रर्थक्विबन्तः सन् प्रातिपदिकत्वेन परिणम्य पुनः आचारार्थक्विबन्तः सन् धातुत्वेन परिणत इति हेतोः धातूपात्तधातुरयम्।

३.४.२. धातुप्रकृतिकसुबन्तस्योदाहरणम्– याजकीयति इति। तथा हि यज् इति धातोः “ण्वुल्तृचौ” (अष्टा० ३.१.१३३) इति सूत्रेण कर्त्रर्थके ण्वुल्प्रत्यये “युवोरनाकौ” (अष्टा० ७.१.१) इति अकादेशे “अत उपधायाः” (अष्टा० ७.२.११६) इति उपधावृद्धौ कृदन्तत्वात् प्रातिपदिकसंज्ञायां द्वितीयाविभक्तौ अमि याजकम् इति रूपम्। ततः याजकम् आत्मनः इच्छति इत्यर्थे याजक अम् इति सुबन्तात् “सुप आत्मनः क्यच् ” (अष्टा० ३.१.८) इति सूत्रेण क्यच्-प्रत्यये सुब्लुकि “क्यचि च” (अष्टा० ७.४.३३) इति सूत्रेण ईत्वे याजकीय इत्यस्य “सनाद्यन्ता धातवः” इति सूत्रेण धातुसंज्ञायां लटि तिपि शपि पररूपे च याजकीयति इति रूपम्। प्रकृतोदाहरणे यज् इति धातुः कृत्प्रत्ययेन ण्वुला युक्त्वा प्रातिपदिकत्वं प्राप्य सुबन्तः सन् क्यच्प्रत्ययेन युक्त्वा पुनः धातुत्वं प्राप्नोतीति हेतोः धातूपात्तधातुरयम्।

अनया रीत्या गुर्वनुग्रहाद् यथामति महाभाष्यस्य तृतीयाध्यायदृशा तिङन्तप्रकृतेर्धातोश्चातुर्विध्यं दिङ्मात्रमिह दर्शितम्।

☆ ☆ ☆

## सन्दर्भग्रन्थसूची

१. गिरिधरशर्मा, परमेश्वरानन्दशर्मा (सम्पा.). (२००१). भट्टोजीदीक्षितविरचिता वैयाकरणसिद्धान्तकौमुदी. वाराणसी. मोतीलाल बनारसीदासः।

२. भार्गवशास्त्रिजोशी(सम्पा.). (२०११). पतञ्जलिकृतं महाभाष्यम् (प्रदीपोद्योतसहितम्). दिल्ली. चौखम्बासंस्कृतप्रतिष्ठानम्।

[13]कर्तुः क्यङ् सलोपश्च (अष्टा० ३.१.११) इति सूत्रस्थकौमुदीव्याख्याने वार्तिकम्

# समासे निपातनम्

श्रीमन्तच्याटार्जी*

## ०. भूमिका

अप्राप्तेः प्रापणञ्चापि प्राप्तेर्वारणमेव वा।
अधिकार्थविवक्षा च त्रयमेतन्निपातनात्॥

इत्यत्र समासे निपातनविषये किञ्चिद् विचारयितुकामोऽहम्। तत्रादौ अस्माभिः ज्ञातव्यं कस्तावन्निपातनपदार्थः किं वा अस्य लक्षणमित्यादि सर्वं विचारणीयं वर्तते। यतो हि "लक्षणप्रमाणाभ्यां वस्तुसिद्धिः"[१], "मानाधीना मेयसिद्धिः मानसिद्धिश्च लक्षणात्"[२], "व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनं"[३] चेत्यादिभिराप्तोक्तिभिः लक्षणविचारः अवश्यं कर्तव्यतां धत्ते।

निपातनस्य का परिभाषेति पृच्छायां भगवता फणिना भाषितं फणिभाष्ये "यल्लक्षणेनानुत्पन्नं तत्सर्वं निपातनात् सिद्धमि"[४]ति। नागेशेनोद्योतटीकायामुद्योतितं "निपातनं नामान्यादृशे प्राप्तेऽन्यादृशप्रयोगकरणमि"[५]ति। काशितञ्च काशिकाकारेण काशिकायां "यदिह लक्षणेनानुपपन्नं तत्सर्वं निपातनात् सिद्धमि"ति। सिद्धान्तकौमुद्यां सिद्धान्तितं भट्टोजिदीक्षितेन "ऋत्विग्दधृक्..."(३.२.५१) इति सूत्रस्य वृत्तौ "अलाक्षणिकमपि किञ्चित् कार्यं निपातनाल्लभ्यते" इति। टीकितञ्च बालमनोरमाटीकायां वासुदेवेन "क्षय्यजय्यौ शक्यार्थे"(६.१.८१) इति सूत्रस्य "प्रातिस्विकविधिं विना सिद्धप्रक्रियस्य शब्दस्वरूपस्य निर्देशो निपातनमि"ति। मुग्धबोधव्याकरणस्य टीकाकृता रामतर्कवागीशेन "सह सोऽकाले"(३७८) इति सूत्रस्य तदीयप्रमोदजननीटीकायां गदितं "... यद्यत्कार्यं लक्षणेन न सिध्यति तत्तत्सर्वं निपातनाज्ज्ञेयमि"ति। स्वरूपाचार्यप्रणीतायाः "वाचस्पत्यादयः संज्ञाशब्दा निपातनात् साधवः"

---

*अतिथि-अध्यापकः, संस्कृतविभागे, लालबाबामहाविद्यालये, बेलुरस्थे, पश्चिमवङ्गस्थे।

[१]जैमिनीयन्यायमाला, पा० १, अधिकारणम् २

[२]तत्रैव

[३]तर्कसंग्रहदीपिकाटीका

[४]तारानाथतर्कवाचस्पतिकृते वाचस्पत्यम् इति शब्दकोशे।

[५]लाहिडी-शास्त्रिसम्पादितं पाणिनीयम् (दि ढाका स्टुडेन्टस् लाइब्रेरी, प्रथमसंस्करणम् १९५६, षष्ठसंस्करणम् २००६), पृष्ठा २२८

इत्यस्याः पङ्क्तेः व्याख्यायां चन्द्रकीर्तिना भणितं "...यल्लक्षणैर्नोपपन्नं तत्सर्वं निपातनात् सिद्धमेवेति लक्षणसूत्रमन्तरेण लोकप्रसिद्धरूपोच्चारणं निपातनमि"ति। वस्तुतस्तु लोपागमवर्णविकारनाशविपर्यया: निपातनस्थलानि। परन्तु आदावेवास्माकं मनसि शङ्कोदेति निपातनस्य का आवश्यकता? कथं स्वीकुर्मो निपातनम्? यतो हि "निषेधविकल्पयोर्विभाषा संज्ञा स्यादि"[६]ति नियमस्य निषेधांशमाश्रित्य "इदं न भवती"ति प्रतिषेधमाध्यमेन, विकल्पपक्षमाश्रित्य वा "इदं भवत्येवे"त्यनेन सर्वे शिष्टप्रयोगाः सिद्ध्यन्ति। तत्रास्माभिः वक्तव्यं यत् प्रतिषेधस्य हि निवृत्तावेव तात्पर्यम्। यथा "नाव्ययीभावादतोऽम्त्वपञ्चम्याः" (२.४.८३) इति सूत्रव्याख्याप्रसङ्गे बालमनोरमाकृता लिखितम् "अत्रापञ्चम्या इति प्रतिषेधोऽयमि"ति। अपरतः निपातनस्य तु तद्रूपसाधुत्वप्रतिपादने, न तु रूपान्तरनिवृत्तावित्यर्थः। केनचित् प्रख्यातनाम्ना विदुषा एतेषां भेदो लिखित आङ्गलभाषया-

**निपातनं** (ad hoc rules) नाम "Rules which provide forms to be treated as derived even though derivational details are missing" इति।

**प्रतिषेधः**(negation rules) खलु "Rules which counter an otherwise positive provision of a given rule" इति।

**विभाषा**(optional rules) हि "Rules which render the provision of a given rule optional" इति।[७]

निपातनसिद्धशब्दानां प्रदर्शनावसरे प्रायः पाणिनीयरीत्या केचन सूत्रप्रत्ययाः अपाणिनीयरीत्या केचित् सूत्रप्रत्ययाश्च प्रतिपादितास्तत्रत्यैः वैयाकरणैरिति कृत्वा यदेव भेदोऽभेदश्चावलोक्यते तदेव पाणिनीयापाणिनीयोभयतन्त्रस्य सारं मथित्वा समालोच्यते अत्रास्मिन् सन्दर्भे।

## १. तिष्ठद्गुप्रभृतीनि च (२.१.१७)

पदत्रयात्मके सूत्रेऽस्मिन् शतृशानजादेशः, पुंवद्भावविरहः, समासान्तः, सप्तम्या अलुक्, मान्तत्वम्, अहन्शब्दस्य अह्नादेशश्च निपातनकल्पितः। काशिकाकृता काशितं "तिष्ठद्गवादयः समुदाया एव निपात्यन्ते" इति। न्यस्तञ्च

---

[६]नवेति विभाषा इति सूत्रस्य दीक्षितवृत्तिः

[७]जालपुटतः (website) गृहीतम्।

न्यासकारेण जिनेन्द्रबुद्धिना “तथाभूतानां पाठ एवैषां निपातनम्” इति। पदमञ्जर्य्यां हरदत्तेनापि प्रोक्तं “गणे तथा पाठ एव तेषां निपातनमि”ति। प्रक्रियाकौमुद्यां रामचन्द्रेण ऴभणितं - “कालविशेषे निपात्यन्ते सोऽव्ययीभावः” इति। गदितञ्च प्रसादटीकाकृता विट्ठलाचार्येण – “एते समुदाया एव निपात्यन्ते अव्ययीभावसंज्ञाः” इति। भट्टोजिदीक्षितेन सिद्धान्तकौमुद्यांम् “एतानि निपात्यन्ते” इति। मुग्धबोधव्याकरणे “सहः सोऽकाले” (३७८) इति सूत्रस्य “तिष्ठद्ग्वाद्या” इत्यत्र व्याख्यायां लिखितं रामतर्कवागीशेन “तिष्ठद्ग्वाद्या वसंज्ञका निपात्यन्ते” इति। संक्षिप्तसारव्याकरणे गोयीचन्द्रेण स्वीयायां विवरणीटीकायां टीकितम् “अव्ययीभावसंज्ञकस्तिष्ठद्ग्वादिसमुदायो निपात्यते” इति।
नीचैः क्रमशः प्रत्येकमुदाहरणमेकैकं दीयते–

**शत्रादेशः**– तिष्ठद्गु इत्यत्र “तिष्ठन्ति गावो यस्मिन् काले स” इति व्युत्पत्तौ तिष्ठन्तीति लटः शत्रादेशे तिष्ठन्त्यः इति, आयतीगवमित्यत्र “आयन्ति गावो यस्मिन् काले स” इति विग्रहे आयन्तीति लटः शत्रादेशे आयत्यश्चेति अप्रथमासमानाधिकरणाभावात् “लटः शतृशानजावप्रथमासमानाधिकरणे” (३।२।१२४) इति सूत्रस्याप्राप्तावपि अत्र पदद्वये लटः शत्रादेशः निपातनसाध्यः। न्यासकृतोपन्यस्तं “पूर्वपदस्य शत्रादेशो निपात्यते” इति। पदमञ्जर्य्यां हरदत्तेन ग्रथितं “लटः शत्रादेशो निपात्यते..., आयतीगवमित्यत्र तु पुंवद्भावाभावः शत्रादेशः समासान्तश्च“ इति। शब्दकौस्तुभे शब्दितं भट्टोजिदीक्षितेन “तिष्ठद्गु शत्रादेशो निपातनात्। ...आयतीगवम्। इह शत्रादेशः पुंवद्भावाभावः समासान्तश्च निपात्यते” इति। सिद्धान्तकौमुद्यामपि अनुरूपमेव लिखितं तेन। प्रोक्तञ्च वासुदेवेन बालमनोरमायां “तिष्ठन्त्यो गाव इति आयत्या गाव इति च प्रथमासमानाधिकरणत्वाद् लटः शतृशानचौ इत्यप्राप्तौ तन्निपातनमि”ति। वचनमिदं किञ्चित् वर्धयित्वा व्याख्यातं तत्त्वबोधिनीकृता ज्ञानेन्द्रचरणेन “प्रथमासमानाधिकरणे शत्रादेशस्यासम्भावाद्” इति। संक्षिप्तसारव्याकरणस्य वृत्तौ जुमरनन्दिना ईरितम् “आयतीगवं निपातनाच्छतृः“ इति।

**शानजादेशः**– एवं लूयमानयवमित्यत्र “लूयन्ते यवा यस्मिन् काले” इत्यर्थे लूयन्त इति कर्मणि लटः शानजादेशो निपातनविहितः, अप्रथमासमानाधिकरणमेव शानजादेशस्य विषयत्वात्।

सिद्धान्तकौमुद्याम् “आने मुक्” (७।२।८२) इति सूत्रस्य वृत्तौ

“लडित्यनुवर्तमाने पुनर्लङ्ग्रहणमधिकविधानार्थम्। तेन प्रथमासामानाधिकरण्येऽपि क्वचिदि”ति देदीप्यमानात् दीक्षितवचनाद् वक्तुं शक्यते - अत्र शतृशानजादेशः नैव निपातनसिद्धः अपि तु पाणिनिसम्मतः।

**पुंवद्भावविरहः**– आयतीगवमित्यत्र भाषितपुंस्कस्य आयतीशब्दस्य “स्त्रियाः पुंवद्...” (६।३।३४) इत्यनुसारं पुंवत्त्वे आयद्गवम् इत्येवाभिप्रेतम्। परन्तु अत्र पुंवत्त्वस्य प्राप्तौ तद्रहितत्वं निपात्यते। तथा हि गदितं वासुदेवेन बालमनोरमायां “तिष्ठन्तीशब्दस्येव आयतीशब्दस्य “स्त्रियाः पुंवत्...” (६।३।३४)इति पुंवत्त्वस्य प्राप्तौ तदभावो निपात्यते” इति। संक्षिप्तसारस्य टीकाकारः गोयीचन्द्रः अस्य निपातनात् पुंवद्भावं स्वीकृत्य लिखति - “निपातनाच्छतृरपुंवद्भावश्च” इति।

**समासान्तः**– “गोरतद्धितलुकि” (५।४।९२) इति सूत्रेण गोशब्दस्य समासान्तः टज्विधिः तत्पुरुष एव भवतीति हेतोः आयतीगोशब्दस्य अव्ययीभावात् नपुंसकह्रस्वत्वे आयतीगु इत्येव विवक्षितम्। परन्तु आयतीगवमित्यत्र समासान्तः टच् निपातनाज्जातः। तथा ह्यगादि बालमनोरमायां वासुदेवदीक्षितेन “आयतीगोशब्दस्य टच् समासान्तो निपात्यते” इति। प्रोक्तञ्च गोयीचन्द्रेण विवरणीटीकायां “गोरतद्धितलुकीति तत्पुरुषे समासान्तो विहितोऽव्ययीभावो न प्राप्नोतीति निपातनाद्विधीयते” इति।

**सप्तम्या अलुक्**- खलेयवमित्यत्र खलयवयोरव्ययीभावः समासो वर्तते। समासस्य प्रातिपदिकत्वात् “सुपो धातु....”(२.४.७१) इत्यनुसारं सुब्लुकि सति अकारान्तात् “नाव्ययीभावाद्...”(२.४.८३) इत्यादिना अम्भावे खलेयवमित्येव विवक्षितम्। खलेयवमित्यत्र तु सप्तम्या लुक् न जायते इति कृत्वा अत्र सप्तम्या अलुक् निपातनात् सिध्यति। दर्शितञ्च न्यासटीकायां न्यासकारेण “सप्तम्या अलुग् निपात्यते” इति। कातन्त्रपरिशिष्टस्य वृत्तिकृता श्रीपतिदत्तेन “खलेयवादीनि” (१६४) इति सूत्रस्य वृत्तौ गदितं “खलेयवादीन्यव्ययीभावरूपाणि निपात्यन्ते” इति। तत्त्वबोधिनीकृता तु अस्य निपातनं नोक्त्वा केवलं लिखितं “सप्तम्या अलुक्” इति। सममेव प्रोक्तं संक्षिप्तसारस्य वृत्तिकृता जुमरनन्दिना “तिष्ठद्ग्वादिश्च” (८१) इति सूत्रस्य वृत्तौ।

**मान्तत्वम्**– समभूमि इत्यत्र समत्वं भूमेरिति पूर्वपदार्थप्राधान्य-विवक्षायामव्ययीभावे समभूमि, मान्तत्वे च समम्भूमि इति रूपद्वयम्। उत्तरपदार्थप्राधान्यविवक्षायान्तु कर्मधारयसमासे समभूमिः मान्तत्वे च समंभूमिरिति शब्दद्वयं निष्पत्तिमेति। अत्र मान्तत्वं निपातनकल्पितम्।

श्रीपतिदत्तेन कातन्त्रपरिशिष्टे "खलेयवादीनि" (१६४) इति सूत्रस्य वृत्तौ लिखितं "समत्वं भूमेः समंभूमि, समंपदाति, समत्वे समम् अव्ययम् , भावप्रत्ययस्य लुग् निपात्यते" इति। गोयीचन्द्रेण भाषितं "तिष्ठद्गवादिश्च" (८१) इति सूत्रस्य विवरणीटीकायां "पक्षे मान्तत्वमिति निपातनादवगन्तव्यम् " इति। अनुरूपतया समपदाति, समंपदाति चेत्यपि सुविज्ञेयम्।

पदमञ्जरीटीकाकृता हरदत्तेन अत्र निपातनं नाङ्गीकृत्य मुमागमेन अस्य गतार्थता प्रदर्शिता। तत्रभवद्भिर्प्रोक्तं - "अत्र पूर्वपदस्य मुमागमः" इति।

**अह्नादेशः**- प्रगतत्वमह्नः प्राह्णमित्यत्रापि पूर्वपदार्थप्राधान्ये अव्ययीभावसमासे समासान्तस्य अहन्शब्दस्य अह्नादेशश्च निपातनाद् विधेयः, अह्नादेशस्तत्पुरुषस्य विषयत्वात्। भणितञ्च गोयीचन्द्रेण विवरणीटीकायां - "प्रगतत्वमह्नः प्राह्णमित्यत्रापि पूर्वपदार्थप्रधानत्वम् अनन्ताच्चेत्यनुवृत्तौ क्लीबे वा इत्यव्ययीभावसमासान्तोऽह्नादेशश्च तत्पुरुषे विहितोऽव्ययीभावे न प्राप्नोतीति निपातनाद्विधेयः" इति।(८१)

## २. पारे मध्ये षष्ठ्या वा (२।१।१८)

चतुर्पदात्मके सूत्रेऽस्मिन् पारेमध्येशब्दयोः समासे पारेगङ्गात् , मध्येगङ्गाच्चेत्यत्र एत्त्वं निपातनसाध्यम्। महाभाष्ये भाष्यकारेण "एकारान्तनिपातनं च" इति वार्तिकमेवं व्याख्यातं "एकारान्तनिपातनं च कर्तव्यम् " इति। काशितञ्च काशिकायां काशिकाकृता "अनयोरेकारान्तत्वं निपात्यते" इति। पदमञ्जर्य्यां हरदत्तेनापि भणितम् "एकारान्तत्वनिपातनं यत्र सप्तम्यर्थो न सम्भवति पारेगङ्गादानयेति, तदर्थमि"ति। शब्दकौस्तुभे भट्टोजिदीक्षितेन शब्दितम् "एदन्तत्वं चानयोर्निपात्यते" इति। अनुरूपमेवोक्तं प्रक्रियाकौमुद्यां रामचन्द्रेण सिद्धान्तकौमुद्याञ्च भट्टोजिदीक्षितेन। ध्वनितञ्च वासुदेवेन बालमनोरमायां - "...पारशब्दस्य पूर्वनिपाते निपातनादेत्वे नपुंसकह्रस्वत्वे पारेगङ्गशब्दात् समासात् पुनः पञ्चम्युत्पत्तिः" इति। तत्त्वकौमुदीकारेण ग्रथितं "यत्र सप्तम्यर्थो न सम्भवति तदर्थमेकारान्तत्वनिपातनम् " इति। प्रोक्तञ्च जुमरनन्दिना संक्षिप्तसारस्य वृत्तौ "अव्ययीभावे निपातनादेत्त्वम् " (८३) इति। तत्र गोयीचन्द्रेण गदितं "पारमध्यशब्दयोरेव यद्येत्त्वं निपात्यते तदा षष्ठीसमासे एत्त्वं स्यात् अत आह अव्ययीभावे निपातनादेत्त्वमि"ति।

कातन्त्रपरिशिष्टवृत्तिकृता श्रीपतिदत्तेन "वा त्वग्रे पारे मध्येऽन्तरः" (१४८)

इति सूत्रस्य वृत्तौ पारे, मध्ये इत्येतयोः निपातनं न मनसिकृत्य केवलं लिखितम् "अग्रेप्रभृतेः षष्ठ्यन्तेन सहाव्ययीभावो न भवति वा" इति। मुग्धबोधस्य टीकाकृता रामतर्कवागीशेनापि अत्र निपातनं नोल्लिख्य भिन्नेन प्रकारेण अस्य साधुत्वं दर्शितम्। तत्रभवद्भिः "सहः सोऽकाले" (३७८) इति सूत्रस्य "पारे मध्ये ष्या" इत्यत्र प्रोक्तं "सूत्रनिर्देशात् ष्या अलुक्" इति।

## ३. प्रतिपरसमनुभ्योऽक्ष्णः (गणसूत्रम् १५८)

सूत्रेऽस्मिन् परोक्षमिति तावदुदाहरणं वर्तते। परोक्षमित्यत्र अक्ष्णः परमिति विग्रहे परमित्यस्य अक्षि इत्यनेन अव्ययीभावसमासे अम्भावे परशब्दात् अकारस्य ओकारः समासान्तश्च निपात्यते।

महाभाष्ये गोर्नदीयः पतञ्जलिः आह – परशब्दादुत्तरस्य अक्षिशब्दस्यादेरुत्वं स्यात् - "परशब्दस्याक्षशब्दे उत्तरपदे परोभावो वक्तव्यः, अथ वा परशब्दादुत्तरस्याक्षिशब्दस्योत्वं वक्तव्यम्" इति। अन्तिमे भगवता सिद्धान्तितं परोक्ष इति निपातनसिद्धम् - "अथ वा निपातनादेव सिद्धं परोक्षे लिड्" इति। सिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन लिखितं - "परोक्षे लिट् इति निपातनात् परस्यैकारादेशः" इति।

अपि च, "परोक्षे लिट्" इति सूत्रस्थभाष्यकैयटयोरत्र समासान्तस्यापि निपातनेनैव साधितत्वादि"ति बालमनोरमायां बालमनोरमाकृतः वचनप्रामाण्यात् वक्तुं शक्यते "अच्प्रत्यन्ववपूर्वात्" इत्यत्र योगविभागात् विकल्पेन समासान्तोऽच् निपात्यते। अन्ये तु "प्रतिपरसमनुभ्योऽक्ष्णः" (गणसूत्रम् १५८: ५।४।१०७) इति शरत्प्रभृतिषु पाठात् च समासान्त इत्याहुः। कारणं खलु यदि प्रोक्तगणसूत्रेण टच् निपातनकल्पितः स्यात् तर्हि "क्रियायां परोक्षायाम्" (म० भा० ३।२।११५) इति भाष्यप्रयोगे "टिड्ढाणञ्..." (४।१।१५) इत्यादिना टिल्लक्षणो ङीप् भवति यदेवानिष्टं स्यात्। तस्माद् वक्तव्यम् अत्राजन्तो निपातनाज्जायते। तथा च "परोक्षे लिट्" (३।२।११५) इति सूत्रभाष्यस्य प्रदीपटीकायां कैयटेन प्रदीपितं "...निपातनादच् समासान्तः" इति।

मुग्धबोधव्याकरणे "सम्परःप्रत्यनुभ्योऽक्ष्णः" (३८२) इति सूत्रस्य व्याख्यायां टीकाकृता रामतर्कवागीशेन अत्र निपातनं नाङ्गीकृत्य पर इति कृतसकारान्तेन परसित्यनेन, पारस्करादित्वात् सुडागमेन, समासान्तवप्रत्ययेन च अस्य गतार्थता निरूपिता - "पर इति कृतसान्ताक्षशब्दे परे मनीषादित्वात् परिशब्दस्यादिष्टस्य

परस् इत्यस्य ग्रहणम्। अक्ष्णः परि परोक्षम् आङ्पर्यपवहिरञ्चामित्यादिना वः, अन्ये तु अक्षि अक्षि परि परोक्षमिति वीप्सायां व इत्याहुः। एके तु अक्ष्णोः परः परोक्षं, पारस्करादित्वात् सुम्" इति। मुग्धबोधव्याकरणस्य अपरेण टीकाकारेण अस्य निपातनत्वं स्वीकृतम्। तत्रभवद्भिः प्रोक्तम् "अत्र परपदस्य निपातनादसन्तस्य परम् इति भागस्य ग्रहणम्" इति।

संक्षिप्तसारव्याकरणे "परेः परस् च" (३०२) इति सूत्रस्य टीकायां टीकाकृता गोयीचन्द्रेण स्वीयायां विवरणीटीकायां परिशब्दस्य परसादेशेन अत्प्रत्ययेन च अस्य साधुत्वं दर्शितम् - "परेरुत्तरादक्ष्णोऽव्ययीभावेऽद्भवति। परेः स्थाने परस् च आदेशः" इति। परन्तु तेन संक्षिप्तसारस्य "अप्रत्यक्षे परोऽक्षमित्यादि" (१२२) इति सूत्रे निपातनमङ्गीकृतम् - "अक्षात् परं परोऽक्षमिति निपात्यते सुट् अप्रत्यक्षे वाच्ये" इति।

## ४. पात्रेसमितादयश्च (२।१।४८)

अत्र आदिपदेन गेहेनर्दी, गेहेशूर इत्यादयः परामृश्यन्ते। पात्रेसमित इत्यत्र संपूर्वात् इण् गतौ इति धातोः "गत्यर्थाकर्मकश्लिष..." (३।४।७२) इत्यादिना कर्तरि क्तप्रत्यये कृतसमासादिकार्ये च सप्तम्या अलुक् निपातनकल्पितः।

एवं गेहेनर्दी इत्यत्र नर्द शब्दे इत्यस्माद् धातोः "सुप्यजातौ णिनिस्ताच्छील्ये" (३।२।७८) इत्यनेन सूत्रेण णिनिप्रत्यये कृतसमासे सप्तम्या अलुक् निपातनविहितः। इत्थं गेहेशूर इत्यपि ज्ञेयम्।

निन्दायां गम्यमानायां पात्रे समितादयः एते शब्दा निपात्यन्ते। "तत्पुरुषे कृति बहुलम्" (६।३।१४) इति सूत्रे बहुलग्रहणात् अनेनैव एतेषाम् अलुक् सिद्धेदिति न वक्तव्यं, यतो हि सूत्रमिदमुपपदतत्पुरुषसमासविधायकम्। तस्मात् इमे शब्दा निपात्यन्ते। तथा चोक्तं भट्टोजिदीक्षितेन शब्दकौस्तुभे "एते निपात्यन्ते क्षेपे" इति। "समुदाया एव निपात्यन्ते" इति काशिकाकाराः। बालमनोरमाकारेण प्रपञ्चितं "निपातनात् सप्तम्या अलुक्, समासे सति निपातनादलुक्" इति। मुग्धबोधस्य टीकाकृता रामतर्कवागीशेन "पात्रेसमितादयः" इत्यत्र व्याख्यातं "क्षेपे गम्यमाने पात्रेसमितादयः षीषे निपात्यन्ते" इति। संक्षिप्तसारव्याकरणे व्याकृतं गोयीचन्द्रेण पात्रेसमितादयश्च (४४) इति सूत्रस्य टीकायां क्षेपे गम्यमाने पात्रेसमितादयः शब्दाः समुदाया एव तत्पुरुषसंज्ञका निपात्यन्ते इति।

कातन्त्रपरिशिष्टे तु "पात्रेसमितादीनि क्षेपे" (१०२) इति सूत्रस्य वृत्तौ वृत्तिकृता

अत्र निपातनं नाङ्गीकृत्य लिखितम् "इमानि सप्तमीतत्पुरुषरूपाणि साधूनि भवन्ति क्षेपे। एतेऽलुक्सप्तमीकाः अवधारणात् क्षेपावगतिः" इति।

## ५. मयूरव्यंसकादयश्च (२।१।७२)

अत्र आदिपदेन उच्चावचम्, निश्चप्रचम्, अकिञ्चनः, अकुतोभयश्चेत्यादयः बोद्धव्याः। एते शब्दाः निपातनविहिताः। तथा च काशितं काशिकायां काशिकाकृता - "समुदाया एव निपात्यन्ते" इति। एते निपात्यन्ते इति सिद्धान्तिकौमुद्यां भट्टोजिदीक्षितपादाः। कातन्त्रपरिशिष्टे तु वृत्तिकृता "मयूरव्यंसकादीनि" (६१) इति सूत्रे निपातनं नाश्रित्य अस्य साधुत्वं निरूपितम् - "एतानि समासरूपाणि साधूनि भवन्ति" इति।

मयूरव्यंसक इत्यत्र व्यंसकश्चासौ मयूरश्चेति विग्रहे "विशेषणं विशेष्येण बहुलम्" (२।१।५७) इति सूत्रेण कर्मधारयसमासे व्यंसकशब्दस्य विशेषणत्वात् पूर्वनिपाते प्राप्ते सत्यपि अत्र तदभावो निपातनाज्जायते। अत्र निपातनं कथमाश्रितमिति जिज्ञासायां वासुदेवेनापि लिखितं बालमनोरमायां "गुणवचनत्वाद् व्यंसकशब्दस्य पूर्वनिपाते प्राप्ते इदं वचनम्" इति। "... गुणवचनत्वात्पूर्वनिपाते प्राप्ते इदं वचनमारब्धम्"इति तत्रभवन्तस्तत्त्वबोधिनीकाराः।

मुग्धबोधस्य कर्मधारयसमासप्रकरणे मयूरव्यंसकाद्याः इत्यत्र प्रपञ्चितं टीकाकृता रामतर्कवागीशेन "मयूरव्यंसकाद्याः शब्दा यसंज्ञका निपात्यन्ते" इति। संक्षिप्तसारस्य टीकाकृता गोयीचन्द्रेणापि टीकितं "मयूरव्यंसकादयश्च" (१११) इति सूत्रे "समुदाया एव निपात्यन्ते मयूरव्यंसकादयः शब्दाः कर्मधारयसंज्ञका भवन्ति" इति।

उच्चावचमित्यत्र उदक् च अवाक् च इति विग्रहे अनेन सूत्रेण तत्पुरुषसमासो जायते, अत्र निपातनस्य स्थलद्वयं वर्तते -

प्रथमतः - उदक्शब्दस्य उदचत्यादेशः अवाक्शब्दस्य अवचादेशश्च निपातनाद् भवति।

द्वितीयतः - "चार्थे द्वन्द्वः" (२।२।२९) इति सूत्रेण चार्थे वर्तमानेन नैकेन सुबन्तेन द्वन्द्वसमासो भवति। अत्र तु तत्पुरुषसमासे द्वन्द्वभावो निपानतकल्पितः।

एवं निश्चप्रचमित्यपि निपातनात् सिद्धम्।

अकिञ्चन इत्यत्र "नास्ति किञ्चन यस्य सः", "नास्ति किमपि यस्य स वा", (यतो हि चनेत्यव्ययमप्यर्थे भवति) व्युत्पत्तौ तत्पुरुषसमासो वर्तते। अत्रापि

निपातनस्य त्रिविधं स्थलं विराजते -
प्रथमतः - नञ् किम् चन चेति त्रिपदस्तत्पुरुषोऽत्र निपातन-साध्यः। बालमनोरमाकारोऽपि अस्य निपातनप्रसङ्गे लिखति - "बहुव्रीह्यपवादस्त्रिपदस्तत्पुरुषः" इति।
द्वितीयतः - "अनेकमन्यपदार्थे" (२।२।२४) इति सूत्रेण अन्यपदार्थप्राधान्ये बहुव्रीहिसमासो भवति। परन्त्वत्र तदर्थे तत्पुरुषो वर्तते। अत एव तत्पुरुषभावोऽत्र निपातितः।
तृतीयतः - अकिञ्चन इत्यत्र नकारस्य लोपो निपात्यते। "न लोपो नञः" (६।३।७६) इति सूत्रं नात्र प्रवर्तते, यतो हि नञो नस्य लोपः स्यादुत्तरपदे। समासान्तिमखण्ड एवोत्तपदशब्दस्य रूढत्वादत्र किंशब्दस्य उत्तरपदत्वाभावात्। कातन्त्रपरिशिष्टे प्रोक्तं वृत्तिकृता मयूरव्यंसकादीनि (६१) इति सूत्रे "न किञ्चनेत्यव्ययेनापि समासे निपातनाद् अभिधेयलिङ्गता" इति। अनुरूपमेव मन्तव्यं लिखितं गोयीचन्द्रेण संक्षिप्तसारे "मयूरव्यंसकादयश्च" (१११) इति सूत्रे।

## ६. द्विस्तावा त्रिस्तावा वेदिः (५।४।८४)

अत्र द्विः तावती इति विग्रहे द्विः पदेन साकं तावतीपदस्य समासे समासान्ते अचि द्विस्तावती अचि इति दशायां तावतीशब्दस्य "भस्याढे तद्धिते" (वा० ८३६) इति पुंवत्त्वे टिलोपे च द्विस्ताव इति, स्त्रियां द्विस्तावेति रूपं भवति। एवं त्रिस्तावेति। अत्र समासः, समासान्तोऽच् टिलोपश्च निपातितः। यथा -
समासः समासान्तोऽच् च – गणनार्थे "द्वि-त्रि-चतुर्भ्यः सुच्" (५।४।१८) इत्यनेन सुजन्तस्य द्विःपदस्य त्रिःपदस्य च तावतीपदेन साकं सापेक्षताभावात् समासावकाशो नास्ति। परन्तु उभयोः समासस्य विद्यमानत्वात् सावकाशः समासोऽत्र निपातनसाध्यः। एवं समासाभावात् समासान्तोऽज्विधायकप्रामाणिकसूत्राभावाच्च समासान्तोऽजपि निपातनकल्पितः।
टिलोपः - "टेः" (६।४।१४३) इत्यनेन डिति परे भस्य टेर्लोपः स्यादिति। प्रत्ययस्याडित्त्वेऽपि अत्र टिलोपो निपात्यते। अपि च, "नस्तद्धिते" (६।४।१४४) इत्यनुसारं नान्तस्य भस्य टेर्लोपः स्यादिति। अत्र प्रकृतेरनान्तत्वेऽपि टिलोपः निपातनविहितः। प्रोक्तञ्च काशिकाकारेण काशिकायां द्विस्तावा, त्रिस्तावा इति निपात्यते वेदिश्चेद् अभिधेया भवति। अच्प्रत्ययः टिलोपः समासश्च निपात्यते। यावती प्रकृतौ वेदिस्ततो द्विगुणा वा त्रिगुणा वा कस्याञ्चिद्विकृतौ तत्रेदं निपातनम्" इति। अस्य काशिकावचनस्य व्याख्यानमेवं दीयते- "टिलोपस्तावतीशब्दस्य।

यस्येति लोपे कृते तावच्छब्दस्य टिलोपो निपात्यते। समासश्चेति द्वित्रिशब्दयोर्निपात्यते। सापेक्षं तु यावतीशब्दापेक्षत्वात्। यावतीप्रकृतावित्यादिना निपातनस्य फलं दर्शयति। पदमञ्जरीकृता हरदत्तेनापि लिखितं समासश्च निपात्यते लक्षणाभावात्" इति। प्रक्रियाकौमुद्याः प्रासादटीकाकृता विट्ठलाचार्येणापि ईरितं "वेद्यां वाच्यामेतौ निपात्येते। यावती प्रकृतौ वेदिस्ततो द्विगुणा त्रिगुणा वा कस्याञ्चिद्विकृतौ या वेदिस्तस्यामेतन्निपातनम्। अच्टिलोपसमासा निपात्यन्ते" इति। उदितञ्च सिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन "अच्प्रत्ययष्टिलोपः समासश्च निपात्यते" इति। बालमनोरमाकृता ग्रथितं "निपातनात् समासः, अच्प्रत्ययः, तावतीशब्दस्य "भस्याढे ..." इति पुंवत्त्वे ङीपो निवृत्तौ प्रत्ययस्याडित्त्वेऽपि प्रकृतेर्नान्तत्वाभावेऽपि टिलोपः" इति।

मुग्धबोधस्य "निसः शतो डः" (४०३) इति सूत्रस्य टीकायां टीकाकृता रामतर्कवागीशेन गदितं "क्रियया सह सामानाधिकरण्यात् द्वित्रिशब्दात् सुच्, तयोस्तावतीशब्देन मयूरव्यंसकादित्वात् सः। एषां विशेषार्थविशेषयोर्निपातनात् ... द्विस्तावती रज्जुरित्यत्र न स्यादि"ति। संक्षिप्तसारे तावतीशब्देन तु यावत्यपेक्षेण द्रव्यवृत्तिना सङ्ख्याशब्दस्य सामानाधिकरण्याभावात् विशेषणसमासो न भवतीत्यत आह – मयूरव्यंसकादित्वादिति इति गोयीचन्द्रो "वेद्यां द्विस्त्रिभ्यां तावत्यास्तीलुक् च" (३३६) इति सूत्रे। अस्मिन् सूत्रे तेन अत्प्रत्ययेन तीलुका च अस्य साधुत्वं दर्शितं "वेद्यामभिधेयायां द्विस्त्रिरित्येताभ्यामुत्तरस्यास्तावत्या उत्तरे समासेऽद्भवतीति तीलुक् चे"ति।

## ७.सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः (५।४।१२०)

बहुव्रीहौ सुप्रातादीनाम् अच्प्रत्ययः टिलोपादिकञ्च निपातनात् प्रतिपत्तव्यम्। काशितञ्च काशिकाकृता "सुप्रातादयो बहुव्रीहिसमासा अच्प्रत्ययान्ता निपात्यन्ते। अन्यदपि च टिलोपादिकं निपातनादेव सिद्धम्" इति। भट्टोजिदीक्षितेनापि गदितं सिद्धान्तकौमुद्याम् "एते बहुव्रीहयोऽच्प्रत्ययान्ता निपात्यन्ते" इति।

सुप्रातः इत्यत्र "शोभनं प्रातरस्य" इत्यर्थे, सुश्वः इत्यत्र "शोभनं श्वः अस्य" इति व्युत्पत्तौ च बहुव्रीहिसमासे समासान्ताच् टिलोपश्च निपातनसाध्यः। "अव्ययानां भमात्रे टिलोपः" (वा० ८४२) इति वार्तिकमत्र नाश्रितं, प्रोक्तवार्तिकस्य

अनित्यत्वात्।

मुग्धबोधस्य टीकाकृता रामतर्कवागीशेन "सङ्ख्याया डोऽवहोः" (३३९) इत्यस्य सूत्रस्य "सोः श्वः प्रातर्भ्याम् " इत्यत्र व्याख्यायां डप्रत्ययेन अनयोः साधुत्वं निष्पादितम् - "सोः पराभ्यामाभ्यां डः स्यात् हे" इति। संक्षिप्तसारव्याकरणस्य टीकाकृता गोयीचन्द्रेण "सोः श्वः प्रातर्भ्यां डः" (३२१) इत्यस्मिन् सूत्रे निपातनं न मनसिकृत्य डप्रत्ययेन उभयोः गतार्थता निरूपिता - "सु इत्येतस्मादुत्तराभ्यां श्वस् प्रातर् इत्येताभ्यां बहुव्रीहौ डो भवति। शोभनं श्वोऽस्येति सुश्व इति सुदिवशब्दवत् व्याख्येयं डित्त्वादस्लुक् एवं सुप्राता क्वचिदव्ययानां स्वरतच्छेषयोर्लुगित्येव लुकि सिद्धे डविधानं प्रकरणान्तरविहितत्वादत्र लोपो न भवती"ति।

एवं सुदिव इत्यत्र "शोभनं दिवा अस्य" इत्यर्थे, शारिकुक्षिः इत्यत्र "शारेरिव कुक्षिरस्य" इति विग्रहे, चतुरश्र इत्यत्र च "चतस्रः अश्रयः अस्य" इति व्युत्पत्तौ बहुव्रीहिसमासे उपयुक्तसूत्राभावात् एतेषां परो विहितऽच्प्रत्ययो निपात्यते। मुग्धबोधव्याकरणे "भान्नेतुः" (३४७) इति सूत्रस्य व्याख्यायां रामतर्कवागीशेन लिखितं "सुदिवाद्या अदन्ता निपात्यन्ते" इति।

संक्षिप्तसारव्याकरणे गोयीचन्द्रेण एतेषां निपातनं नोरसीकृत्य साधुत्वप्रदर्शनार्थं भिन्नो मार्गोऽनुसृतः। तत्रभवद्भिः प्रपञ्चितं संक्षिप्तसारस्य "स्वादिभ्यो दिवादेः" (३१७) इत्यस्मिन् सूत्रे "स्वादिभ्य उत्तरेभ्यो दिवादेर्बहुव्रीहावत् स्यात्। ...शोभनं दिवा अस्येति शोभनमिति कर्मणो विशेषणं शोभनं दिवाकाले कर्मास्येत्यर्थः बहुव्रीहौ समासान्तस्य विधानसामर्थ्यादसमानाधिकरण्ये सापेक्षत्वेऽपि समास" इति।

"एण्या इव पादावस्य "इत्यर्थे एणीपद इत्यत्र बहुव्रीहौ समासान्तोऽच् , हस्त्याद्युपमाने परिगणितत्वात् "पादस्य लोपोऽहस्तादिभ्यः" (५।४।१३८) इत्यस्य अप्राप्तावपि पादस्य टिलोपः, टिलोपे च पादः पद्भावो निपातनविहितः। अनेन प्रकारेण अजपदः, प्रोष्ठपदः चेत्यत्र अच्प्रत्ययः, टिलोपः, पादः पद्भावश्च निपातनसाध्यः। प्रोक्तञ्च वासुदेवेन बालमनोरमायाम् "एणीपदादिषु अच् निपातनात् पादः पदि"ति। गदितञ्च ज्ञानेन्द्रपादेन तत्त्वबोधिन्याम् "एणीपदादिषु निपातनात् पद्भावः" इति।

पादशब्दसमानार्थेन पदशब्देन एषां सिद्धिरिति चान्द्राः। गोयीचन्द्रमते तु न तद्बहुसम्मतमिति। तस्मात् तेन लिखितं संक्षिप्तसारे "स्वादिभ्यः दिवादेः" (३१७) इत्यस्मिन् सूत्रे "एनीपद इति उपमानादहस्त्यादेः पादस्येत्यकारलुक्

समासकृतालोपस्य पादः शसाद्यचि तद्धितये चेति ह्रस्वः” इति।

## ८. कुस्तुम्बुरूणि जातिः (६।१।१४३)

कुस्तुम्बुरु इत्यत्र “कुत्सितः तुम्बुरुः” इति विग्रहे कुतत्पुरुषसमासे सुडागमो निपातनात् प्रतिपादितः, सुडागमविधायकप्रामाणिकसूत्राभावात्। काशिकाकारेण काशिकायां प्रतिपादितं - “कुस्तुम्वुरूणि इति सुट् निपात्यते जातिश्चेद् भवति” इति। गदितञ्च प्रक्रियाकौमुद्यां प्रसादटीकाकारेण विठ्ठलाचार्येण “कुस्तुम्बुरूणीति सुट् निपात्यते जातिश्चेत् स्यादि”ति। सिद्धान्तकौमुद्यां भट्टोजिदीक्षितेनापि लिखितम् - “अत्र सुन्निपात्यते“ इति। ध्वनितञ्च बालमनोरमाकृता वासुदेवेन “जातिविशेषे वाच्ये कुस्तुम्बुरुशब्दः ससुड्को निपात्यते“ इति। संक्षिप्तसारे गोयीचन्द्रेणापि भणितं “कुस्तुम्बुरुर्धन्याके“ (१०४) इति सूत्रे “... सुडत्र निपात्यते“ इति।

## ९. अपरस्पराः क्रियासातत्ये (६।१।१४४)

सूत्रेऽस्मिन् अपरस्पराः इत्यत्र अपरे च परे च इति इतरद्वन्द्वे सुडागमः, “अल्पाच्तरम्” (२।२।३४) इति अल्पाच्तरस्य पूर्वनिपाते प्राप्तेऽपि अत्र अल्पाच्तरस्य परस्य परनिपातो विहितः। ग्रथितञ्च काशिकाकारेण काशिकायाम् “अपरस्परा इति सुट् निपात्यते क्रियासातत्ये गम्यमाने” इति। पदमञ्जरीकृता लिखितं “निपातनादल्पाच्तरस्य परनिपातः” इति। प्रक्रियाकौमुद्याः प्रसादटीकाकृताऽपि दर्शितम् “अपरस्परा इति क्रियासातत्ये सुट् निपात्यते” इति। संक्षिप्तसारस्य टीकाकारेण गोयीचन्द्रेणापि पाणिनीयप्रभावेण प्रभावितेन सता लिखितम् “अपरस्परा क्रियासातत्ये” (१०५) इत्यस्मिन् सूत्रे “अपरे च परे चेति सुट् निपात्यते” इति।

अनुभूतिस्वरूपाचार्येन सारस्वतव्याकरणस्य समासप्रक्रियायां समागमेनास्य अन्यथासिद्धिः उपपादिता-“ अन्यदीनां विभक्तिलोपे कृते पूर्वपदस्य समागमो वक्तव्यः” इति। अस्य सूत्रस्य व्याख्यानमेवं विहितं चन्द्रकीर्तिना- “अन्यादीनां शब्दानां समासे वर्तमानानां पूर्वपदवर्तिनां समागम इति सकारस्यागमो वा वक्तव्यः” इति।

## १०. पारस्करप्रभृतीनि च संज्ञायाम् (६।४।१५७)

अत्र प्रभृतिपदेन पारस्करः, रथस्पा, किष्कु, किष्किन्धा चेत्यादयः परामृश्यन्ते। पारं करोतीत्यर्थे पार-उपपदात् कृञ्धातोः “कृञो

हेतुताच्छील्यानुलोम्येषु" (३।२।२०) इति सूत्रेण टप्रत्यये सुडागमे च पारस्कर इति प्रतिफलति। अत्र सुडागमविधायकप्रामाणिकसूत्राभावात् सुडागमो निपात्यते। भगवता भाष्यकृता भाषितं महाभाष्ये "अविहितलक्षणः सुट् पारस्करप्रभृतिषु द्रष्टव्यः" इति। प्रोक्तञ्च काशिकाकारेण "पारस्करप्रभृतयो रूढिशब्दा यथाकथञ्चिद् व्युत्पाद्याः नात्रावयवार्थं प्रत्यभिनिवेष्टव्यम्" इति। अयमेव मार्गोऽनुसृतः पदमञ्जरीकृतापि - "रूढिशब्दा एते यथाकथञ्चिद्व्युत्पाद्याः" इति। रामचन्द्रेण प्रक्रियाकौमुद्यां प्रोक्तम् "एतानि ससुट्कानि निपात्यन्ते नाम्नि" इति। अनुरूपमेव विहितं सिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन। संक्षिप्तसारस्य टीकाकृता गोयीचन्द्रेण लिखितं पारस्करो देशे (१०९) इत्यस्मिन् सूत्रे "पारं करोतीति हेत्वादावित्यादिना कृञस्टङ् इति सुट् निपात्यते" इति।

एवं रथस्पा इत्यत्रापि "रथं पाती"त्यर्थे "आतोऽनुपसर्गे कः" (३।२।३) इत्यनेन कप्रत्यये सुट् निपात्यते। पदमञ्जरीकृता तु रथष्या इति पाठः स्वीकृतः। तस्मात् तन्मते रथं यातीति कप्रत्यये सुट्, षत्वञ्च निपातनकल्पितम् - "षत्वमप्यत्र निपात्यते" इति।

किष्कु इत्यत्र कार्यं करोतीति करोतेः डुप्रत्यये कार्यस्य च किरादेशे रेफस्य सत्वं (षत्वं) निपातितम्। किष्किन्धेति किमपि धत्ते इति विग्रहे "आतोऽनुपसर्गे कः" (३।२।३) इति कप्रत्यये स्त्रीलिङ्गे किमो द्वित्वम्, आदेः किमो मलोपः, सुडागमः, सुड्सकारस्य षत्वञ्च निपात्यते। न्यासकारेण एतयोः निपातनं नाङ्गीकृतम्। तत्र पदमञ्जरीकृता हरदत्तेन दर्शितं "कः, किमो द्विर्वचनं पूर्वस्य मलोपः, सुट्, उभयत्राप्यत्र षत्वमपि निपात्यते" इति। किष्किन्धा इत्यत्र बालमनोरमाकृता ग्रथितं "निपातनात् किमो द्वित्वम्, मलोपः, सुट्, षत्वं च" इति। तत्त्वबोधिनीकारेण ध्वनितं "निपातनात् किमो द्वित्वं पूर्वस्य मलोपः सुट् षत्वं च" इति। संक्षिप्तसारे गोयीचन्द्रेण "किष्कुकिष्किन्धयोश्च" (११९) इत्यत्र लिखितं "... किष्कुकिष्किन्धयोश्च सुट् षत्वञ्च निपात्यते। किष्किन्धेति किं किं दधातीति आदन्तादमादेरप्रादेरित्यङ् सुट् मलुक् षत्वञ्च निपात्यते" इति। अर्थात् तेन किष्किन्धेति किं किं दधातीति विग्रहस्वीकरणादत्र वीप्सायां द्वित्वं समागतं, न तु निपातनात्।

कलापव्याकरणस्य "ते थे वा सम्" इति सूत्रे पारस्करः, कुस्तुम्बुर, अपरस्परश्चेत्यादीनां सिद्धिप्रसङ्गे वृत्तिकृता दुर्गसिंहेन प्रोक्तसूत्रस्य वृत्तौ निपातनं

नोक्त्वा लिखितं "कारस्करादय इति संज्ञाशब्दा इव लोकतः सिद्धाः" इति। तेनैव अस्य सूत्रस्य टीकायामपि टीकितं "कारस्करादयः संज्ञाशब्दा लोकतः सिद्धा इति ... एवं न पारं करोतीति पारस्करो देशः। ... कुस्तुम्बुरु च धन्याकमुच्यते, न कुत्सितं तुम्बुरु इत्यन्वर्थता। अपरस्परशब्दः क्रियासातत्ये वर्तते न त्वपरे च परे चेति द्वन्द्वः अपरस्परश्छात्रा गच्छन्ति सततं गच्छन्तीत्यर्थः। ... अथ प्रकृतिप्रत्ययोपलम्भाय संज्ञाशब्दा यथाकथञ्चित् व्युत्पाद्याः, तदा वर्णागमो वर्णविपर्ययश्चेत्यादि निरुक्तलक्षणमपि लोकोपचारात् सिद्धम्" इति। अत्र गदितं त्रिलोचनदासेन कातन्त्रवृत्तिपञ्जिकायाम् "... एते हि संज्ञाशब्दा वृक्षादिवत् लोके विशिष्टविषयतया प्रसिद्धाः ...तस्मात् यस्तु लोकतः सिद्धस्तत्र किं यत्नेनेति। यदि संज्ञाशब्दानामप्यमीषां प्रकृतिप्रत्ययविभागोपलम्भात् यथाकथञ्चिदवश्यं कार्या व्युत्पत्तिः तदा "वर्णागमो वर्णविपर्ययश्चे"ति लोकत एव वेदितव्यम्" इति।

## सिद्धान्तः

अस्मादालोचनाद् वयमस्मिन् सिद्धान्ते उपनीता यत् पाणिनिसम्प्रदायस्य निपातनसिद्धशब्दा अपाणिनीयवैयाकरणैः कदाचिन्नाङ्गीकृत्य तेषां सूत्रप्रत्ययेन भिन्नेन प्रकारेण निपातनविहितशब्दानां गतार्थता प्रदर्शिता। कदाचिद्वा अपाणिनीयसम्प्रदायस्य वैयाकरणाः पाणिनीयप्रभावेण प्रभाविताः सन्तः पाणिनिसम्प्रदायस्य निपातनं नतमस्तका उरसीकुर्वन्तीति अलं पल्लवितेन।

☆ ☆ ☆

### सन्दर्भग्रन्थसूची

१. गिरिधरशर्मा, परमेश्वरानन्दशर्मा (सम्पा.). (२००१). भट्टोजीदीक्षितविरचिता वैयाकरणसिद्धान्तकौमुदी. वाराणसी. मोतीलाल बनारसीदासः।

२. भार्गवशास्त्रिजोशी(सम्पा.). (२०११). पतञ्जलिकृतं महाभाष्यम् (प्रदीपोद्योतसहितम्). दिल्ली. चौखम्बासंस्कृतप्रतिष्ठानम्।

# राजयोगविमर्शः

केशवमिश्रः*

## ०. भूमिका

सर्वप्रथमम् इयं जिज्ञासा जायते को नाम योग इति। तस्योत्तरं भवति योजयन्तीति योगाः। अस्य ज्ञानं जातकशास्त्रान्तर्गतं भवति। योगस्य व्युत्पत्त्यनुसारं शरीरिणां सर्वविधप्रारब्धकर्मसु शुभाशुभफलयोजनमेव योगः। यथोक्तं प्रश्नमार्गकारेण–

ग्रहाणां स्थितिभेदेन पुरुषं योजयन्ति हि।
फलैः कर्मसमुद्भूतैरिति योगाः प्रकीर्तिताः॥[१]

ज्यौतिषशास्त्रस्य जातकग्रन्थेषु राजयोगस्य वर्णनं वर्तते। योगैरेव मातृपितृपुत्रजायाभृत्यादिकस्य सुखमपि निर्धार्यते। वस्तुतो विलक्षणोऽयं ग्रहयोगविज्ञानप्रकारः। अयं प्रकार एवास्य ज्योतिषशास्त्रस्य मूलमिति प्रायः सर्वैर्होराशास्त्रविचक्षणैरनुसन्धानस्य विविधप्रकारेण अस्य पल्लवनं विहितम्। यतो हि ग्रहाणां योगायोगेन फलकथनमेव फलितज्यौतिषशास्त्रस्य तत्त्वम्। तथा च–
ग्रहाधीनो भवेद्योगो योगाधीनं फलं यतः।[२]

## १. योगलक्षणम्

जातकानां जन्मकाले आकाशे भ्रमतां रव्यादिग्रहाणां तत्कालिकस्थितिभेदेन योगप्रकारा निर्धार्यन्ते जन्मचक्रानुसारेण। अर्थाद् जन्मकुण्डल्यां ग्रहाणां केचिद् योगाः, जातकोऽयं कस्मिन् समये भाग्योदयमुपयास्यति, शरीरसौख्यं पूर्णं न वेति, कदा राजा भविष्यति, भविष्यति चेद् अयं राजा दरिद्रो वा पण्डितो मूर्खो वा दुर्बलः सबलो वेति भविष्यति इत्यादितथ्यानि विविधप्रकारेण निरूपयन्ति दैवज्ञाः। प्रायः शास्त्रेऽस्मिन् सप्तप्रकारकसम्बन्धैः योगाः भवन्ति। तद्यथा–

स्थानतो भावतः खेटैः स्थानभावनभश्चरैः।

---

*अतिथि-अध्यापकः, ज्योतिषविभागे, वेदवेदाङ्गसङ्कायस्य, आन्ध्रप्रदेशेषु तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य

[१]प्रश्नमार्गे ९/४८

[२]भावप्रकाशे ६/१

स्थानभावसमायोगाद् भावखेचरयोगतः॥[3]

(१) स्थानसम्बन्धेन (२) भावसम्बन्धेन (३) ग्रहयोगसम्बन्धेन (४) स्थान-भाव-ग्रहाणां सम्बन्धेन (५) स्थान-भावयोः सम्बन्धेन (६) भावानां ग्रहाणां च मिथः सम्बन्धेन (७) राशिग्रहाभ्यां च सम्बन्धेन।

एवं सप्तविधसम्बन्धेन जातकस्य शुभाशुभयोगानां विचारः क्रियते। तत्रापि शुभाशुभभेदेन योगाः द्विविधाः।

(१)**शुभयोगाः**–लक्ष्मीयोगः, वाहनयोगः, राजयोगः, महापुरुषयोगः, नाभसयोग इत्यादयः।

(२)**अशुभयोगाः**–अरिष्टयोगः, बालारिष्टयोगः, मृत्युयोग इत्यादयः।

तत्र शुभयोगेषु विशिष्टः भवति राजयोगः। वस्तुतो जन्मचक्रे अत्युत्कृष्टग्रहस्थित्या योगेन वा राजयोगः सम्भवति। राजयोगजाताः जातकाः धनिनः, राजानः, श्रेष्ठाः, प्रभावशालिनः, लोकप्रियाः, प्रसिद्धाश्च भवन्ति।

एतादृशयोगविज्ञाने अधउल्लिखितानां प्रकाराणां ज्ञानमावश्यकम्। तेनैव योगानां बलाबलत्वं विज्ञायते। तद्यथा–

(अ) ग्रहयोगोऽनेकग्रहाणां योगेनैव भवति न चैकेन ग्रहेणेति।

(आ) ग्रहाणां शुभाशुभत्वमपि द्विधा ज्ञायते। स्वभाविकं शुभत्वमशुभत्वं वा। भावराशिग्रहयोगानुरूपमप्राकृतिकं शुभत्वमशुभत्वं वा।

(इ) समत्वमर्थान्न शुभत्वं न अशुभत्वमित्येवं तृतीयो भेदोऽपि स्वतोऽङ्गीक्रियते।

(१) स्वाभाविकशुभग्रहाः– गुरुशुक्रौ, शुभग्रहसंयुतो बुधः, अक्षीणश्च चन्द्रमाः स्वाभाविकाः शुभग्रहाः इति।

(२) अप्राकृतिकं शुभत्वम्– त्रिकोणनेतारः [4], केन्द्रपतयश्च [5] स्वाभाविकाः क्रूरा अपि (क्षीणचन्द्रः पापग्रहयुतो बुधो गुरुशुक्रौ च) शुभा भवन्ति।

(३) अस्वाभाविकम् अशुभत्वम्– शुभास्त्रिषडायेशाश्च सर्वे ग्रहा (शुभा अशुभा वा) अशुभा एव भवन्ति।

(४) समग्रहाः– द्वितीयद्वादशभावाधिपौ समौ अर्थात् योगानुरूपं शुभाशुभं प्रयच्छतः। अष्टमभावाधिपतिरपि मध्यमः।

इत्थं राशिभावनिरूपणपुरःसरं समेषां ग्रहाणां महर्षिणा पृथक्त्वेन शुभाशुभत्वं

---

[3]प्रश्नमार्गे ९/४९

[4]लग्नपञ्चमनवमभावाः त्रिकोणपदेनाभिधीयन्ते

[5]प्रथमचतुर्थसप्तमदशमाः भावाः केन्द्रपदेनाभिधीयन्ते

निरूपितम्। फलप्रदर्शने योगज्ञाने च अस्य ज्ञानं सुतरामनिवार्यम्।

राजयोगवर्णने नाभसयोगः विशेषेण वर्णितः जातकशास्त्रे। नाभसशब्दस्य नभसः अयं नाभस इति व्युत्पत्तिर्दृश्यते। तेन नाभसशब्दस्य दिव्यत्वमनुमीयते। नाभसयोगः दिव्ययोग इति। पूर्वजन्मशुभफलभोगानुसारमत्र मानुषे जन्मनि चैषु नाभसयोगेषु दिव्यशक्तिप्रसादेन जन्मप्राप्तिर्विद्यते। अत एते विशेष-शुभफलप्राप्तिप्रदाः ग्रहयोगाः नाभसयोगशब्देनाङ्गीकृताः सन्ति। एषां सङ्ख्या अष्टादशशतमस्ति। तत्र मुख्या द्वात्रिंशत्संख्याकाः सन्ति। एषु त्रय आश्रययोगाः, द्वौ दलयोगौ, विंशतिसङ्ख्याका आकृतियोगाः, सप्त सङ्ख्यायोगा उपलभ्यन्ते। अनेनैषां चतुर्विधत्वं सुस्पष्टम्। एषां नाभसयोगानां वर्णनं बृहज्जातके, सारावल्यां, जातकपारिजातादिग्रन्थेषु उपलभ्यते।

## २. राजयोगः

वराहमिहिरेण बृहज्जातके कथितं यदुच्चस्थैः स्वगृहस्थैः स्वगृहत्रिकोणस्थै-र्बलस्थैस्त्रिभिर्ग्रहै राजवंशभवाः पुरुषाः राजानो भवन्ति, किन्तु यदि जन्मकुण्डल्यामुच्चस्थाः स्वगृहत्रिकोणस्था वा पञ्चग्रहाः स्युस्तर्हि भूपतिभिन्ना अन्यवंशीयाः हीनवित्तयुता अपि पुरुषाः राजपदम् अलङ्कुर्वन्ति तद्यथा–

> उच्चस्वत्रिकोणगैर्बलस्थैस्-
> त्र्याद्यैर्भूपतिवंशजा नरेन्द्राः।
> पञ्चादिभिरन्यवंशजाता हीनैर्-
> वित्तयुता न भूमिपालाः॥[६]

जातकाभरणेऽपि श्रीढुण्ढिराजेन राजयोगाध्याये कथितं यद् यस्य जन्मनि पञ्चग्रहा उच्चस्था भवन्ति, स सार्वभौमो राजा भवितुमर्हति, तुङ्गस्थैस्त्रिभिर्ग्रहै राजवंशीयो राजा, अन्यवंशीयो जातको मन्त्री भवति यथा–

> नभश्चराः पञ्च निजोच्चसंस्था
> यस्य प्रसूतौ स तु सार्वभौमः।
> त्रयः स्वतुङ्गादिगताः स राजा
> राजात्मजस्त्वन्यसुतोऽत्र मन्त्री॥[७]

[६]बृहज्जातके ११/१३

[७]जातकाभरणे राजयोगाध्याये ३

## २.१.केन्द्रत्रिकोणसम्बन्धे राजयोगः

त्रिकोणत्रयं लक्ष्मीस्थानं केन्द्रचतुष्टयं विष्णुस्थानम् इति प्रोक्तम्। अनयोः परस्परसम्बन्धेन विशेषराजयोगो भवति। तत्रापि चतुर्थपञ्चमयोर्नवमदशमयोर्योगे विशेषराजयोग इति। केन्द्रपञ्चमयोर्योगेनामात्ययोगः। यदि द्वौ केन्द्रपञ्चमेशौ पारिजातादिवर्गगौ स्यातां तदा राजयोगस्य प्राबल्यं भवति। नवमेशदशमेशयोगे राजवन्दितो राजा भवति। यदि दशमेशश्च नवमस्थः स्यात्तथा नवमेशश्च दशमस्थो भवेदथवा द्वावेवैकस्थौ भवेतामथ वा परस्परं दृष्टौ वान्यतरदृष्टिसम्बन्धयुक्तौ वा स्यातां तदापि महान् राजयोगः। यदि एतौ द्वौ पारिजातवर्गगौ भवेतां तर्हि राजा लोकानुशिक्षको भवति। उत्तमवर्गगौ स्यातां तर्हि राजा हस्तिघोटकरथादियुतो भवति। अतः बहूनि प्रमाणानि उपलभ्यन्ते राजयोगानां महाराजयोगानां च। अत्र लघुपाराशर्यामुक्तम्–

केन्द्रत्रिकोणपतयः सम्बन्धेन परस्परम्।
इतरैः प्रसक्ताश्चेद् विशेषफलदायकाः॥[८]

अर्थात् केन्द्र-त्रिकोणधिपत्योः परस्परसम्बन्ध एव अधिकफलप्रदः स्यात्। स योगः अर्थात् कुण्डल्यां मुख्यरूपेण केन्द्रत्रिकोणभावा एव शुभाः भवन्ति। अतः अनयोः परस्परसम्बन्धेन राजयोगः भवति। तत्रापि पञ्चमहापुरुषयोगाः प्रसिद्धाः सन्ति। एतेषु योगेषु उत्पन्नाः जातका अवश्यं राजा महाराजसमो वा जायते। दैवज्ञाभरणग्रन्थे राजयोगा इत्थं कथितम्–

कर्मलग्नाधिनेतारावन्योन्याश्रयसंस्थितौ।
राजयोगाविति प्रोक्तौ विख्यातो विजयी भवेत्॥[९]

अपि च–

कर्मस्थानाधिपे केन्द्रे कोणे लाभे स्थिते यदि।
धने वा स्वोच्चगे वापि राजयोगं करोति सः॥[१०]
लग्ने शुक्रो बुधो यस्य केन्द्रे यस्य बृहस्पतिः।
दशमेऽङ्गारको यस्य स जातः पृथिवीपतिः॥[११]

कदा अस्य योगस्य सम्भवः कदा च फलप्राप्तिः इति विषये किञ्चिद् विविच्यते।

---

[८]लघुपाराशर्यां ३/१

[९]दैवज्ञाभरणे ५३

[१०]तत्रैव ५५

[११]तत्रैव १४

## २.२. पञ्चमहापुरुषप्रभृतयो राजयोगाः

कुजादिपञ्चताराग्रहवशात् क्रमेण पञ्चमहापुरुषयोगाः भवन्ति। ते च रुचक-भद्र-हंस-मालव्य-शशाः। ग्रहस्थितिवशात् फलं कथं निर्धार्यते इति अत्रोच्यते। यदि कुजादिपञ्चताराग्रहेषु यः कोऽपि ग्रहः स्वोच्चस्थाने अथवा स्वक्षेत्रे भूत्वा लग्नात् केन्द्रे भवति तर्हि तत्तद्ग्रहवशाद् महापुरुषयोगाः सम्भवन्ति। अर्थात् कुजेन रुचकयोगः, बुधेन भद्रयोगः, गुरुणा हंसयोगः, शुक्रेण मालव्ययोगः, शनिना शशयोगः संभवति। यथोक्तं ग्रन्थे–

मूलत्रिकोणनिजतुङ्गगृहोपयाता
भौमज्ञजीवसितभानुसुता बलिष्ठाः।
केन्द्रस्थिता यदि तदा रुचभद्रहंस-
मालव्यचारुशशयोगकरा भवन्ति॥[१२]

स्पष्टतायै अधः चक्रं लिख्यते–

| क्रमः | ग्रहः | योगः | राशिः |
|---|---|---|---|
| १. | भौमेन | रुचकमहापुरुषयोगः | मेषः, वृश्चिकः, मकरः च |
| २. | बुधेन | भद्रमहापुरुषयोगः | कन्या, मिथुनाः, कन्या च |
| ३. | गुरुणा | हंसमहापुरुषयोगः | मीनः, धनुः, कर्कश्च |
| ४. | शुक्रेण | मालव्यमहापुरुषयोगः | तुला, वृषः, मीनाः च |
| ५. | शनिना | शशमहापुरुषयोगः | तुला, मकरः, कुम्भश्च |

वस्तुतः पञ्चमहापुरुषयोगजातः जातकः राजसदृशमेव भाग्यं प्राप्नोति। प्रायः अयं पञ्चमहापुरुषयोगानां लक्षणानि प्रत्येकं फलितग्रन्थेषु दृश्यन्ते एव। यथा बृहत्पराशर-फलदीपिका-बृहत्संहिता-मानसागरी-सारावली-जातकभरणादिषु एतानि लक्षणानि वर्णितानि सन्ति।

## २.३. सुनफादयः योगः

एवमेव सुनफा, अनफा, दुरुधरादयो योगा अपि राजयोगसंज्ञकाः। यथा–

हित्वार्कं सुनफानफादुरुधराः स्वान्त्योभयस्थैर्ग्रहैः
शीतांशाः कथितोऽन्यथा तु बहुभिः केमद्रुमोऽन्यैस्त्वसौ।

[१२]जातकपारिजाते ७/४९

केन्द्रे शीतकरेऽथवा ग्रहयुते केमद्रुमो नेष्यते
केचित्केन्द्रनवांशकेषु च वदन्त्युक्तिप्रसिद्धा न ते॥[१३]

चन्द्राद् द्वितीये स्थाने सूर्यं विहाय पञ्चग्रहाः तिष्ठन्ति चेत् सुनफा। चन्द्राद् द्वादशे सूर्यं विहाय पञ्चताराग्रहाः तिष्ठन्ति चेद् अनफा। चन्द्राद् द्वितीये द्वादशे यदि ग्रहाः चेत् सूर्यं विहाय तदा दुरुधरायोगः।

रविं विना विधोर्वित्तरिष्फोभयगतैर्ग्रहैः।
सुनफा चानफायोगः क्रमाद् दुरुधराभिधः॥[१४]

दुरुधराफलं यथा–

द्रविणवाहनबन्धुवसुन्धरासुकयुतं सततं कुरुते नृपम्।
दुरुधरातितरा जितवैरिणं सुनयनानयनाञ्चललालसम्॥[१५]

## २.४. गजकेसरिराजयोगाः

गजकेसरिसंज्ञको महान् योगः कश्चन। तस्य भेदद्वयमस्ति।

१. चन्द्राद्यदि बृहस्पतिः केन्द्रे स्यात्तदा गजकेसरी योगः। तस्य योगस्य फलमपि कथितं–

केसरीव रिपुवर्गनिहन्ता प्रौढवाक् सदसि राजसवृत्तिः।
दीर्घजीव्यतियशाः पटुबुद्धिस्तेजसा जयति केसरियोगे॥[१६]

२. यदि गुरुशुक्रबुधा नीचङ्गता अस्तमिताश्च वा न भवेयुस्तैश्चन्द्रश्च दृष्टः स्यात्तदापि गजकेसरिनामको योगः।[१७]

लग्नाच्चन्द्राद्वा यदि केन्द्रे शुभग्रहदृष्टो युतो वा भवेत्तथा स च नीचास्तङ्गतः शत्रुदृष्टश्च न स्यात्तदा गजकेशरी योगः[१८]। परन्त्वत्र मुम्बैसंस्करणस्यैव लक्षणमुचितम्। अस्यैव लक्षणस्य जातकपारिजातादिग्रन्थेषु समुल्लेखात्।[१९]

अत्रोत्पन्नो नरो मेधावी तेजस्वी गुणसम्पन्नो राजप्रियकरो धनवान् च भवति। एवमेव पारिजातादयो राजयोगाः ग्रन्थेषु उपलभ्यन्ते।

---

[१३]बृहज्जातके १३/३

[१४]बृहत्पाराशरहोराशास्त्रे ३८/७

[१५]जातकाभरणे चन्द्रगोलाध्याये ५

[१६]फलदीपिकायाम् ६/१६

[१७]बृहत्पाराशरहोराशास्त्रे, मुम्बैसंस्करणे २२/१-२ अत्र काशीसंस्करणे भेदो दृश्यते।

[१८]तत्रैव काशीसंस्करणे ३६/३

[१९]जातकपारिजाते ७/११३

दृष्टियोगमधिकृत्य राजयोगबलम् इत्थम्–
१. पूर्णदृष्टौ सति पूर्णयोगोऽर्द्धदृष्टौ सति चार्द्धयोगः पाददृष्टौ तु पादयोगो राजयोगो भवतीति भावः।
२. लग्नसप्तमस्थानयोरपि विशेष उक्तः। लग्नसप्तमयोर्ग्रहः राजयोगप्रदः। अस्य नवांशद्रेष्काणलग्नयोरपि विचारो विधेयः। तत्रापि लग्नसप्तमसम्बन्धवैशिष्ट्यं राजयोगप्रदम्। अस्य स्वोच्चादिकस्थत्वे त्वन्यदपि महत्त्वमिति।
३. राशिहोराद्रेष्काणनवांशत्रिंशांशेष्वेतेषु षड्वर्गबलद्योतकलग्ना यद्येकेनैव ग्रहेण दृष्टाः युताः वा भवेयुः तदा राजयोगो जायते।
४. लग्नं पश्यन्तः सर्वे ग्रहाः शुभफलप्रदा। यदि नीचग्रहोऽपि लग्नस्थो लग्नं वा पश्येत्तर्हि राजयोग उच्यते।
५. लग्ने द्वितीये च शुभग्रहयुते, तृतीये च पापान्विते, चतुर्थे च शुभग्रहाश्रिते नरो राजा वा तत्समो जायते।
६. चन्द्रगुरुशुक्रान्यतम एकोऽपि ग्रहः स्वोच्चस्थो द्वितीयभावगश्च स्यात्तदा राजयोगो वाच्यः।
७. केन्द्रेषु शुभग्रहेषु तृतीयषष्ठैकादशेषु च पापेषु हीनवंशजोऽपि राजा भवति।

यदि ग्रहत्रयमुच्चस्थं जन्मकाले स्यादथवा ग्रहाणां चतुष्टयं पञ्चकं वा स्वोच्चत्रिकोणगं भवेत्तदाप हीनवंशजोऽपि राजा भवति। यदि ग्रहाणां षट्कमुच्चस्थं स्यात्तदा चक्रवर्ती राजा भवति।

एवं प्रकारेण दृष्टयोगाः ग्रन्थेषु विराजन्ते। विषयेऽस्मिन् रामायणोक्तम् एकं प्रसिद्धम् उदाहरणम् अत्र प्रस्तूयते। रामस्य जन्म चैत्रमासे शुक्लपक्षे नवम्यां तिथौ पुनर्वसुनक्षत्रेऽभूत्। तस्मिन् काले कर्कलग्नमासीत्। पञ्चग्रहा उच्चस्था आसन्। चन्द्रेण सह बृहस्पतिः लग्ने वर्तते स्म।

ततश्च द्वादशे मासे चैत्रे नावमिके तिथौ॥
नक्षत्रेऽदितिदैवत्ये स्वोच्चसंस्थेषु पञ्चसु।
ग्रहेषु कर्कटे लग्ने वाक्पताविन्दुना सह॥
प्रोद्यमाने जगन्नाथं सर्वलोकनमस्कृतम्।
कौसल्याऽजनयद् रामं दिव्यलक्षणसंयुतम्॥[२०]

अत्र पञ्चग्रहाः रविभौमशनिगुरुशुक्राः क्रमेण मेषमकरतुलाकर्कमीनराशिषु उच्चस्था आसन्। चन्द्रः स्वगृहे कर्कराशौ वर्तते स्म। यथोक्तं तिलकव्याख्याने

[२०]रामायणे बालकाण्डे १८/८-१०

रविभौमशनिगुरुशुक्राः यथाक्रमं मेषमकरतुलाकर्कमीनेषु उच्चस्थाः। सचन्द्रगुरुः कर्कलग्ने प्रोद्यमाने जातकः रामतुल्यो राजा भवति।[२१]

पञ्चग्रहाणामुच्चस्थित्या प्रबलराजयोगत्वात् अत्र चत्वारोऽपि भ्रातरः राज्यलक्ष्म्या संयुक्ताः जाताः। यथोक्तं फलदीपिकायाम्–

त्र्याद्यैः खेटैः स्वोच्चगैः केन्द्रसंस्थैः स्वर्क्षस्थैर्वा भूपतिः स्यात्प्रसिद्धः।
पञ्चाद्यैस्तैरन्यवंशप्रसूतोऽप्युर्वीनाथो वारणाश्वौघयुक्तः॥[२२]

अपि च भरतस्य जन्म पुष्यनक्षत्रे मीनलग्ने चाऽभवत्। आश्लेषानक्षत्रे कर्कलग्ने एवञ्च उच्चस्थिते सूर्ये लक्ष्मणशत्रुघ्नौ जातौ। यथोक्तम्–

पुष्ये जातस्तु भरतो मीनलग्ने प्रसन्नधीः।
सार्पे जातौ तु सौमित्री कुलीरेऽभ्युदिते रवौ॥[२३]

अत्रापि ग्रहाणामुच्चत्वं दृश्यते। वराहमिहिराचार्यकृतबृहज्जातकग्रन्थस्य टीकायां भट्टोत्पलेन स्वल्पजातकस्य वचनम् इत्थम् उपस्थापितम्–

त्रिप्रभृतिभिरुच्चस्थैर्नृपवंशभवा भवन्ति राजानः।
पञ्चादिभिरन्यकुलोद्भवाश्च तद्वत्त्रिकोणगतैः॥[२४]

इयं भूमिः वीरप्रसूः। सा प्रजापालनाय देशवृद्धये च न केवलं वीरपुराषान् जनयति अपि तु वीराङ्गना अपि प्रसूते। जातकशास्त्रेऽपि न केवलं पुरुषाणाम् अपि तु स्त्रीणां च राजयोगा वर्ण्यन्ते। तद्यथा–

राजामात्यवराङ्गना यदि शुभे कामं गते कन्यका।
मारस्थे तु शुभत्रये गुणवती राज्ञी भवेद् भूपतेः॥
चन्द्रादस्तगृहोपगः शुभकरो राज्यास्पदं यच्छति॥[२५]

## २.५. स्त्रीणां राजयोगफलम्

इमे राजयोगाः रमणीनां कृते चक्रवर्त्तिगृहिणीपदं प्रयच्छन्ति। यथा–

जङ्घे रम्भोपमे यस्या रोमहीने च वर्तुले।
मांसले च समे स्निग्धे राज्ञी सा भवति ध्रुवम्॥

---

[२१]तत्रैव तिलकव्याख्यानम्

[२२]फलदीपिकायाम् ७/१

[२३]रामायणे बालकाण्डे १८/१५

[२४]बृहज्जातकस्य भट्टोत्पलटीकायाम्

[२५]जातकपारिजाते १६/३४

एकरोमा प्रिया राज्ञो द्विरोमा सौख्यभागिनी॥[२६]

अस्यामाशयः यासां रमणीनां जङ्घे रोमरहिते कदलीस्तम्भोपमवर्तुले च वर्तेते तत्र जङ्घयोः मांसलता स्निग्धता समताऽपि यदि स्यात् तर्हि सा स्त्री निश्चितमेव राज्ञी भवति। यासां युवतीनां करे पाणितले वा मत्स्यस्वस्तिकवेदिकाव्यजनकशङ्खातपत्रकमलचिह्नं वर्तते ताः अपि राज्ञ्यः भवितुमर्हन्ति।

मत्स्यस्वस्तिकवेदिकाव्यजनकैः शङ्खातपत्राम्बुजैः।
पादे पाणितलेऽथवा युवतयो गच्छन्ति राज्ञीपदम्॥[२७]

सामुद्रिकशास्त्रेऽपि रमणीनामङ्गलक्षणवशाद् राजयोगः विचार्यते। सामुद्रिकरहस्ये चक्रवर्त्तिस्त्रीणां लक्षणम् इत्थं प्रोक्तम्–

चक्रवर्त्तिस्त्रियाः पाणौ नद्यावर्तप्रदक्षिणः।
शङ्खातपत्रकूर्मा नृपमातृत्वसूचकाः॥[२८]

यासां स्त्रीणां बालिकानां वा पाणौ दक्षिणावर्त्तमण्डलचिह्नं स्यात् ताः चक्रवर्त्तिनः राज्ञः स्त्रियः भवेयुः। यासां करे च शङ्खच्छत्रकूर्मादिचिह्नं स्यात् ताः नार्यः राजमातरः भवन्तीत्युक्तम्।

## २.६. नीचभङ्गराजयोगः

कदाचित् केचन योगाः नीचस्थितस्य ग्रहस्य अशुभफलप्रदत्वं नाशयन्ति। इमे योगा नीचभङ्गराजयोगाः कथ्यन्ते। यथा कुण्डल्यां यः ग्रहः नीचस्थः वर्तते स यं राशिम् अधितिष्ठति तस्य राशेः अधिपतिः अथवा नीचस्थग्रहस्य उच्चक्षेत्रस्य अधिपतिः यदि कुण्डल्यां चन्द्राधिष्ठितराशेः केन्द्रे वर्तते तदा नीचत्वं तस्य ग्रहस्य भज्यते। तद्यथा–

नीचस्थितो जन्मनि यो ग्रहश्च
तद्राशिनाथश्च तदुच्चनाथः।
स चन्द्रलग्नाद्यदि केन्द्रवर्ती
राजा भवेद्धार्मिकचक्रवर्ती॥[२९]

---

[२६]भावकुतूहले १०/१८-१९

[२७]बृहत्संहितायां ७०/१०

[२८]सामुद्रिकरहस्ये प्रमादलक्षणे २५

[२९]सर्वार्थचिन्तामणिः ९/१३

## ४. राजभङ्गयोगाः

यदा प्राचीनाचार्यैं राजयोगाः वर्णिताः तथैव राजभङ्गयोगा अपि कृताः। यथा–

कर्मस्थानाधिपे षष्ठे व्यये चाष्टमसंयुते।
नीचे वा शत्रुगे वापि राजयोगस्य भङ्गदः॥
कर्मस्थानाधिपे यस्य तृतीये पापसंयुते।
पापखेचरसम्बन्धे राजयोगस्य भङ्गदः॥
धर्मकर्मसमाधीशौ नीचे वा पापसंयुतौ।
तावुभौ रिपुणा दृष्टौ राजभङ्गस्तदा भवेत्॥[30]

योगनिरूपणे ग्रहयोगानां बलाबलत्वं द्रष्टव्यम् अर्थात् शास्त्रोक्तषड्बलचेष्टाबलरश्मिबलानामपि विचारो विधेयस्ततश्च राजयोगादीनां बलाबलत्वंनिरीक्षणपुरस्सरं यः फलादेशः क्रियते स बलीयान् भवतीति स्पष्टम्।

## ५. उपसंहारः

अनेनेदं सिध्यति यत् प्राचीनकालाद् एव राजयोगानां नाभसादियोगानाञ्च चर्चा त्रिस्कन्धज्यौतिषे प्रचलति यत्र गर्गपराशरजैमिन्यादयः महर्षयः मूर्धन्यरूपेण गण्यन्ते। पौरुषेषु वराहमिहिरस्यैव प्रमुखत्वम्। तेन न केवलं बृहज्जातके राजयोगादीनां योगानां चर्चा कृता अपि तु संहिताग्रन्थे बृहत्संहितायामपि पञ्चमहापुरुषयोगानां जातकयोगानामुल्लेखो विस्तरेण फलकथनपूर्वको विहितः। बृहज्जातकेऽपि एकादशात् चतुर्दशं यावद् अध्यायाः क्रमेण राजयोगनाभसयोगचन्द्रयोगद्विग्रहयोगनाम्ना दृश्यन्ते।

सारावल्यामपि कल्याणवर्मणा त्रयोदश-चतुर्दश-एकविंश-पञ्चत्रिंश-सप्तत्रिंश-नवत्रिंशा अध्यायाः चन्द्रयोगसूर्ययोगनाभस-योग-राजयोग-पञ्चमहापुरुषयोग-राजयोगभङ्गनाम्नाऽङ्किताः सन्ति।

जातकपारिजाते वैद्यनाथाचार्यमहोदयेन सप्तमेऽध्याये राजयोगनामके सर्वेषां नाभसचान्द्रसौरादियोगानां विशदं वर्णनं कृतमस्ति।

सर्वार्थचिन्तामणिकारेण वेङ्कटेशेन नवमोऽध्यायो राजयोगनाम्नाऽङ्कितः। एवमेव जातकादेशमार्गदैवज्ञाभरणादिग्रन्थेष्वपि विद्यते। फलितज्योतिष-विवेचनात्मके बृहत्पराशरसमीक्षानामके ग्रन्थे अन्यदपि वैशिष्ट्यं कथितम्। यदीमे

---

[30] दैवज्ञाभरणे ६८-७०

राजयोगा कलौ विप्राणां भवेयुस्तदा तेषां राजशासनादिकं न भवति। केवलं ते विप्राः यज्ञयागकर्मनिष्ठाः सन्तः श्रीधनैर्युक्ताः भवन्ति। शूद्रादयो म्लेच्छधर्मिणश्च राजयोगेषु सत्सु राजयोगयुक्ताः कलियुगे भवन्ति। यथा–

शूद्रादयः कलौ राजधर्मिणो म्लेच्छधर्मिणः।
विप्राश्चेच्छ्रीधनैर्युक्ता यज्ञकर्मक्रिया रताः॥[३१]

अत्र राजयोगान्तमभिप्रायोऽपि ज्योतिषरत्नाकरकारेणैवं लिखितम्। यद्राजयोगस्य नृपस्योपाधिरिति। अपि राजयोगस्य अयम् अभिप्रायः यद् राजयोगयुक्तो मनुष्यः स्वजीवने सांसारिकसुखद्रव्यादिविषये साफल्यम् उपयास्यतीति। साफल्यस्यापि न्यूनाधिक्यं ग्रहाणां बलाबलाश्रितमिति भावः।

☆ ☆ ☆

## उपयुक्तग्रन्थसूची

१. झा, सीतारामः (सम्पा.). (२००१). वराहमिहिराचार्यविरचितं बृहज्जातकम्. वाराणसी. ज्योतिष प्रकाशन।

[३१]बृहत्पाराशरहोराशास्त्रे उत्तरभागे ४/४१

# महामायास्वरूपम्

दिलीपपण्डा*

प्रबन्धसारः

पुरो दृश्यमानं जगदिदं केनचित् सृष्टमिति सुतरामेव भवति प्रमाणितम्। साक्षादीश्वर एव जगत्स्रष्टा। स एव क्वचित् पुरुषः क्वचिच्च नारीति तन्माहात्म्यम्। नारीरूपेण संस्तूयमाना सा आद्याशक्तिर्महामायेति वर्ण्यते। सा हेतुः समस्तजगतामित्युच्यते। वैष्णवतन्त्रेऽपि श्रीराधिका श्रीकृष्णस्य ह्लादिनी शक्तिरिति वर्णिता। अतः पूर्ववादिनां मते ईश्वरस्यैव जगत्कारणत्वं, तच्छक्तेः कारणत्वं तूत्तरवादिनां मतम्। परन्त्वैश्वरी या शक्तिस्तथा नारीरूपा तस्य या शक्तिस्तस्याः स्वरूपं किमित्युक्ते प्रकृतिरिति सांख्यविदः, माया ब्रह्मेति वा वेदान्तिन, एवमन्येऽपि प्रस्थानान्तरानुगामिनो विविधं गदन्ति गाधगिरा। अतः सांख्यप्रोक्ता प्रकृतिः किं महामाया उत वेदान्तशास्त्रसम्मता माया एव सेति सत्यामपि विप्रतिपत्यां श्रीमार्कण्डेयपुराणोक्तं सप्तशतीस्तोत्रनामकं देवीमाहात्म्यमाश्रित्यैव तत्स्वरूपं रूप्यते।

कुञ्चीशब्दाः– महामाया, ब्रह्म, शब्दशक्तिः, प्रकृतिः, फलगतिः, विष्णुमाया, देवी।

येयं शक्तिस्वरूपाद्याशक्तिर्महामाया तस्या उल्लेखः साक्षात् श्रुतौ तथा तदाश्रित्य पल्लवितेषु साङ्ख्यादिदर्शनग्रन्थेष्वपि प्राप्यते। क्वचिन्नामैकत्वेपि स्वरूपवैभिन्न्यकथनं न दुर्लभम्। अन्ततः पयसामर्णव इव तत्त्वमद्वैतमेकं वै समागच्छति न वेति विचारपथमवगाहते गूढं तत्स्वरूपम्।

ननु कस्तावद् महामायाशब्दस्यार्थ इति जिज्ञासायां वाचस्पत्यं क्रमति– 'अन्यस्मिन्नन्यधर्मावभासो हि माया। सर्वजगन्मूलत्वादस्या महत्त्वम्। जगत्कारणभूतायामविदायायां तदधिष्ठात्र्यां दुर्गायाञ्च महामाया हरेश्चैषा यया संमोह्यते जगदि'ति। एवं महामायाशब्दस्य दुर्गार्थः कोषग्रन्थान्तरेषूपलभ्यते। शब्दकल्पद्रुमानुसारं महामाया दुर्गा इति शब्दरत्नावली। महती माया चार्थान्तरम्। अस्या मायाया जगत्कारणत्वात् सर्वजगन्मूलत्वाद् महत्वम्। तस्माद् महामाया मायाधीश्वरीति साक्षाद्

*अध्यापकः, संस्कृतविभागे, आरामवाग्-गार्लस्-कलेज इत्यस्य महाविद्यालयस्य

मायेति वा वक्तुं शक्यते। गौर्य्यपर्णाकालीपरमेश्वर्यादीनि तस्या अभिधान्तराणि। अतः साक्षात् तस्यास्तथा तच्छक्तेर्मायाया जगत्कारणत्वं तु प्रमाणितम्।

अस्याः शक्तिरूपाया महामायाया उल्लेखो वेदेषूपलभ्यते। ऋग्वेदीयं देवीसूक्तं, सामवेदीयं रात्रिसूक्तं तत्र प्रमाणतां भजते। 'अम्भृणस्य महर्षेर्दुहिता वाङ्नाम्नी ब्रह्मविदुषी स्वात्मानमस्तौत्। सच्चित्सुखात्मकः सर्वगतः परमात्मा देवता। तेन ह्येषा तादात्म्यमनुभवन्ती सर्वजदग्रूपेण सर्वस्याधिष्ठानत्वेन चाहमेव सर्वं भवामीति स्वात्मानं स्तौति' इति भाष्यवचनम्। विश्वानि भूतजातान्यपि तयैवोत्सृज्यते। "अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा"(ऋग्वेदस्य १०.१२५.८) इति। अतोऽत्र साक्षाद् महामाया एव जगत्कारणत्वेन वर्णिता। परन्तु सा तु नित्या परमात्मस्वरूपा ब्रह्मरूपा वा। प्रथममण्डलस्यास्यवामीयसूक्तेऽपि गौरीत्यभिधा काचित् प्राप्यते। तस्यापि वर्षणकर्तृत्वेन द्विपदादिभूतस्त्रष्टृत्वेन वर्णनं समुपलब्धम्–

गौरिर्मिमाय सलिलानि तक्षत्ये
कपदी द्विपदी सा चतुष्पदी।
अष्टापदी नवपदी बभूवुषी
सहस्राक्षरा परमे व्योमन्॥ (ऋग्वेदस्य १.१६४.४२)

अत्र गौरी गरणशीला माध्यमिका वाक्। केचिच्च 'गौरिगरणशीला-शब्दब्रह्मात्मिका वाक्' इति वदन्तीति ब्रह्मात्मिकायास्तस्या नित्यत्वम्। स्वरूपतोऽभिन्ना ब्रह्मात्मिका सा वाचा निरूप्यते इति रूपवैभिन्न्यमात्रम्।

एवं न केवलं संहिताभागे अपि तु आरण्यकेऽपि अस्या महामायाया उल्लेखः प्राप्यते। तत्रापि देवी महामाया वरदास्मदभीष्टप्रदा। जगत्कारणस्य परमतत्त्वस्य ब्रह्मण उपदेशलाभार्थं तस्याह्वानम्। सा तु च्छन्दोमाता सरस्वती पापहारिणी साक्षाद् ब्रह्ममय्येव। भक्तानुकम्पप्रदानार्थमेव तस्या विग्रहधारणम्। अत आरण्यकानुसारमपि जगत्कारणीभूता महामाया तु ब्रह्मात्मिका नित्येति वक्तुं शक्यते। तथा च मन्त्रः–

आयातु वरदा देवी अक्षरं ब्रह्मसम्मितम्।
गायत्री च्छन्दसां मातेदं ब्रह्म जुषस्व मे॥
यदह्ना कुरुते पापं तदह्नात् प्रतिमुच्यते।
यद्रात्रियां कुरुते पापं तद्रत्रियात् प्रतिमुच्यते॥
सर्ववर्णे महादेवी सन्ध्याविद्ये सनस्वति॥ (तैत्तिरीयारण्यके) इति।

तैत्तिरीयारण्यकस्य याज्ञिकोपनिषद्यपि समाम्नातैका दुर्गागायत्री– कात्यायनाय विद्महे कन्याकुमारि धीमहि। तन्नो दुर्गिः प्रचोदयादिति॥

भाष्यकारस्याचार्स्य सायणस्य मते अभिन्नार्थमेव दुर्गिः दुर्गेति पदद्वयम्। अतोऽत्रापि आद्याशक्तिः महामाया प्राणिनां प्रचोदयित्रीति सङ्कीर्त्यते।

ब्रह्म सत्यं जगन्मिथ्येति उपनिषच्चिन्तनम्। अतोऽन्यस्य कस्यापि तत्त्वतः स्वीकारो न वेदान्तसम्मतः। तस्मात् का कथा महामायाया इति चेत् सामवेदीयकेनोपनिषत् तत्प्रामाण्यं प्रमाणयति। देवासुरयोः सङ्ग्रामे ब्रह्मशक्तिद्वारैव सत्यामपि देवानां विजित्यां स्वशक्तिद्वारैव ते विजितवन्त इत्यासीत्तेषामभिमानः। तदपनोदनाय यदा ब्रह्मणाद्भुतमूर्त्तिमाश्रित्याविर्भूतं तदापगतशक्तिमतोः पवनपावकयोः प्रस्थितयोश्छद्मवेशाश्रितस्येन्द्रस्यागमने प्रस्थानं चकार ब्रह्म। तदेन्द्रोऽवलोकयामास सुशोभनामुमां हैमवतीम्। व्यज्ञापयच्च तेषां देवानां ब्रह्मशक्तिद्वारा विजितिवार्ताम्। अतो ब्रह्मणः शक्तिरेव तेषां विजयकारणम्। अतोऽत्र महामायैव ब्रह्मणः शक्तिर्या उमाहैमवतीरूपेण प्रकाशितेति राद्धान्तः। कृष्णयजुर्वेदस्य तैत्तिरीयारण्यकस्य नारायणोपनिषदि महामाया परमात्मनापि दृष्टा इति वैरोचनीपदेन भणिता। तथा चाम्नातम्–

तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम्।
दुर्गां देवीं शरणमहं प्रपद्ये सुतरसि तरसे नमः॥

किन्तु सा महामाया परमात्मभूता नित्येति विस्मयावहं तत्स्वरूपम्। साङ्ख्यायनगृह्यसूत्रे भद्रकालीरूपेण, हिरण्यकेशीगृह्यसूत्रे भवानीरूपेण, वाजसनेयी-संहितायाञ्च अम्बिकारूपेणाद्याशक्तिर्महामाया समाम्नाता या भक्तजनाभीष्टप्रदा काचित् शक्तिरित्युदीरिता। मुण्डकोपनिषद्यपि कालीकराल्यादीनि विविधान्य-भिधानानि प्राप्यन्ते। परन्तु तान्यग्नेर्लेलिहानजिह्वात्वेन वर्णितानि।

काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा।
स्फुलिङ्गिनी विश्वरुचि च देवी लोलियमाना इति सप्तजिह्वाः॥ इति।

एतासां यद्यपि जगत्कारणत्वं नास्त्याद्याशक्तिवत्तथापि दाहिकाशक्तिस्तु वर्तत एव ययाग्निर्देवेन स्वकीयं कार्यजातं निष्पाद्यत इति तच्छक्तेरेव प्राधान्यम्। सुतसंहितायामपि महामायाया उल्लेखः प्राप्यते। तत्र सा पार्वती परमा इत्युच्यते। सा तु ब्रह्मविद्यारूपिणी। तथा हि उच्यते–

पार्वती परमा विद्या ब्रह्मविद्या प्रदायिनी।
विशेषेणैव जन्तूनां नात्र सन्देहकारणम्॥ इति।

पुराणेषु जगत्कारणत्वेन महामायायाः करणत्वं यथा स्वीक्रियते तद्वत् सांख्यप्रोक्तायाः प्रकृतेरपि कारणत्वं स्वीक्रयते। विषयेऽस्मिन् सत्यमेव दृश्यते पुराणेषु विप्रतिपत्तिः। मत्स्यपुराणे साक्षात् मत्स्येनोच्यते–

सत्त्वं रजस्तमश्चैव गुणत्रयमुदाहृतम्।
साम्यावस्थतिरेतेषां प्रकृतिः परिकीर्तिता॥
केचित् प्रधानमित्याहुरव्यक्तमपरे जगुः।

एतदेव प्रजासृष्टिं करोति विकरोति च॥
गुणेभ्यः क्षोभमाणेभ्यस्त्रयो देवा विजज्ञिरे।
एका मूर्तिस्त्रयो भागा ब्रह्मविष्णुमहेश्वराः॥ इति।

अतः सत्वरजस्तमसां साम्यावस्था एव प्रकृतिरित्युच्यते। प्रकृतिरेवेयं प्रधानमिति केचन निगदन्ति, केषाञ्चिन्नये पुनरियमव्यक्तमित्युच्यते। अस्याः प्रजास्त्रष्ट्रीत्वं संहर्त्रीत्वं च ख्याप्यते। गुणत्रयस्य क्षुब्धायामवस्थायामेव देवत्रयस्याविर्भावो जायते। परन्तु एकस्या व मूर्तेर्ब्रह्मविष्णुमह्श्वररूपेण भागत्रयं भवतीति नूतनं चिन्तनम्। अतो महामायावत् प्रकृतेरपि जगत्कारणत्वात् प्रकृतिरेव महामायेति वक्तुं शक्यते। तस्या एव पुरुषविग्रहाः ब्रह्मादिरूपेण प्रकाशिताः। ब्रह्मवैवर्तपुराणस्य प्रकृतिखण्डेऽपि(२.६६.७–१०) महाशक्तिमूलप्रकृतेरेव विश्वमुत्पन्नं तथा सा एव विश्वप्रपञ्चस्य सारभूता परा सत्तेत्याम्नातम्। परन्त्वग्निपुराणानुसारं जगत्स्रष्टृत्वं संहारकारित्वं स्वीकर्तुं न शक्यते। तत्राग्निरुवाच–

जगत्सर्गादिकं क्रीडां विष्णोर्वक्ष्येऽधुना श्रृणु।
स्वर्गादिकृत्स स्वर्गादिः सृष्ट्यादिः सगुणेऽगुणः॥
ब्रह्माव्यक्तं समग्रेऽभूत्र यं रात्रिदिनादिकम्।
प्रकृतिं पुरुषं विष्णुं प्रविश्याक्षोभयत्ततः॥
स्वर्गकाले महत्तत्त्वमहत्कारस्ततोऽभवत्।
वैकारिकस्तेजसश्च भूतादिश्चैव तामसः॥ (अग्निपुराणस्य १३.१-३)

अतो भगवान् विष्णुरेव सृष्टिस्थितिसंहारकर्मकारको वर्तते। प्रकृत्या निर्गुणत्वेऽपि सर्गकाले सगुणत्वं तस्य सङ्गच्छते एव। उत्पत्तेः प्रागव्यक्तब्रह्मणो विद्यमानत्वाद् वियद्रात्रिदिवसादीनामविद्यमानत्वाच्चोत्पत्तिवेलायां परमपुरुषो विष्णुरेव प्रकृतिं प्रविश्य तां शुशुभे। तदा तस्या महदादीनामुत्पत्तिरभवत्। अतोऽत्र प्रकृतिर्न जगत्कारणं परन्तु पुरुषरूपधारिणो विष्णोरेव तत्कारणत्वं समस्ति, सैव नार्य्यवस्थायां महामायेति कथ्यते, तस्या अपि प्रकृत्या निर्गुणत्वदर्शनादुत्पत्तिदशायां सगुणत्वावलोकनाच्च। कूर्मपुराणे पुनः किञ्चिद्भिन्नं समवलोकितम्। यद्यपि ततिर भगवतो विष्णोरवतारस्य कूर्मस्यैव जगत्संहारकारित्वं, सर्जनकारित्वं परिपालकत्वञ्च कीर्त्यते तथापि तदर्थवादवशादेव। प्रकृत्या साक्षाद् विष्णोरेव तत्तत्कारणत्वं समस्ति। विष्णुशक्तिरेव लोकानां मोहिनी माया। अस्य प्रधानशक्तिरेव विद्येति परिगीयते। योगिजनहृदयस्थया सत्या तयैव विद्यया माया ध्वस्यते। तस्यैव सर्वशक्ति-प्रवर्तकत्वान्निवर्तकत्वादाधारत्वादमृतनिधानत्वाच्च सर्वमध्यस्था सत्स्वरूपा सदधिष्ठात्री काचित् शक्तिर्ब्रह्मणो रूपमाश्रित्य नीडात्मकं विश्वं ससर्ज। अतो विद्यमानेऽपि जगत्कारणे पूर्वोक्ता महती माया न महामाया विद्यया तद्ध्वंसदर्शनात्। अतो महामाया तु परब्रह्म एवेति नित्यत्वं तत्स्वरूपस्य रूपवैभिन्नयन्तूपास्तिमार्गवैभिन्न्यात्। तदुक्तं तत्र–

अहमेव हि संहर्ता संस्रष्टा परिपालकः।
माया हि मामिका शक्तिर्माया लोकविमोहिनी॥
ममैव च पराशक्तिर्या सा विद्येति गीयते।
नाशयामि तया मायां योगिनां हृदि संस्थितः॥
अहं हि सर्वशक्तीनां प्रवर्तकनिवर्त्तकः।
आधारभूतः सर्वासां निधानममृतस्य च॥
एका सर्वान्तरा शक्तिः करोति विविधं जगत्।
आस्थाय ब्रह्मणो रूपं मन्मयी सदधिष्ठाता॥ (कूर्मपुराणस्य ४.१८-१९)

कालिकापुराणे महामायास्वरूपख्यापीनि वचांसि हि–

गर्भान्तर्ज्ञानसम्पन्नं प्रेरितं सूतिमारूतैः।
उत्पन्नं ज्ञानरहितं कुरुते या निरन्तरम्॥
पूर्वातिपूर्वसंस्कारसंयातेन नियोज्य च।
अहरादौ ततो मोहममत्वज्ञानसंशयम्॥
क्रोधोपयोधलोभेषु क्षिप्त्वा क्षिप्त्वा पुनः पुनः।
पश्चात् कामेन संयोज्य चिन्तायुक्तमहर्निशम्॥
आमोदयुक्तं व्यसनासक्तं जन्तुं करोति या।
महामायेति संप्रोक्ता तेन सा जगदीश्वरी॥ (कालिकापुराणस्य १.१-४)

जननीजठरस्थितानां ज्ञानान्तःपूरितानां शिशूनां ज्ञानराहित्यसम्पादनात् पूर्वपूर्वजन्मीयसंस्कारै आबद्धानां जीवानां ज्ञाननाशक्रोधोपरोधलोभादिभिर्मानवानां कामासक्तिं सम्पाद्य चिन्तनामोदव्यसनासक्तिसम्पादनाज्जगदीश्वरी एव महामाया उच्यते। बृहन्नारदीयपुराणे सैव सर्वशक्तिमयी विश्वप्रसविनीति वर्णिता। तस्या एव भारतीगिरिजादीनि विविधानि नामानि–

उमेति केचिदाहुस्तां शक्तिं लक्ष्मीं तथापरे।
भारतीत्यपरे चैनां गिरिजेत्यम्बिकेति च॥
दुर्गेति भद्रकालीति चण्डी माहेश्वरीति च।
कौमारी वैष्णवी चेति वाराहीति तथापरे॥ इति।

देवीभागवतनये सर्वभूतेषु शक्तिरात्मरूपेणैव विराजिता। देवीपुराणानुसारं पुरुषस्तु द्विधः। तयोरेक सच्चिदानन्दः। अपरस्तु पराशक्तिर्माया प्रकृतिर्वा। तथापि प्रकृत्या द्वयोरेव भागयोः अभेद एव प्रतिपादितः। पावकतच्छक्त्योरिव परमपुरुषस्य परमप्रकृतेश्चाभेदः। देवीभागवतनये महामाया तु सच्चिदानन्दरूपिणी पराशक्तिः। अरूपाया अपि तस्या रूपधारणं तूपासककृपावर्षणार्थम्। तदुक्तं देवीभागवते–

सेयं शक्तिर्महामाया सच्चिदानन्दरूपिणी।

रूपं बिभर्त्यरूपा च भक्तानुग्रहहेतवे॥ इति।

अतो ब्रह्मस्वरूपवत् तत्स्वरूपमिति निश्चप्रचमेव। अतः कालिकापुराणोक्ता सा महामाया तु शुद्धा माया तथा मत्स्यपुराणोक्ता प्रकृतिरपि महामायायाः काचित् शक्तिरिति न मतद्वैधं तत्स्वरूपविषयकं सङ्गच्छते। पुनश्चात्र प्रमाणं देवीभागवतीयं वचनम्–

यथा नटो रणं गतो नानारूपो भवत्यसौ।
एकरूपः स्वभावोऽपि लोकरञ्जनहेतवे॥
तथैषा देवकार्यार्थमरूपाणि स्वलीलया।
करोति बहुरूपाणि निर्गुणा सगुणानि च॥ (देवीभागवते ५.८.५८-५९)

अतो नटस्यैकरूपत्वेऽपि लोकरञ्जनार्थं यथा मञ्चमध्ये विविधानि रूपाण्यवलोक्यन्ते तद्वन्निर्गुणा देवी निराकारापि देवकृत्यकरणार्थं विविधं रूपं धारयतीति महामाया ब्रह्म परमात्मा वेति निश्चिता। रुद्रयामलेऽपि महामाया परब्रह्मेति आम्नातम्– "त्वमेका परब्रह्मरूपेण सिद्धा" इति।

साङ्ख्ययोगन्यायवैशेषिकादिदर्शनेष्वपि जगत्कारणत्वं कस्याश्चित् स्वीकृतमेव। साङ्ख्यनये प्रकृतिरेव जगत्कारणत्वेन स्वीकृता। पूर्वन्तु महामायाया अपि जगत्कारणत्वं प्रमाणितम्। तर्हि साङ्ख्यप्रोक्ता प्रकृतिः किं महामायेति चेन्न, साङ्ख्यप्रोक्ता प्रकृतिः स्वतन्त्रा। अतस्तन्नित्यतत्त्वम्। तेषां नये– 'मूले मूलाभावादमूलं मूलमि'ति। साङ्ख्यकारिकायामपीश्वरकृष्णेनाकलितम्– 'मूलप्रकृतिरविकृतिरि'ति। इयमेव प्रकृतिरविद्या माया अव्यक्ता इत्युच्यते। पुराणे सत्यपि प्रकृतेरुल्लेखे न तस्याः स्वातन्त्र्यं स्वीक्रियते। तेषां नये अव्यक्तात् कस्माच्चित् तत्त्वात् प्रकृतिराविर्भूता। शास्त्रपरम्पराक्रमेण पर्य्यालोचनद्वारा ब्रह्मण एवाव्यक्तत्वं सङ्गच्छते, यस्माद् ब्रह्मणः प्रकृतेः पुरुषस्य वाविर्भावः। अतः साङ्ख्यप्रोक्तायाः प्रकृतेर्जगत्कारणत्वे उदीरितेऽपि पुराणवेदान्तादिशास्त्रनये प्रकृतेः कारणं त्वव्यक्तम्। साङ्ख्यनये प्रकृतेः कारणतायां सत्यां कारणस्यापि कारणानुसन्धानेऽनवस्थादोषोऽनिवार्यः। न चोभयोः प्रकृतिमहामाययोस्त्रिगुणात्मकत्वात् प्रकृतिरेव महामायेति शङ्कनीयम्, साङ्ख्ये गुणत्रयस्य साम्यवस्था प्रकृतिरिति कथनात् पुराणे च एकस्या एव प्रकृतेः ब्रह्मविष्णुमहेश्वररूपस्योत्पत्तिदर्शनाच्च। या च पुनः ब्रह्मणः शक्तिर्मायेति उच्यते सा न साङ्ख्यसम्मता। अतः यद्यपि साचेतना तथापि साङ्ख्यनये तस्या एव जगत्कारणत्वं समस्ति, अचेतनस्यापि प्रवृत्तिदर्शनात्–

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य।
पुरुषविमोक्षनिमित्तं यथा प्रवृत्तिः प्रधानस्य॥ (सांख्यकारिका ५७)

इति कथनात्।

वैदान्तिकानां नये इयं महामायैव अनिर्वचनीयानाद्यविद्येति। शाब्दिकानां समीपं सा शब्दशक्तिरिति परिज्ञायते। अथवा परापश्यन्तीमध्यमावैखरीत्येतासु

या सूक्ष्मभूता परा वाक् सा एव महामाया इति निश्चेतुं शक्यते, वाक्सूक्ते तस्या एव परवाचः जगत्कारणत्वदर्शनाद्, वैयाकरणानां नये शब्दब्रह्मात्मिकायास्तस्या एव नित्यत्वप्रतिपादनादनाद्यनुच्चार्यादिसाम्यदर्शनाच्च। मीमांसका यद्यपि कर्मापूर्वोपादानसामान्यलक्षणा फलगतिरेव सा महामायेति निगदन्ति तथापि सम्पूर्णस्य तद्व्यापारस्यानित्यत्वदर्शनाद् महामायायाश्च पुनः सर्वतन्त्रानुसारं नित्यत्वदर्शनादेव तादृशी फलगतिर्न महामायेति व्याकर्तुं शक्यते। तार्किकाणां नये सा वस्तुतत्त्वावसितिसिद्धिभेदा इति कथ्यते। शैवास्तां शिवशक्तिः इति, वैष्णवास्तां विष्णुमाया इति वदन्ति।

एवं सर्वथा विचार्य्यापि तत्स्वरूपं यावत्तन्माहात्म्यप्रतिपादकं चण्डीनामधेयं भुवनविख्यातं बुधजनसमादृतं सप्तशतीशास्त्रं न प्रमाणयति तावन्न तत् स्फुटीभवतीति स्मारं स्मारं तदाश्रयणमेवान्ततः शरणम्। आमूलात् तद्ग्रन्थस्याध्ययनं सम्भवति चेत् तत्स्वरूपं भवति स्फुटम्। शुम्भनिशुम्भ-चण्डमुण्डादिदैत्यदर्पदलनेन तस्या अशुभशक्तिनाशित्वं प्रतिपादितम्। समग्रे प्रपञ्चे विराजमानत्वात् सर्वव्यापित्वमपि तस्या उररीकृतम्। तथा ह्युक्तम्– "आधारभूता जगतस्त्वमेके"ति।

सर्वं खल्विदं ब्रह्म इति वचनाद्यथा ब्रह्मणः सर्वव्यापित्वं तद्वन्महामायाया अपि सर्वव्यापित्वाद् वेदान्तप्रोक्तं ब्रह्म एव महामाया। उक्तञ्च त्रय्याम्– य एतां मायाशक्तिं वेद स मृत्युं जयति, स पाप्मानं तरति, सोऽमृतत्वं च गच्छति इति। अत्र मायाशक्तिपदेन ब्रह्मरूपिणी महामाया एव वर्णिता।

महामाया एव जगत्पतेर्विष्णोर्योगनिद्रा तमःप्रधानाशक्तिर्वा। तथा च भागवते– "विष्णोर्माया भगवती यया सम्मोहितं जगत्" (भागवते १०.१२.५) इति।

तच्छक्तिप्रभावादेव सर्वे जीवा मोहाच्छन्नाः सञ्जाताः। देवी भगवती महामाया विवेकिनामपि बलाच्चित्तमाकृष्य तान् मोहगर्ते पातयति। अपक्वकषाययोगिनामपि सा मोहिकेत्युच्यते। तयैव विसृज्यते इदं पुरोदृश्यमानं जगत्। सैव संसारमुक्तिहेतुभूता परमा ब्रह्मविद्या सनातनी संसारबन्धकारणस्वरूपा विद्या तथा ब्रह्मविषणुमहेश्वरादीनामपीश्वरी। तथापि सप्तशतीमन्त्रः–

सा विद्या परमा मुक्तेर्हेतुभूता सनातनी।
संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरी॥ (दुर्गासप्तशती १.५७-५८) इति।

सा महामाया तु जरामरणरहिता नित्या। सर्वतो दृश्यमानं जगत्प्रपञ्चमिदं तस्या विराण्मूर्तिः। सत्यपि तस्याः सर्वव्यापित्वे नित्यत्वे च देवकार्यसिद्धिनिमित्तं सा उत्पन्नेति उच्यते। अतस्तत्राम्नातम्–

नित्यैव सा जगन्मूर्तिस्तया सर्वमिदं ततम्।
तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम॥
देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा।

उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते॥ (दुर्गासप्तशती १.६४-६५) इति।

महामाययैव जगतः सर्गपालनसंहारादिकृत्स्नं कर्म सम्पाद्यते। तथा चायं मन्त्रः–

त्वयैतद्धार्य्यते सर्वं त्वयैतत्सृज्यते जगत्।

त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा॥ (दुर्गासप्तशती १.७५-७६) इति।

सृष्टिकाले सा सृष्टिशक्तिस्वरूपा पालनकाले स्थितिशक्तिस्वरूपा प्रलयकाले च संहारशक्तिस्वरूपेति कीर्तिता। सा यथा वेदान्तसम्मतमहाकालक्षमा ब्रह्मविद्या तद्वत् संसृतिकर्त्री महामायापि। तस्मात् सा महाविद्या इति महामायेति चोच्यते। सा यथा त्रिगुणात्मिका तथा त्रिगुणातीतापि। केषाञ्चिद् विपश्चितां नये प्रथमचरितस्य देवता तमोगुणप्रधाना महाकाल्येव योगनिद्रा या महामायेति उच्यते। गुप्तवतीमते तु चण्ड्यास्त्रिषु माहात्म्येषु देव्याः स्वरूपत्रयस्य कथनेऽपि तानि एकस्या एव महामायायाः प्रकाशमात्रमित्युद्घोषितम्। तदुक्तं देवीभागवते–

निर्गुणा या सदा नित्या व्यापिकाऽविकृता शिवा।
योगगम्याऽखिलाधारा तुरीया या च संस्थिता॥
तस्यास्तु सात्त्विकी शक्ती राजसी तामसी तथा।
महालक्ष्मीः सरस्वती महाकालीति ताः स्त्रियः॥

(देवीभागवते १.२.१९-२०)

अतः सा यदा निर्गुणा नित्या व्यापिका, अपरिणामिनी, शिवा, या च ध्यानगम्या, विश्वधारा तथा तुरीयरूपेण संस्थिता तस्याः सात्त्विकी, राजसी, तामसी शक्तिरेव महासरस्वती, महालक्ष्मीः, महाकालीति यथाक्रमं चोच्यते। किं बहुना? सा स्वाहामन्त्ररूपा, स्वधामन्त्ररूपा, वषड्मन्त्ररूपा च। एवम् उदात्तादिस्वरस्वरूपमातृरूपा सा अकारोकाररूपमात्रात्रयेणावस्थिता प्रणवरूपा शब्दब्रह्मरूपा च। अतस्तस्याः सर्वमयत्वमपि भवति प्रतिपादितम्।

एवं सर्वत एव विचार्य्य वेदान्तशास्त्रप्रतिपादितेन ब्रह्मणा सह सर्वथा साम्यदर्शनाद् यद् ब्रह्म सा एव महामायेति प्रतिपादयितुं शक्यते। यथा एकस्यैव देवदत्तस्य पचनयाजनागमनादिक्रियाभेदेन पाचकयाजकआगन्तुकादिरूपकरणं तद्वद् ब्रह्मणो महामायाया वा नामकरणं तु विशेषोपासकसम्प्रदायाभीप्सितम्। तथा च श्रुतिः– एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः इति। निरुक्तञ्च निरुक्तकारेण– महाभाग्याद् देवताया एक आत्मा बहुधा स्तूयते इति। तासां महाभाग्यादेकैकस्या अपि बहूनि नामधेयानि भवन्ति इति। तथापि केचन च्छिद्रान्वेषिणोऽतत्त्वज्ञा यदि एवं ब्रूयुर्यद् वेदान्तशास्त्रेषु ब्रह्मण आविर्भावकथनाद् मुखाद्यवयवविशिष्टस्य च कस्यचिद् विग्रहवतोरभावदर्शनात् महामायायाश्च–

ब्रह्मणस्तेजसा पादौ तदङ्गुल्योऽर्कतेजसा।
वसूनाञ्च कराङ्गुल्यः कौवेरेण च नासिका॥

तस्यास्तु दन्ताः सम्भूताः प्राजापत्येन तेजसा।
नयनत्रितयं जज्ञे तथा पावकतेजसा॥
भ्रुवौ च सन्ध्यायास्तेजः श्रवणावनिलस्य च।
अन्येषां चैव देवानां सम्भवस्तेजसा रविः॥ (दुर्गासप्तशती २.१६-१८)

इत्यादिरुत्पत्तितत्त्वज्ञापकैर्मन्त्रैरुत्पत्तिप्रामाण्याद् विनाशसम्भवाच्च न कथमपि ब्रह्मस्वरूपसाम्यं प्रकटीकर्तुं शक्यमिति चेन्न। शुक्रशोणितसंयोगोत्पन्नस्य पाञ्चभौतिकशरीरस्योत्पत्तिविनाशभावत्वेऽप्यात्मन उत्पत्तिविनाशाभावत्वमेव प्रमाणितम्। यथा श्रीकृष्णावतारे दृष्टं यद् व्याधक्षिप्तबाणेन भगवतो मांसमज्जास्थिमयशरीरस्य विनाशेऽपि न तस्य सच्चिदानन्दात्मकस्य नित्यस्य विनाशः। एवं महामायायामपि। तथा च गीतं गीतायां श्रीमता भगवता–

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥ (गीता २.२०)

सशस्त्रविग्रहचिन्तनमपि साकारोपास्तिसौविध्यर्थम्। पुनश्चोच्यते, यथा गीतायां भगवतोद्घोषितं यत्–

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥ (गीता ४.७)

एवं महामाययापि उच्चैः निगदितम्–

इत्थं यदा यदा बाधा दानवोत्था भविष्यति।
तदा तदावतीर्याहं करिष्याम्यरिसंक्षयम्॥ (दुर्गासप्तशती ११.५४-५५)

एवं सर्वथापि तयोरुभयोः साम्यदर्शनात् सा महामाया तु सच्चिदानन्दस्वरूपा इति।

साधकवचनान्यप्यत्र प्रमाणपदवीं भजन्ते। तथा चोक्तं श्रीरामकृष्णभगवत्पादैः यद् ब्रह्म स एव कालीति। अतो महामाया तु साक्षाद् ब्रह्मेति तदीयोक्तिः। साधकोत्तमैः रामप्रसादसेनचरणैरप्यानुभूतं यत् काली ब्रह्मेति जानन् धर्माधर्म तत्याजेति। अतो मातृस्वरूपा सा महामाया ब्रह्मैवेत्यपास्तं तत्स्वरूपकुतूहलम्।

या देवी सर्वभूतेषु मातृरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ (दुर्गासप्तशती ५.७१)

☆ ☆ ☆

## उपयुक्तग्रन्थसूची

१. ऋग्वेदसंहिता. (१९८३). एन्. एस्. सोन्टाकि, सि.जि.काशिकार(सम्पा). पुने : वैदिक-संशोधनमण्डल।

२. श्रीमद्भगवद्गीता. स्वामी जगदानन्द (सम्पा.). कोलकाता : उद्बोधनकार्यालयः।

३. श्रीश्रीचण्डी. स्वामी जगदीश्वरानन्द (सम्पा.). कोलकाता : उद्बोधनकार्यालयः।

# सुखप्रकाशविरचित-भावद्योतनिकाव्याख्यायाः परिचयः तन्मातृकासमीक्षा च

**नागराजभट्टः***

प्रबन्धसारः

अद्वैतवेदान्तदर्शनस्य वादरूपेषु प्रकरणग्रन्थेषु चित्सुखाचार्यप्रणीता "तत्त्वप्रदीपिका" नूनं विशिष्यते। चित्सुखाचार्यस्य साक्षाच्छिष्येण सुखप्रकाशेन प्रणीता तद्व्याख्या भावद्योतनिका। सा प्राचीनतमा व्याख्या अद्य यावद् अप्रकाशिता भवन्ती मातृकावस्थायामेव भवतीति तु महदाश्चर्याय नः। प्रकृते प्रबन्धेऽस्मिन् मया समासेन भावद्योतनिकायाः व्याख्यानस्वरूपं, तस्यां चित्सुखीयप्रभावः, मातृकायाः सामान्यपरिचयश्च इत्येते विषयाः सप्रमाणं निरूप्यन्ते। पुनरपि तत्र प्रसङ्गसङ्गत्या मूलग्रन्थप्रणेतुः व्याख्यातुश्च देशकालकृतिपरिचयाय लेखनीं व्यापारयामि।

कुञ्चीशब्दाः– तत्त्वप्रदीपिका, भावद्योतनिका, नयनप्रसादिनी, सुखप्रकाशः, मातृका, पाठसम्पादनम् , प्राच्यमातृकागारः, मातृकासूची।

## ०.भूमिका

उपनिषन्नाम ब्रह्मविद्येति सनातनसम्प्रदायविदो वदन्ति। ब्रह्मविद्या-तत्साधनानामुपलब्धिभूमिः वेदान्तग्रन्थराशिः। अत एव भक्तिवृत्या उपनिषच्छब्देन अपौरुषेयो ग्रन्थ एव अभिधीयते। नैते अपौरुषेयग्रन्थाः पौरुषेयग्रन्थनिरपेक्षतया स्वातन्त्र्येण पुरुषबुद्धौ प्रकाशन्ते। अतः अपौरुषेयग्रन्थार्थप्रतिपत्तये चिरन्तनैः शास्त्रविद्भिः भाष्यव्याख्याटीकाटिप्पण्यादिभिः दर्शनवाङ्मयं समलङ्कृतम्। चरमपरमपुरुषार्थपरत्वाद्वेदान्तदर्शनं भारतीयदर्शनवाङ्मये विशिष्टस्थानम् अलङ्करोति। श्रुतिस्मृतिन्यायप्रस्थानप्रवर्तितं खलु इदं दर्शनम्। विषयसुखदुःखेषु मुह्यमानमुद्धर्तुकामाः सर्वे वेदान्ताः। पुरुषस्य संसारबन्ध आध्यासिक इत्येव सम्प्रदाये सम्प्रत्ययः। अतः बन्धनिवृत्तिश्च ज्ञानमात्रादेवेति वेदान्तदर्शनहृदयम्।

---

*अध्यापकः, संस्कृताध्ययनविभागे, रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयस्य, बेलुरमठस्थस्य पश्चिमवङ्गेषु – ७११२०२

मोक्षरूपा भगवती ब्रह्मविद्या प्रस्थानत्रयप्रतिपादिता ग्रन्थरूपं शब्दराशिमाश्रित्य विलसति। तादृशशब्दराशिः ब्रह्मविद्याश्रयः पौरुषेय-अपौरुषेयमुखेन भिद्यते। स च शब्दराशिः भाष्य-व्याख्या-टीका-टिप्पण्यादिना अचिन्त्यपरिमाणको वर्तते। शब्दमात्रा अप्येते ब्रह्मविद्यार्थत्वेन साधकोपकारहेतुत्वेन च प्रमाणपदवीं भजन्ते। अध्ययनाध्यापनविधावपि शब्दसमूहस्य महत्प्रामाण्यं पश्यामः।

## १. विचारसङ्गतिः

भावद्योतनिकामातृकायाः पाठसमीक्षात्मिकायां प्रवृत्तावस्ति किञ्चिद् निमित्तम्। एकादश-द्वादशशतकयोः कालखण्डे प्रणीतोऽयं वादग्रन्थः तत्त्वप्रदीपिकेति। तद्ग्रन्थस्य व्याख्यानरूपेण प्रत्यक्स्वरूपभगवद्भिरचिता "नयन-प्रसादिनी" प्रकाशिता सती पठनपाठनसम्प्रदाये शोभतेतराम्। प्रत्यक्स्वरूपस्य जीवितकालः चतुर्दशशतकं पञ्चदशशतकं वेति हेतोः तत्काल एव नयनप्रसादिन्या अपि निश्चप्रचम्। एकादशशतके प्रणीतग्रन्थविशेषस्य व्याख्यानं पञ्चदशशतके एव कृतम् , तन्मध्यावधौ न किञ्चिद्व्याख्यानं विहितमिति तु परीक्षकबुद्धिं नाधिरोहति। दशाधिकग्रन्थप्रणेतुः चित्सुखाचार्यस्य शिष्यप्रशिष्यपरम्पराप्रसिद्धिबलाद् व्याख्या-न्तरं नूनम् अनुमेयम्।

तत्त्वप्रदीपिकायाः प्राचीनव्याख्यान्तरस्यानुमाने महदिदं लिङ्गं यत् प्रत्यक्स्वरूपभगवता नयनप्रसादिन्यां मङ्गलश्लोकव्याख्याप्रसङ्गे "केचित्कारा" इति प्राचीनव्याख्याता स्मृतः। तद्यथा–"केचिद्विप्रतिपत्तीत्यादिना अवान्तरप्रयोजनस्य निर्देशः प्रत्यक्तत्त्वप्रदीपिकेति प्रधानस्यैवेति वदन्ति"[१]। प्रत्यक्स्वरूपभगवता नयनप्रसादिन्यां स्मृतः सुखप्रकाशमुनिरेव यः चित्सुखाचार्यस्य साक्षाच्छिष्यः। सुखप्रकाशप्रणीता भावद्योतनिका तत्त्वप्रदीपिकाव्याख्या प्राचीनतमा अद्य यावद् अप्रकाशिता सती मातृकावस्थायामेव विद्यते। जीर्णमातृकास्था व्याख्येयं पाठसमीक्षणेन सम्पादनीया। अध्ययनाध्यापनविधौ पुनरानेतुं प्राचीनव्याख्या भावद्योतनिकेयं लेखनेनानेन इदम्प्रथमतया प्रकाशमानीयते।

## २. चित्सुखाचार्यस्य तत्वप्रदीपिकायाश्च परिचयः

गौडेश्वराचार्यज्ञानोत्तमशिष्यः चित्सुखः स्वकृत-प्रत्यक्तत्त्वप्रदीपिकायाम् एकादशशतककालवर्तिनं श्रीहर्षमुल्लिखति[२]। खण्डनखण्डखाद्यं व्याख्याति

[१]नयनप्रसादिनी.पृ.४

[२]तत्त्वप्रदीपिका पृ.२९७

चायम्। दश-एकादशमध्यकालवर्तिन आनन्दबोधभट्टारककृतस्य न्यायमकरन्द-स्याऽपि व्याख्याम् अकरोत्। तस्माद् एकादश-द्वादशशतकयोः मध्यकाल एव (1120-1220 A.D.) चित्सुखकाल इति सिध्यति। सर्वथा चित्सुखः द्वादशशतकीय इति निश्चयः। चित्सुखस्य प्रसिद्धतमो ग्रन्थस्तु प्रत्यक्तत्त्वप्रदीपिकाऽस्ति। एषा लाघवाय तत्त्वप्रदीपिका चित्सुखीति च व्यवह्रियते लोके। एतस्यां चत्वारः परिच्छेदाः सन्ति। तेषु वेदान्तस्य कतिपये मुख्या विषया निरूपिताः सन्ति। तत्र चित्सुखः विस्तरेण पूर्वपक्षमतम् अनेकविकल्पकोटौ प्रथममुपस्थापयति। तदनु सर्वानपि पूर्वपक्षतर्कान् समालोचनपुरस्सरं निराकृत्य सविस्तरं सिद्धान्तं विशदयति।

## २.१. तत्त्वप्रदीपिकाव्याख्याः

"व्याख्यानतो विशेषप्रतिपत्तिः" इति न्यायेन सर्वेषां शास्त्रग्रन्थानाम् अर्थविशेषप्रतिपत्तये तद्व्याख्यानमेव नूनमाश्रीयते। तत्त्वप्रदीपिकायाः प्रकाशिताः अप्रकाशिताश्च व्याख्याः मातृकायामुपलभ्यन्ते।

१. नयनप्रसादिनी– अस्या नयनप्रसादिन्या व्याख्याता प्रत्यक्स्वरूप (प्रत्यग्रूप) इति ज्ञायते। अयं प्रत्यक्प्रकाशविद्यागिर्योश्च शिष्यः चतुर्दशशतकीय इति डा. र. तङ्गस्वामी[३] अभिप्रैति। इयं च व्याख्या अतिप्राचीना, विस्तृता सती ग्रन्थतात्पर्यमाविष्करोति। सरस्वतीभवन-बनारसहस्तलिखितपत्रादिषु एतद्व्याख्या नयनमोदिनी, मानसनयनप्रसादिनी, भावप्रदीपिका चेति नाम्ना प्रसिद्धा। व्याख्येयं निर्णयसागरमुद्रणालयादिषु मुद्रिता वर्तते। अस्या व्याख्याया अयं विशेषः यत् प्रतिपरिच्छेदमन्ते तत्परिच्छेदविचारिताशेषमर्थं श्लोकेनैकेन संगृह्णाति। तद्यथा प्रथमपरिच्छेदान्ते प्रोक्तं–

विज्ञानं स्वप्रकाशं भवति च पुरुषस्तद्वपुर्भावरूपम्।
ध्वान्तं मिथ्या प्रपञ्चो भ्रमभरनिलयोऽनादिभावोऽप्रबोधः॥
आरोपारोप्यसिद्धिः प्रमितिजनकताऽखण्डता स्वप्रमात्वम्।
शक्तिर्लक्ष्यः पदार्थान्वय इति कथिताः पौरुषेयो न वेदः॥[४]

२. तत्त्वप्रदीपिकाव्याख्या– इयं च व्याख्या अज्ञातकर्तृका नाममात्रावशेषा वर्तते।

३. भावद्योतनिका– भावद्योतनिकाख्या व्याख्या चित्सुखाचार्यस्यैव साक्षाच्छिष्येण सुखप्रकाशेन विरचिता। प्राचीनतमा इयं व्याख्या।

---

[३] Advaita Vedanta Literature : A Bibliographical Survey,पृ. ३६५

[४] नयनप्रसादिनी.पृ.२८०

## ३.भावद्योतनिका-मातृकायाः सामान्यपरिचयः

तत्त्वप्रदीपिकाव्याख्यायाः भावद्योतनिकायाः सप्त मातृकाः मातृकासूच्यां निर्दिष्टाः। तासु सप्तसु मातृकासु अद्यत्वे चतस्र एव मातृका मातृकागारे उपलभ्यन्ते। तास्वपि मातृकाद्वयं जीर्णावस्थायामस्ति। इमाः चतस्रः मातृकाः मद्रपुरीस्थसर्वकारीयमातृकागारे, तिरुवनन्तपुरीयमातृकागारे च वर्तन्ते। इतराः तिस्रः मातृका नाममात्रावशेषा अनुपलभ्यमाना इति महदिदं दुःखस्थानम्। अधुना उपलभ्यमानानुपलभ्यमानानां मातृकाणां सकोष्ठकं सामान्यपरिचयो विधीयते।

१. मद्रपुरीस्थसर्वकारीयमातृकागारस्था प्रथममातृका– मातृकासंख्या ३८९७। इयं तालपत्रीया मातृका। ग्रन्थलिप्यामियं लिखिता। इयं जीर्णप्राया।

२. मद्रपुरिस्थसर्वकारीयमातृकागारस्था द्वितीयामातृका– मातृकासंख्या ५२०३। इयं कर्गजपत्रीया मातृका। देवनागरलिप्यामियं लिखिता। इयम् अजीर्णकाया।

३. तिरुवनन्तपुरीयमातृकागारस्था प्रथममातृका– मातृकासंख्या ६३३५। इयं तालपत्रीया मातृका। मलयाललिप्यामियं लिखिता। इयं जीर्णकाया।

४. तिरुवनन्तपुरीयमातृकागारस्था द्वितीयामातृका– मातृकासंख्या ६३३६। इयं तालपत्रीया मातृका। मलयाललिप्यामियं लिखिता। इयमपि जीर्णकाया।

५. केरलराज्यस्थनडुविलमठस्था मातृका– मातृकासंख्या १११। हस्तनिर्मित-मातृकासूच्यां इयं मातृका उल्लिखिता, नाद्य यावद् उपलब्धा।

६. तिरुवनन्तपुरीयमातृकासूचिस्था– मातृकासंख्या १११४.२७। इयं मातृका तिरुवनन्तपुरीय-मातृकागारपालकेन मुद्रणार्थं सम्पादितानां मातृकाणां सूच्यामुल्लिखिता।

७. तञ्जावूरस्थमहाराजरफ़ोजिसरस्वतीमहलग्रन्थागारस्था– मातृकासंख्या 92.b। बर्नलमहाशयेन कृतायां मातृकासूच्यामस्याः निर्देशः वर्तते। किन्तु मातृकागारे सद्यः नोपलभ्यते।

एतासां मातृकाणां सविस्तृतं विवरणं कोष्टकमुखेन प्रदर्श्यते बोधसौकर्याय।

| क्रमः | उपलब्धिस्थानम् | मातृकासङ्ख्या | लिपिः | लेखन-सामग्री | पृष्ठसंख्या | प्रति-पृष्ठं पंक्तयः | प्रति-पङ्क्ति अक्ष-राणि | परि-माणम् (से.मि.) |
|---|---|---|---|---|---|---|---|---|
| १ | सर्वकारीय-प्राच्यमातृका-गारः मद्रपुरि(चेन्नै) | R.No.3897 S.R 1804 | ग्रन्थः | तालपत्रम् | १९० | २० | ३० | १३.२x ५.५ |
| २ | सर्वकारीय-प्राच्यमातृका-गारः मद्रपुरि (चैन्नै) | R.No.5203 S.R 2640 | देवनागरी | कर्गजपत्रम् | २४९ | २० | २८ | १०.४x ४.२ |
| ३ | तिरुवनन्तपुरीयमातृका-गारः तिरुवनन्तपुरम् | Mss.No.12400A S.R 6335 | मलयालम् | तालपत्रम् | ३००० (ग्रन्थाः) | – | – | |
| ४ | तिरुवनन्तपुरीयमातृका-गारः तिरुवनन्तपुरम् | Mss.No.12765A S.R 6336 | मलयालम् | तालपत्रम् | ३५०० (ग्रन्थाः) | – | – | |

## मातृकाविवरणकोष्ठकम्

(सर्वत्रापि कर्ता सुखप्रकाश इति अवधेयम्)

## ३.१. सुखप्रकाशमुनेः व्याख्यातुः संक्षिप्तपरिचयः

भावद्योतनिकायाः तत्त्वप्रदीपिकाव्याख्यायाः प्रणेता अयं सुखप्रकाशः चित्सुखस्य साक्षादेव शिष्य इति गम्यते। अधिकरणरत्नमालायां “चित्सुखाख्यनखरायुधं नुम” इति, भावद्योतनिकाया मङ्गलश्लोके “चित्सुखाख्यमुनिपुङ्गवगीर्विलासान् वाचस्पतिः परमिह क्षमते विवेक्तुम्” इति च वचनं तत्र महत् प्रमाणम्। “सुखप्रकाशयतिनं तं नौमि विद्यागुरुमिति” अमलानन्देन वन्दितोऽयं सुखप्रकाशः अमलानन्दस्य गुरुः इत्यवगम्यते। अमलानन्देन आनन्दात्मयतीश्वरं तमनिशं वन्दे गुरूणां गुरुमिति निर्दिष्टत्वात् सुखप्रकाश आनन्दात्मनोऽपि शिष्य इति आनन्दगिरिरपि सुखप्रकाशशिष्यो भवितुमर्हति। एतेनायं त्रयोदशशतकीय (1200-1300 A.D) इति निश्चप्रचम्।[५]

### ३.१.१. सुखप्रकशप्रणीतग्रन्थाः

१.अधिकरणमाला– ब्रह्मसूत्रवृत्तिरूपोऽयं ग्रन्थः।
२.तत्त्वप्रदीपिकाव्याख्या– भावद्योतनिका
३.न्यायापदेशमकरन्दव्याख्याविवेचनी– न्यायमकरन्दग्रन्थस्य व्याख्यात्मकः।
४.न्यायदीपावलीतात्पर्यटीका

## ३.२. भावद्योतनिकाव्याख्यायाः स्वरूपम्

भावद्योतनिकेति व्याख्येयं प्राचीनतमा नातिसंक्षिप्ता नातिविस्तृता च वर्तते। न्यूनशब्दप्रयोगेण महार्थप्रतिपादनपरा इयं व्याख्या। भावद्योतनिकाव्याख्या प्रसन्नगम्भीरा, तत्वप्रदीपिकाग्रन्थार्थप्रकाशिका, अद्वैतशास्त्रव्युत्पादिका च वर्तते। व्याख्यालक्षणं तु अभियुक्तैर्लक्षितं यथा–

पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना।
पूर्वपक्षसमाधानं व्याख्यानं पञ्चलक्षणम्॥[६]

ग्रन्थव्याख्याता सन्धिविच्छेदादिना पदच्छेदं प्रदर्शयेत्। तत्र प्रकरणादिप्रमाणमाश्रित्य पदानामर्थः वक्तव्यः। ग्रन्थे अपेक्षितानां समस्तपदानां विशिष्टविग्रहो विधेयः। पदानां, वाक्यानां च अन्वयप्रदर्शनमुखेन वाक्यार्थः, प्रकरणार्थश्च निरूपणीयो भवेत्। ग्रन्थोक्तपूर्वपक्षाक्षेपं प्रति सप्रमाणं सयुक्ति

[५] Advaita Vedanta Literature A Bibliographical Survey,पृ. ४०९
[६] भाषावृत्तिव्याख्या, सृष्टिधरः

समाधानमपि व्याख्यातुः परमो धर्मः। प्रकृतव्याख्यायां व्याख्यानगताः सर्वे धर्माः प्रतीयन्ते। मूलग्रन्थे प्रयुक्तानां पदानां प्रासङ्गिकोऽर्थः दर्शितः, सैव पदार्थोक्तिः। तद्यथा "श्रद्धया आस्तिक्यबुद्ध्या, उपनिषदा रहस्यविज्ञानेन"[७]।

तत्त्वप्रदीपिकामङ्गलश्लोकगतस्य "पाञ्चाननपाञ्चजन्यवपुषा" इत्यस्य समस्तपदस्य विग्रहो विहितः भावद्योतनिकायाम्। तद्यथा– "पञ्चाननः(सिंहः) तत्सम्बन्धि पाञ्चाननं, पञ्चजना नराः तत्सम्बन्धि पाञ्चजन्यं तेन पाञ्चाननेन पाञ्चजन्येन च नरसिंहात्मकेन वपुषा (व्यादिष्टा) प्रतिपादिता विश्वात्मता यस्य सः"। सर्वगतस्य विष्णोः सर्वात्मत्वं द्योतयितुमयमेव विग्रह आश्रयणीय इति व्याख्यात एव ग्रन्थतात्पर्यप्रतिपत्तिर्भवति।

वाक्ययोजना तु ग्रन्थतात्पर्यार्थानुकूलतया वाक्यानां पदानां च अन्वय एव। तत्त्वप्रदीपिकाया मूलवाक्यं "तस्या अपरोक्षात्मविषयत्वेऽपि तद्विपरीतव्यवहारहेतुतया तद्व्यवहारहेतुत्वाभावात्"[८]। एतद्वाक्ययोजना प्रदर्शिता सुखप्रकाशेन "तस्यापरोक्षविषयत्वेऽप्यपरोक्षव्यवहारहेतुत्वाभावादित्यन्वयः। तत्र हेतुस्तद्विपरीतव्यवहारहेतुतयेति"[९]॥

शाब्दापरोक्षवादे पूर्वपक्षाक्षेपं निराकुर्वन् व्याख्याता तत्समाधानं विदधाति। तद्यथा– "बाह्यविषयापरोक्षप्रमितिकरणस्यापि योगिमनसो बाह्यप्रत्यक्षानन्तर्भावाभाववद्वेदान्तवाक्यस्याप्यपरोक्षप्रतीतिहेतोः प्रत्यक्षानन्तर्भाव-सम्भवाद् दशमस्त्वमसीत्यादिवाक्ये शब्दस्याप्यपरोक्षप्रमाजनकत्वदर्शनान्न कश्चिद्दोष इत्यर्थः"[१०]।

एवञ्च भावद्योतनिकायां सर्वेऽपि व्याख्याधर्माः स्फुटं प्रतीयन्ते।

## ३.३. भावद्योतनिकायां चित्सुखीयप्रभावः

चित्सुखशिष्येण सुखप्रकाशमुनिना विरचितायां भावद्योतनिकाव्याख्यायां चित्सुखीय एव प्रभावः प्रतिभाति। स्वविद्यागुरौ चित्सुखाचार्ये महान्तमादरं प्रदर्शयति। भावद्योतनिकाया अन्तिमश्लोके तदुक्तं यथा–

[७]भावद्योतनिका तृतीयपरिच्छेदः

[८]तत्त्वप्रदीपिका. तृतीयपरिच्छेदः पृ.५२९

[९]भावद्योतनिका तृतीयपरिच्छेदः

[१०]भावद्योतनिका तृतीयपरिच्छेदः

श्रीचित्सुखाख्यमुनिपुङ्गवगीर्विलासाद्
वाचस्पतिः परमिह क्षमते हि वेत्तुम्।
सोऽहं मुनीन्द्रनिरवग्रहसूक्तिपङ्क्ति-
गङ्गावगाहनहरे स्वगिरः पुनामि॥

चित्सुखाचार्यः स्वग्रन्थादौ मङ्गलाचरणत्वेन "पाञ्चाननपाञ्चजन्यवपुषा" इत्यादिना नरसिंहात्मकं विष्णुं स्मरति। सुखप्रकाशमुनिरपि चित्सुकीयश्रद्धामनुसरन् व्याख्यादौ मङ्गलत्वेन नरहरिरूपं विष्णुमेव नमति। तद्यथा– "नरहरिं तमिमं नमामः" इति।

चित्सुखाचार्यस्य प्रतिपादनपरिपाटी खलु विलक्षणा, तादृशीमेव पद्धतिमनुकरोति सुखप्रकाशोऽपि। अल्पाक्षरेषु बह्वर्थसंग्रहणरीतिः मूलग्रन्थ-तद्व्याख्यानयोः समाना संदृश्यते। भावद्योतनिकाकारोऽपि अल्पशब्दप्रयोगेणैव ग्रन्थार्थम् अशेषं व्याख्यातुमिच्छति। एवञ्च अल्पाक्षरत्वं, शब्देषु अर्थगौरवं, शब्दाडम्बरराहित्यं, प्राचीनन्यायमीमांसाशास्त्रोपबृंहितत्वं चेति भावद्योतनिकायां दृश्यमानाः चित्सुखीयधर्माः।

## ४.उपसंहारः

ब्रह्मविद्याश्रयत्वादस्ति शब्दराशेरपि महत् प्रामाण्यम्। मूलग्रन्थमाश्रित्य व्याख्याटीकाटिप्पण्यादिभिः प्राचीना विद्वासः शास्त्रवाङ्मयं समलञ्चक्रुः। तत्र प्राचीनतमा सुखप्रकाशमुनिविरचिता भावद्योतनिका तत्त्वप्रदीपिकाग्रन्थहृदयमुद्घाटयति। भावद्योतनिकानयनप्रसादिन्योः तुलनात्मकम् अध्ययनम् अपि गवेषणविषयः। पुनश्च तत्रागणिता व्याख्योपव्याख्या नाद्य यावत् प्रकाशिताः। ता मातृका असम्पादिता अप्रकाशिताश्च मातृकागारे कृमिकीटजग्धाः भवन्ति। मरणासन्नानां मातृकाणामुद्धरणं सम्पादनं च महदिदं दायित्वं संस्कृतज्ञानाम्। मातृकासम्पादनप्रकाशनमुखेन पुनरपि अध्ययनाध्यापनविधावानयनेन च मातृकल्पा मातृकाः परिरक्षणीया इति विज्ञाप्य विरम्यते।

☆ ☆ ☆

## उपयुक्तग्रन्थसूची

१. स्वामी योगीन्द्रानन्दः (सम्पा.). (१९८५) तत्त्वप्रदीपिका. वाराणसी. चौखम्बा विद्याभवनम्।

२. हनुमानदासः(सम्पा.). (२०१०) तत्त्वप्रदीपिका. वाराणसी. चौखम्बाप्रकाशनम्।

३. A Descriptive Catalogue of Sanskrit Manuscripts in the Govt. Oriental Manuscript Library, Chennai.
४. A Descriptive Catalogue of Sanskrit Manuscripts in the Adayar Library, Chennai.
५. A Descriptive Catalogue of Sanskrit Manuscripts in the Saraswati Mahal Library, Tanjavore.
६. Alphabetical Index of Sanskrit Manuscripts(Vol.No II) in the University Manuscripts Library Trivandrum, University of Kerala
७. Thangaswami, R. (1980) *Advaita Vedanta Literature A Bibliographical Survey* Madras. University of Madras.

# ध्यानयोगगूढार्थदीपिकामुपात्तानां योगसूत्राणामद्वैतदृष्ट्या परिशीलम्

भजहरिदासः*

## ०. भूमिका

तापत्रयपीडिते निखिले जगतीतले को न्वीदृशः पामरो जनो यो नेच्छति अतिक्रमितुं शोकनिचयम्। जीवस्य चाविद्यागर्तपतितस्य कामक्रोधादिघोरमकरसङ्कुलसंसारवैतरण्यां निमज्जतः सन्तारणार्थं परमकारुणिकया अहैतुककृपामय्या भववत्या श्रुत्या उपदिष्टो योगः। तां योगमिति मन्यते स्थिरामिन्द्रियधारणाम् (कठोपनिषद्-२.३.५) इत्यादिभिः श्रुतिभिः, योगः कर्मसु कौशलम् ,(श्रीमद्भगवद्गीता-२.५०) समत्वं योग उच्यते (श्रीमद्भगवद्गीता-२.४८) इत्यादिभिः भगवद्वचनैः, योगश्चित्तवृत्तिनिरोधः(योगसूत्रम् १.२) इत्यादिऋषिवचनैश्च योगस्य विविधाः परिभाषाः कथिताः शास्त्रेषु।

विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः॥
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्॥ (कठोपनिषत् १.३.९)

इति श्रुतेरनुसारं मनः प्रगृह्यैव जनो मोक्षमाप्नोति। अगृहीतमनाः कदापि सुखं प्राप्तुं न क्षमो भवति। उक्तञ्च गीतायां श्रीमद्भगवद्गीतायाम् -

उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।
आत्मैव ह्यात्मनो वन्धुरात्मैव रिपुरात्मनः॥ (श्रीमद्भगवद्गीता-६.५)

श्रूयते च लोकेऽपि मनसो बन्धमोक्षकारकत्वम्। मन एव मनुष्याणां कारणं बन्धमोक्षयोः (अमृतबिन्दूपनिषद्-२) इति। अतः चित्तवृत्तिनिरोधपूर्वकमेकाग्रता सम्पादनीया। तदानीमेव– दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः(कठोपनिषद्- १.३.१२) इति निरवच्छिन्नं सुखं प्राप्नोति। एतदेव गीतायां– ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना(श्रीमद्भगवद्गीता-१३.२४) इति भगवता प्रतिपादितम्।

आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य (बृहदारण्यकोनिषद्-२.४.५) इति आम्नायानुसारं योगाभ्यासोऽपि

---

*अतिथि-अध्यापकः, संस्कृतविभागे, जियागञ्जमहाविद्यालये, मुर्शिदावादस्थे, पश्चिमवङ्गेषु।

चित्तैकाग्र्यसम्पादनेन तत्त्वज्ञानोपायत्वेन उपकरोतीति कस्य वा संशीतिलेशः स्यात्। उक्तञ्च गीतायां–

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुनः॥ (श्रीमद्भगवद्गीता-६.४६)

इति।

## १. शाङ्करदर्शने योगदर्शनस्योपयोगः

वेदे सम्यग् दर्शनस्य साधनरूपेन योगः विहितः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति, एवमेव तिरुन्नतं स्थाप्य समं शरीरम् (श्वेताश्वतरोपनिषद्-२.८) इत्यादिना च आसनादिकल्पनापुरस्सरं बहुप्रपञ्चं योगविधानं दृश्यते। योगशास्त्रेऽपि– अथ तत्त्वदर्शनाभ्युपायो योग इति सम्यग् दर्शनस्याभ्युपायत्वेन एव योगोऽङ्गीक्रियते। तत्कारणं सांख्ययोगाधिगम्यम् (श्वेताश्वतरोपनिषद्-६.१३) इति दर्शने यदुक्तं वैदिकमेव तत्र ज्ञानं ध्यानं च सांख्ययोगशब्दाभ्यां सान्निध्यकारणात् अवगन्तव्यम्। अतः सांख्ययोगस्मृत्योः श्रुतेः कोऽपि विरोधो न दृश्यते। अतः शाङ्करदर्शने योगदर्शनस्योपयोगो भवत्येव।

तर्हि एतेन योगः प्रयुक्तः(ब्रह्मसूत्रम्-२.१.३) इति सूत्रविरोधः। तथाहि शाङ्करभाष्ये स्मृत्यधिकरणे सांख्यस्मृतिप्रतिपादितं प्रधानं जगत्कारणं न भवति, प्रधानपरिणामत्वेन कल्पितानि महदादीनि च लोके वेदे च नोपलभ्यन्त इत्यर्थकेन स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् (ब्रह्मसूत्रम्-२.१.१-२), इतरेषां चानुपलब्धेः(ब्रह्मसूत्रम्-२.१.२) इति सूत्रद्वयेन सांख्यदर्शनं खण्डयित्वा तमेव खण्डनप्रकारं योगदर्शनेऽपि सुत्रकारः बादरायणः एतेन योगः प्रयुक्तः इति सुत्रेण अतिदिशति। तत्कथं शाङ्करदर्शने योगदर्शनस्योपयोगः कर्तुं शक्यत इति चेदुच्यते– येन त्वंशेन विरुध्यते, तेनेष्टमेव सांख्ययोगस्मृत्योः सावकाशत्वम्। तद्यथा– असङ्गो ह्ययं पुरुषः (बृहदारण्यकोपनिषद्-४.३.१६) इत्येवमादि श्रुतिप्रसिद्धमेव पुरुषस्य विशुद्धत्वं निर्गुणपुरुषनिरूपणेन सांख्यैरभ्युपगम्यते। तथा च योगैरपि, जाबालश्रुतिप्रसिद्धमेव निवृत्तिनिष्ठत्वं प्रव्रज्याद्युपदेशेनाऽनुगम्यते। तान्यपि तर्कोपपत्तिभ्यां तत्त्वज्ञानायोपकुर्वन्ति इति चेत्, उपकुर्वन्तु नाम[1] इति भगवत्पादीयं भाष्यम्।

एतद्भाष्यानुरोधेन ये अंशाः वैदिकदर्शनाविरुद्धाः तेषां स्वीकारे

[1]ब्रह्मसूत्रशाङ्करभाष्यम्- २.१.३

योगप्रत्युक्ताधिकरणविरोधः नास्ति। तथाह्यत्र शाङ्करदर्शने योगदर्शनस्योपयोगो दिङ्मात्रं प्रदश्र्यते।

अस्ति पातञ्जलयोगदर्शने साधनपादे षट्चत्वारिंशत्तमं सूत्रं स्थिरसुखमासनम् इति। पद्मस्वस्तिकादिना सादृश्येन देहस्थापनेन यस्य पुरुषस्यावयवव्यथानुत्पत्तिलक्षणं सुखं देहचलनराहित्यलक्षणं स्थैर्यं च सम्पद्यते, तदेव सुखमासनमिति।

तथा वेदान्तदर्शनेऽपि शाङ्करभाष्ये चतुर्थाध्याये प्रथमपादे षष्ठमधिकरणमासीनाधिकरणमिति नाम्ना प्रसिद्धमस्ति। तत्र चत्वारि सूत्राणि भवन्ति। यथा - आसीनस्सम्भवात्, ध्यानाच्च, अचलत्वं चापेक्ष्यं, स्मरन्ति च इति। अस्याधिकरणस्यायं सारः भवन्ति, यथा– अङ्गावबद्धोपासनेषु कर्मतन्त्रत्वान्नाऽसनचिन्ता। नापि सम्यग्दर्शने, वस्तुतन्त्रत्वाज्ज्ञानस्य। एतरेषु तूपासनेषु प्रवृत्तेरियमासनचिन्ता। तत्र किं तिष्ठन्नासीनः शयानो वोपासीतोताऽसीन एवेति संशये मानसत्वादुपासनस्यानियमः शरीरस्थितेरिति प्राप्तेऽभिधीयते– आसीन एवोपासीत। उपासनं नाम विजातीयप्रत्ययान्तरितसजातीयप्रत्ययप्रवाहकरणम्। कुतः? सम्भवात्। शयानस्य निद्राप्रङ्गात्। गच्छतश्चित्तविक्षेपात्। तिष्ठतः शरीरधारणव्यग्रत्वान्नोपासनं सम्भवति। परिशेषादासीनस्यैवाव्यग्रत्वसम्भवात्। तस्मादासीन एवोपासीत।

अतः सत्यपि योगाद्वैतदर्शनयोः तात्त्विकभेदे तयोः सम्बन्धः अविच्छेद्य एव इति अनुमतं भवति। इदानीं वयं केषाञ्चन योगसूत्राणाम् अद्वैतदृष्ट्या व्याख्यानं परिशीलयामः। इमानि योगसूत्राणि भगवता मधुसूदनसरस्वतीपादेन ध्यानयोगगूढार्थदीपिकायाम् उद्धृत्य व्याख्यातानि।

## १.१. योगश्चित्तवृत्तिनिरोधः॥ १.२॥

इदं सूत्रं मधुसूदनसरस्वतीभिः गूढार्थदीपिकायाम् उक्तम्–

यं सन्न्यासमिति प्राहुर्योगं तं विद्धि पाण्डव।
न ह्यसन्न्यस्तसङ्कल्पो योगी भवति कश्चन॥ (श्रीमद्भगवद्गीता- ६.२)

इति। श्लोकस्य व्याख्यानावसरे योगं तं विद्धि पाण्डव इत्यत्र योगशब्दनिर्वचनसन्दर्भे उद्धृतम्।

रजस्तमोवृत्त्योर्निरोधो योगः इत्यर्थः। अतः सात्त्विकवृत्तिसत्त्वेऽपि सम्प्रज्ञाते

नाव्याप्तिः। इति प्रकृतसूत्रस्यार्थः वर्णितः सदाशिवेन्द्रसरस्वतीभिः योगसुधाकरे स्वीयग्रन्थे।

गूढार्थदीपिकायामस्य सूत्रस्य वर्णनमेवमुपलभ्यते। योगश्चित्तवृत्तिनिरोधः, प्रमाणविपर्ययविकल्पनिद्रा- स्मृतय इति वृत्तयः पञ्चविधाः। तत्र प्रत्यक्षानुमानशास्त्रोपमानार्थपत्त्यभावाख्यानि प्रमाणानि षडिति वैदिकाः। प्रत्यक्षानुमानागमाः प्रमाणानि त्रीणीति यौगिकाः। अन्तर्भावबहिर्भावाभ्यां सङ्कोचविकासौ द्रष्टव्यौ। विपर्ययो मिथ्याज्ञानम्। तस्य पञ्च भेदाः। अविद्यास्मितारागद्वेषाभिनिवेशाः। ते एव च क्लेशाः। शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः, प्रमाभ्रमविलक्षणोऽसदर्थव्यवहारः शशविषाणमसत्पुरुषस्य चैतन्यमित्यादिः। अभावप्रत्ययालम्बना वृत्तिर्निद्रा, चतसृणां वृत्तीनामभावस्य प्रत्ययः कारणं तमोगुणस्तदालम्बना वृत्तिरेव निद्रा न तु ज्ञानाद्यभावमात्रमित्यर्थः। अनुभूतविषयासम्प्रमोषः प्रत्ययः स्तृतिः, पूर्वानुभवसंस्कारजं ज्ञानमित्यर्थः। सर्ववृत्तिजन्यत्वादन्ते कथनम्। लज्जादिवृत्तीनामपि पञ्चस्वेवान्तर्भावो द्रष्टव्यः। एतादृशां सर्वासां चित्तवृत्तीनां निरोधो योग इति च समाधिरिति च कथ्यते। फलसङ्कल्पस्तु रागाख्यस्तृतीयो विपर्ययभेदस्तन्निरोधमात्रमपि गौण्या वृत्त्या योग इति सन्न्यास इति चोच्यत इति न विरोधः। इति। पुनश्च गीतायाम्–

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः॥ (श्रीमद्भगवद्गीता-६.२९)

इति। श्लोकस्य व्याख्यानावसरे योगयुक्तात्मा योगेन निर्विचारवैशारद्यरूपेण युक्तः प्रसादं प्राप्त आत्माऽकरणं यस्य सः। तथा च शब्दानुमानागोचरयथार्थविशेषवस्तुगोचरयोगजप्रत्यक्षेण ऋतम्भरसंज्ञेन युगपत्सूक्ष्मं व्यवहितं विप्रकृष्टं च सर्वं तुल्यमेव पश्यतीति सर्वत्र समं दर्शनं यस्येति सर्वत्रसमदर्शनः।

यो योगयुक्तात्मा यो वा सर्वसमदर्शनः स आत्मानमीक्षत इति योगसमदर्शिनावात्मेक्षणाधिकारिणावुक्तौ इति। यतो हि चित्तवृत्तिनिरोधः साक्षिसाक्षात्कारहेतुस्तथा जडविवेकेन सर्वानुस्यूतचैतन्यापृथक्करणमपि। अत एवाऽह वशिष्ठः–

द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघव।
योगो वृत्तिनिरोधे हि ज्ञानं सम्यगवेक्षणम्॥

असाध्यः कस्यचिद्योगः कस्यचित्तत्त्वनिश्चयः।
प्रकारौ द्वौ ततो देवो जगाद परमः शिवः॥ इति।

अस्यायमर्थः– चित्तनाशस्य साक्षिणः सकाशात्तदुपाधिभूतचित्तस्य पृथक्करणात्तद्दर्शनस्य। तस्योपायद्वयम् एकोऽसम्प्रज्ञातसमाधिः। सम्प्रज्ञातसमाधौ हि आत्मैकाकारवृत्तिप्रवाहयुक्तमन्तःकरणसत्त्वं साक्षिणाऽनुभूयते निरुद्धसर्ववृत्तिकं तूपशान्तत्वान्नानुभूयत इति विशेषः। द्वितीयस्तु साक्षिणि कल्पितं साक्ष्यमनृतत्वान्नास्त्येव साक्ष्येव तु परमार्थसत्यः केवलो विद्यत इति विचारः। तत्र प्रथममुपायं प्रपञ्चपरमार्थतावादिनो हिरण्यगर्भादयः प्रपेदिरे, तेषां परमार्थस्य चित्तस्यादर्शनेन साक्षिदर्शने निरोधातिरिक्तोपायासम्भवात्। श्रीमच्छंकरभगवत्पूज्यपादमतोपजीविनस्त्वौपनिषदाः प्रपञ्चानृततत्त्ववादिनो द्वितीयोपायमुपेयुः। तेषां ह्यधिष्ठानज्ञानदार्ढ्ये सति तत्र कल्पितस्य बाधितस्य चित्तस्य तद्दृश्यस्य चादर्शनमनायासेनैवोपपद्यते। केचन योगमार्गरताः केचन ज्ञानमार्गरताः फलं तु समानमेव। द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ परिब्राड् योगयुक्तश्च इत्युक्तेः।

अत एव योगः कठाद्युपनिषत्सु आत्मदर्शनार्थमुदिष्टः दृश्यते–

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह।
बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम्॥
तां योगमिति मन्यते स्थिरामिन्द्रियधारणाम्।
अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ॥ (कठोपनिषत् २.३.१०) इति।

अस्यार्थः भगवत्पादैरेवमभिवर्णितः। यस्मिन्काले स्वविषयेभ्यो निवर्तितान्यात्मन्येव पञ्च श्रोत्रादीनि इन्द्रियाणि अवतिष्ठन्ते सह मनसा सङ्कल्पादिव्यावृत्तेनान्तःकरणेन, बुद्धिश्चाध्यवसायलक्षणा न विचेष्टति स्वव्यापारेषु न विचेष्टते न व्याप्रियते तामाहुः परमां गतिम्।

## १.२. तदा द्रष्टुः स्वरूपेऽवस्थानम्॥ १.३॥

इदं सूत्रं मधुसूदनसरस्वतीभिः गूढार्थदीपिकायम्–

युञ्जन्नेवं सदाऽत्मानं योगी नियतमानसः।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति॥ (श्रीमद्भगवद्गीता-६.१५)

अस्य श्लोकस्य व्याख्यानावसरे मत्संस्थामधिगच्छति इत्यत्र

योगशब्दनिर्वचनसन्दर्भे उद्धृतम्।

यदा सर्वासां वृत्तीनां निरोधः, तदा द्रष्टुश्चितिशक्तेः स्वाभाविके स्वरूपे स्थितिः कुसुमापगमे स्फटिकमणेरिवेत्यर्थः। चितिशक्तेश्चैतन्यमात्रस्वभावो न वृत्तय इति भावः।[२] इति प्रकृतसूत्रस्यार्थः वर्णितः सदाशिवेन्द्रसरस्वतीभिः योगसुधाकराख्ये स्वीयग्रन्थे।

गूढार्थदीपिकायामस्य सूत्रस्य वर्णनमेवमुपलभ्यते– तदा सर्ववृत्तिनिरोधे। वृत्तिदशायां तु नित्यापरिणामिचैतन्यरूपत्वेन तस्य सर्वदा शुद्धत्वेऽप्यनादिना दृश्यसंयोगेनाऽविद्यकेनान्तःकरणतादात्म्याध्यासादन्तःकरण-वृत्तिसारूप्यं प्राप्नुवन्नभोक्ताऽपि भोक्तेव दुःखानां भवति।

समाधिपरिपाकप्रभावेण वेदान्तवाक्यजेन सम्यग्दर्शनेनाविद्यायां निवृत्तायां तद्धेतुकदृग्दृश्यसंयोगाभावाद्वृत्तौ पञ्चविधायामपि निवृत्तायां स्वरूपप्रतिष्ठः पुरुषः शुद्धः केवलो मुक्त इत्युच्यते।

## १.३. वृत्तिसारूप्यमितरत्र॥१.४॥

इदं सूत्रं युञ्जन्नेवं सदाऽत्मानं इत्यादि पूर्वोक्तश्लोकव्याख्यानसन्दर्भे प्रस्तुतं वर्तते। चित्तवृत्तिनिरोधे तु स्वरूपावस्थानं भवति। तदभावे कीदृशी स्थितिरिति एतत्सूत्रं प्रतिपादयति। अस्यायमर्थः– यद्यपि निर्विकारा चितिशक्तिः सदा स्वरूप एवावतिष्ठते, तथापि निरोधादन्यत्र वृत्तिषूत्पद्यमानासु तत्र चितिश्छायायां प्रतिबिम्बतायां तदविवेकात्तादात्म्यमापन्नेव चितिशक्तिर्भवति जपारक्त इव स्फटिकः। अतो न स्वरूपात्प्रच्युतिः। नहि लौहित्यभ्रमसमये समस्ति स्फटिकमणेरवदातस्वभावात्प्रच्युरिति भावः।

गूढार्थदीपिकायाम् इदं सूत्रं एवं व्याख्यातं वर्तते- वृत्तिसारूप्यमितरत्र। इतरत्र वृत्तिप्रादुर्भावे। एतदेव विवृतं द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थम्। चित्तमेव द्रष्टृदृश्योपरक्तं विषयिविषयनिर्भासं चेतनाचेतनस्वरूपापन्नं विषयात्मकमप्यविषयात्मकमिवाचेतनमपि चेतनमपि स्फटिकमणिकल्पं सर्वार्थमित्युच्यते। तदनेन चित्तसारूप्येण भ्रान्ताः केचिदेव चेतनमित्याहुः।

अत्र एतदनुसन्धेयम्– कामः संकल्पो विचिकित्सा श्रद्धाश्रद्धाधृतिरधृतिर्-ह्रीर्धीर्भीरित्येतत्सर्वं मन एव। (बृहदारण्यकोपनिषद्- १.५.३)

---

[२] योगसूत्रवृत्तिः -१.३

इति श्रुत्या वस्तुत एते कामादयः अन्तःकरणधर्मा एव। अविद्यया अन्तकरणतादात्म्यात् जीवः अविद्यया आत्मानं कामी सङ्कल्पयामि ह्रीतः इति मनुते। वस्तुतस्तु अकर्ता अभोक्ता एव। एतदेव वृत्तिसारूप्यमितरत्र इति प्रतिपादियति। वृत्तिसारूप्याभावे तत्त्वदर्शिना स्थितिः एवमभिवर्णिता अद्वैतमकरन्दे–

अमृताब्धेर्न मे जीर्णिमृषा डिण्डीरजन्मभिः।
स्फटिकार्द्रेर्न मे रागः स्वाप्नसंन्ध्याभ्रविभ्रमैः॥(अद्वैतमकरन्दः २१)

इति।

## १.४. अभ्यासवैराग्याभ्यां तन्निरोधः॥१.१२॥

इदं सूत्रं मधुसूदनसरस्वतीभिः गूढार्थदीपिकायाम्-

असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते॥(श्रीमद्भगवद्गीता- ६.३५)

अस्य श्लोकस्य व्याख्यानावसरे अभ्यासेन वैराग्येण च गृह्यते इति व्याख्यानसन्दर्भे प्रतिपादितम्।

चित्तस्य निसर्गतो निर्गतस्त्रगादिगोचरवृत्तिसरित्पूरं वैराग्येण विनिवार्य समाध्यभ्यासेन प्रशान्तप्रवाहः संपाद्यते। अतस्तदुभयनिबन्धनो निरोधः इत्यर्थः।[3] इति प्रकृतसूत्रस्यार्थः वर्णितः सदाशिवेन्द्रसरस्वतीभिः योगसुधाकरे।

श्रीरामानन्दयतिः इदं सूत्रं मणिप्रभाख्ययोगसूत्रवृत्तौ एवं व्याख्याति– सर्वस्य जन्तोः स्वभावतश्चित्तवृत्तिर्नदी विषयभूमिगा संसारसागराभिमुखी प्रवहति। तत्र विषये वैराग्येण तत्प्रवाहं भङ्क्त्वा सत्त्वपुरुषविवेकाभ्यासेन तस्या नद्याः प्रत्यक्प्रवाहः क्रियते। अनभ्यासे हि लयविक्षेपस्वभावस्य चित्तस्य वैराग्याद् विक्षेपभङ्गे निद्रा स्यात्, तस्मादभ्यासवैराग्ये लयविक्षेपनिवृत्तिरूपप्रयोजनभेदेन निरोधे कार्ये समुच्चीयते इति।

गूढार्थदीपिकायामस्य सूत्रस्य वर्णनमेवमुपलभ्यते– प्रमाणविपर्ययविकल्प-निद्रास्मृतिरूपेण पञ्चविधानामनन्तानामासुरत्वेन क्लिष्टानां दैवत्वेनाक्लिष्टानामपि वृत्तीनां सर्वासामपि निरोधो निरिन्धनाग्निवदुपशमाख्यः परिणामोऽभ्यासेन वैराग्येन च समुच्चितेन भवति। तदुक्तं योगभाष्ये– चित्तनदी नामोभयतोवाहिनी वहति कल्याणाय वहति पापाय च। तत्र या कैवल्यप्राग्भारा विवेकनिम्ना सा

[3]योगसूत्रवृत्तिः - १.१२

कल्याणवहा। या त्वविवेकनिम्ना संसारप्राग्भारा सा पापावहा। तत्र वैराग्येण विशेषस्रोतः खिलीक्रीयते। विवेकदर्शनाभ्यासेन च कल्याणस्रोत उद्घाट्यते, इत्युभयाधीनश्चित्तवृत्तिनिरोध इति। यथा तीव्रवेगोपेतं नदीप्रवाहं सेतुबन्धनेन निवार्य कुल्याप्रणयनेन क्षेत्राभिमुखं तिर्यक्प्रवाहान्तरमुत्पाद्यते यथा वैराग्येण चित्तनद्या विषयप्रवाहं निवार्य समाध्यभ्यासेन प्रशान्तवाहिता सम्पाद्यत इति।

द्विविधो हि मनसो निग्रहः हठेन क्रमेण च। तत्र चक्षुःश्रोत्रादीनि ज्ञानेन्द्रियाणि वाक्पाण्यादीनि कर्मेन्द्रियाणि च तद्गोलकमात्रोपरोधेन हठान्निगृह्यन्ते। तद्दृष्टान्तेन मनोऽपि हठेन निग्रहीष्यामीति मूढस्य भ्रान्तिर्भवति। न च तथा निग्रहीतुं शक्यते तद्गोलकस्य हृदयकमलस्य निरोद्धुमशक्यत्वात्। अत एव च क्रमनिग्रह एव युक्तस्तदेतद्भगवान्वशिष्ठ आह–

उपविश्योपविश्यैव चित्तज्ञेन मुहुर्मुहुः।
न शक्यते मनो जेतुं विना युक्तिमनिन्दिताम्॥
अङ्कुशेन विना मत्तो यथा दुष्टमतङ्गजः।
अध्यात्मविद्याधिगमः साधुसङ्गम एव च ॥
वासनासम्परित्यागः प्राणस्पन्दनिरोधनम्।
एतास्ता युक्तयः पुष्टाः सन्ति चित्तजये किल॥
सतीषु युक्तिष्वेतासु हठान्नियमयन्ति ये।
चेतस्ते दीपमुत्सृज्य विनिघ्नन्ति तमोऽञ्जनैः॥ इति।

क्रमनिग्रहे चाध्यात्मविद्याधिगम एक उपायः। सा हि दृश्यस्य मिथ्यात्वं दृग्वस्तुनश्च परमार्थसत्यपरमानन्दस्वप्रकाशत्वं बोधयति। तथा च सत्येतन्मनः स्वगोचरेषु दृश्येषु मिथ्यात्वेन प्रयोजनाभावं प्रयोजनवति च परमार्थसत्यपरमानन्दरूपे दृग्वस्तुनि स्वप्रकाशत्वेन स्वागोचरत्वं बुद्ध्वा निरिन्धनाग्निवत्स्वयमेवोपशाम्यति।

## १.५. तत्र स्थितौ यत्नोऽभ्यासः॥१.१३॥

असंशयं महावाहो मनो दुर्निग्रहं चलम्। इति मनसः दुर्निग्रहत्वं तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् (श्रीमद्भगवद्गीता-६.३४) इति अर्जुनोक्तं अङ्गीकृत्य भगवान् अभ्यासवैराग्याभ्यां तन्निरोधः इति पातञ्जलमतमनुसृत्य अभ्यासेन तु कौन्तेय वैराग्येन च गृह्यते इति अभ्यास वैराग्ये मनोनिग्रहपायत्वेन प्रतिपादयति। अभ्यासस्य स्वरूपप्रतिपादनार्थं गूढार्थदीपिकायां प्रकृतसूत्रमुदाहृतं

मधुसूदनसरस्वतीभिः।

सूत्रार्थः योगसुधाकरे एवमभिवर्णितः– तत्र तयोर्मध्ये स्थितिर्नैश्चल्यं निरोधः, तत्र चर्मणि द्वीपिनं हन्ति, इतिवन्निमित्तार्थेयं सप्तमी। एवं च स्थितिनिमित्तको यत्नो मानस उत्साहः स्वत एव बहिःप्रवाहशीलं चित्तं सर्वथा निरोत्स्यामीत्येवंविध उत्साह आवर्त्यमानोऽभ्यास इत्युच्यते।[४] इति।

गूढार्थदीपिकायाम् एवमुक्तं - मन्त्रजपदेवताध्यानादीनां क्रियारूपाणामवृत्तिलक्षणोऽभ्यासः सम्भवात्। सर्वव्यापारोपरमस्य तु समाधेः को नामाभ्यास इति शङ्कां निवारयितुमभ्यासं सूत्रयति स्म तत्र स्थितौ यत्नोऽभ्यासः इति। तत्र स्वरूपावस्थिते द्रष्टरि शुद्धे चिदात्मनि चित्तस्यावृत्तिकस्य प्रशान्तवाहितारूपा निश्चलतास्थितिस्तदर्थं यत्नो मानस उत्साहः स्वभावचाञ्चल्याद्बहिष्प्रवाहशीलं चित्तं सर्वथा निरोत्स्यामीत्येवं विधः इति।

अत्रेदमनुसन्धेयम् - मनसः निग्रहस्तु अर्जुनोक्तदिशा वायुनिग्रह इव दुष्करः। कठोपनिषद्यप्युक्तम्–

पराञ्चिखानि व्यतृणत्स्वयम्भूस्-
तस्मात्पराङ्पश्यति नान्तरात्मन्।
कश्चिद्धीरः प्रत्यगात्मानमैक्षद्
आवृत्तचक्षुरमृतत्वमिच्छन्॥ (कठोपनिषत् २.१.१) इति।

अभ्यासेन तु दुष्करमपि कार्यं सुकरं भवतीत्यत्र वशिष्ठः प्रमाणम्। तथा हि-

अभ्यासेन निराबाधमेतास्ता योगयुक्तयः।
उपायतामुपायान्ति भव्यस्य भवभेदने॥
(लघुयोगवाशिष्ठरामायणम् ५.९.८७)

अपरोक्षानुभूतावभ्यासो निहितो वर्तते प्रत्याहार निरूपावसरे तथाहि-
विषयेष्वात्मतां दृष्ट्वा मनसश्चितिमज्जनम्।
प्रत्याहारः स विज्ञेयोऽभ्यसनीयो मुमुक्षुभिः॥ (अपरोक्षानुभूतिः १२१)।

## १.६. स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः॥ १.१४॥

असंशयं महाबाहो मनो दुर्निग्रहं चलम्। (श्रीमद्भगवद्गीता-६.३५) इति गीताश्लोकव्याख्यानावसरे इदं सूत्रं पूर्वोक्ताभ्यासस्य(१.१३) दृढतासम्पादनं कथं

[४]योगसूत्रवृत्तिः - १.१३

भवतीति प्रतिपादनावसरे तथा–

एतस्याहं न पश्यामि चञ्चलत्वात्स्थितिं स्थिराम्। (श्रीमद्भगवद्गीता-६.३३)

इति अर्जुनस्य मनोनिग्रहविषयक संशयापनयनाय च प्रस्तुतमस्ति। सूत्रार्थः योगसुधाकरे एवं वर्णितः– यदि दिवसैर्मासैर्वा समाधिसिद्धिः वाञ्छेत्, तदा विद्यमानाश्चत्वार एव वेदाः, तानध्येतुं गतस्य माणवकस्य पञ्च दिवसा अतीताः, नाद्याप्यसौ समागतः, इति मूढवचनानुसार्येवायं योगी स्यात्। अतः संवत्सरैर्जन्मभिर्वा दीर्घकालं योग आसेवितव्यः। तथा च स्मर्यते– अनेकजन्मसंसिद्धस्ततो याति परां गतिम् इति। यदि चिरमासेव्यमानोऽपि विच्छिद्य विच्छिद्यासेव्येत, तर्ह्युत्पद्यमाना योगसंस्काराः समनन्तरभाविविच्छेदकालीनैर्व्युत्थानसंस्कारैरभिभूयेरन्। अतो निरन्तरमासेवितव्यः। सत्कार आदरः। अनादरे लयविक्षेपकषायादयः प्रसह्येरन्। तस्मादादरेणासेवितव्य। दीर्घकालादित्रैविध्येनासेवितव्य समाधेर्दृढभूमित्वं नाम प्रबलतरदुःखेनापि चालयितुमशक्यत्वम्। तच्च स्मर्यते - यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते [५] इति।

गूढार्थदीपिकायाम् एवमुक्तम्– अनिर्विदेन दीर्घकालासेवितो विच्छेदाभावेन निरन्तरासेवितः सत्कारेण श्रद्धातिशयेन चाऽसेवितः। सोऽभ्यासो दृढभूमिर्विषयसुखवासनया चालयितुमशक्यो भवति। अदीर्घकालत्वे दीर्घकालत्वेऽपि विच्छिद्य विच्छिद्य सेवने श्रद्धातिशयाभावे च लयविक्षेपकषायसुखास्वादानामपरिहारे व्युत्थानसंस्कारप्राबल्याद्दृढभूमिरभ्यासः फलाय न स्यादिति त्रयमुपात्तम्।

अत्रेदमवधेयं यत् योगसिद्धिरेव न, तत्त्वज्ञानसिद्धिरपि दीर्घकालनैरन्तर्यसत्कारसेवनं विना न फलं स्यादिति। तथाहि छान्दोग्ये अष्टमाध्याये श्रुयते देवराजः इन्द्रः असुरराट् विरोचनस्य आत्मज्ञानार्थं प्रजापतिसमीपाजग्मतुः इति। तौ हासंविदानावेव समित्पाणी प्रजापतिसमीपमाजग्मतु (छान्दोग्योपनिषद्- ८.७.२) इति। तदनन्तरम्–

तौ ह द्वाविंशतं वर्षाणि ब्रह्मचर्यमूषतुः। (छान्दोग्योपनिषत् ८.७.३)

तैत्तिरीयोपनिषदि भृगुर्वै वारुणिः इत्यादिना भृगुः प्रत्यग्भिन्नं ब्रह्म साक्षात्कर्तुं पित्रा चोदितं मार्गं अभ्यस्य दृढता सम्पादनार्थं पुनः पुनः पितरमुपससारेति।

---

[५]योगसूत्रवृत्तिः -१.१४

तथाहि पुनरेव वरुणं पितरमुपससार अधीहि भगवो ब्रह्मेति। इति।

द्वात्रिंशतं वर्षाणि ब्रह्मचर्यं व्रतमनुतिष्ठन्तौ प्रजापतेः उपदेशं प्रतीक्षमाणौ इति श्रूयते। तौ ह द्वात्रिंशतं वर्षाणि ब्रह्मचर्यमूषतुः। प्रजापत्युपदेशानन्तरं विरोचनः असुरराट् अधिककालं यापयितुमशक्तः स्वस्थानं गतवान्। पूर्णं फलं च न प्राप। इन्द्रस्तु दीर्घकालसत्कार्यसेवनेन प्रजापतिनोपदिष्टमात्मज्ञानं यथावत् प्राप्नोदिति। तथाहि– एतं त्वे ते भूयोऽनुव्याख्यास्यामि वसापराणि द्वात्रिंशतं वर्षाणीति स हापराणि द्वात्रिंशतं वर्षाण्युवास तस्मै होवाच। (छान्दोग्योपनिषत् ८.९.३) इति।

एवं त्वेव ते भूयोऽनुव्याख्यास्यामि नो एवान्यत्रैतस्माद्वसापराणि पञ्चवर्षाणीति स हापराणि पञ्च वर्षाण्युवास तान्येकशतं सम्पेदुरेतत्तद्यदाहुरेकशतं ह वै वर्षाणि मघवान्प्रजापतौ ब्रह्मचर्यमुपवास तस्मै होवाच। इति।

सत्कारोऽपि तत्त्वज्ञानलाभाय आवश्यकम् इति प्रश्नोपनिषद् सूचयति। तथाहि- तपसा ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्य ...। (प्रश्नोपनिषद्- १.२) इति।

गौडपादाः अपि अत्र प्रमाणं भवति। तथाहि-

उत्सेक उदधेर्यद्वत्कुशाग्रेणैकबिन्दुना।
मनसो निग्रहस्तद्वद्भवेदपरिखेदतः॥ (गौडपादकारिका ३.४१) इति।

उत्सेक उत्सेचनं शोषणाध्यवसायेन जलोद्धरणमिति यावत्। अत्र सम्प्रदायविद् आख्यायिकामाचक्षते। कस्यचित्किल पक्षिणोऽण्डानि तीरस्थानि तरङ्गवेगेन समुद्रोऽपजहार। स च समुद्रं शोषयिष्याम्येवेति प्रवृत्तः स्वमुखाग्रेणैकैकं जलबिन्दुमुपरि प्रचिक्षेप। तदा च बहुभिः पक्षिभिर्बन्धुवर्गैर्वार्यमाणोऽपि नैवोपरराम। यदृच्छया च तत्राऽगतेन नारदेन निवारितोऽप्यस्मिञ्जन्मनि जन्मान्तरे वा येन केनाप्युपायेन समुद्रं शोषयिष्याम्येवेति प्रतिजज्ञे। ततश्च दैवानुकूल्यात्कृपालुर्नारदो गरुडं तत्साहाय्याय प्रेषयामास समुद्रस्त्वज्ज्ञातिद्रोहेण त्वामवन्यत इति वचनेन। ततो गरुडपक्षवातेन शुष्यन्समुद्रो भीतस्तान्यण्डाणि तस्मै पक्षिणे प्रददाविति एवमखेदेन मनोनिरोधे परमधर्मे प्रवर्तमानं योगिनमीश्वरोऽनुगृह्णाति। ततश्च पक्षिण इव तस्याभिमतं सिद्ध्यतीति भाव।

आवृत्तिरसकृदुपदेशात् ,(ब्रह्मसूत्रम ४.१.१) लिङ्गाच्च (ब्रह्मसूत्रम् ४.१.२) इति आवृत्त्यधिकरणमपि स्मर्तव्यम्।

दृष्टानुश्रविकविषयतवितृष्णस्य वशीकारसंज्ञा वैराग्यम्॥

असंशयं महाबाहो मनो दुर्निग्रहं चलम्।

अभ्यासेन तु कौन्तेय वैरागेन च गृह्यते। (श्रीमद्भगवद्गीता-६.३५)

इत्यत्र वैराग्यस्य परापरभेदेन द्वैविध्यं भनसिनिधानं अपरवैराग्यस्य स्वरूपप्रतिपादनार्थं गूढार्थदीपिकायाम् इदं सूत्रं उदाहृतं मधुसूदनसरस्वतीभिः। मनस्यपि तृष्णाशुन्यत्वेन सर्वथा वैतृष्ण्यं तृष्णाविरोधिनी चित्तवृत्तिज्ञानप्रसादरूपा वशीकारसंज्ञा वैराग्यं सम्प्रज्ञातस्य समाधेरन्तरङ्गं साधनमसम्प्रज्ञातस्य तु बहिरङ्गं इति।

वैराग्यविषयेऽपरोक्षानुभूतावेवमुक्तम्–

स्ववर्णाश्रमधर्मेण तपसा हरितोषणात्।
साधनं च भवेत्पुंसां वैराग्यादिचतुष्टयम्॥
ब्रह्मादिस्थावरन्तेषु वैराग्यं विषयेष्वनु।
यथैव काकविष्ठायां वैराग्यं तद्धि निर्म्मलम्॥ (अपरोक्षानुभूतिः ३-४) इति।

एतादृशदृष्टानुश्रविकविषयवैतृष्ण्यं धीरे नचिकेतसि उपलभ्यते। स हि यमेन प्रलोभितः। तथाहि-

शतायुषः पुत्रपौत्रान्वृणीष्व वहुन्पशुन्हस्तिहिरण्यमश्वान्
भूमेर्महदायतनं वृणीष्व स्वयं च जीव शरदो यावदिच्छसि॥
एतत्तुल्यं यदि मन्यसे वरं वृणीष्व वित्तं चिरजीविकं च ।
महाभूमौ नचिकेतस्त्वमेधि कामानां त्वां कामभाजं करोमि॥
इमा रामाः सरथा सतूर्या न हीदृशा लम्भनीया मनुष्यैः।
आभिर्मत्प्रत्ताभिः परिचारयस्व नचिकेतो मरणं मानुप्राक्षीः॥ (कठोपनिषत् १.१.२३-२५)

नचिकेतसः अपरवैराग्यमपि तत्रैव मन्त्रेण प्रतिपाद्यते।

श्वोभावा मर्त्यस्य यदन्तकैतत्सर्वेन्दियाणां जरयन्ति तेजः।
अपि सर्वं जीवितमल्पमेव तवैव वाहास्तव नृत्यगीते॥ (कठोपनिषत् १.१२६) इति।

साधनचतुष्टयसम्पत्त्यन्तर्गत इहामुत्रफलभोगविरागरूपा द्वितीया साधनसम्पत्तिः प्रकृतयोगसूत्रेण (यो.सू-१.१५) प्रतिपाद्यते।

## १.७. तत्परं पुरुषख्यातेर्गुणवैतृष्णम्॥ १.१६ ॥

असंशयं महावाहो मनो दुर्निग्रहं चलम्। इति।

अस्य श्लोकस्य व्याख्यानावसरे अभ्यासवैराग्याभ्यां तन्निरोधः इति पातञ्जलमतमनुसृत्य अभ्यासेन तु कौन्तेय वैराग्येन च गृह्यते इति अभ्यास वैराग्ये मनोनिग्रहोपायत्वेन प्रतिपाद्य परापर भेदेन वैराग्यं विभज्य परवैराग्यनिरूपणार्थम् इदं सूत्रम् उदाहृतं गूढार्थदीपिकायां मधुसूदनसरस्वतीभिः।

गूढार्थदीपिकायामस्य सूत्रस्याशय एवमभिवर्णितः। सम्प्रज्ञातसमाधिपाटवेन गुणत्रयात्मकात्प्रधानाद्विविक्तस्य पुरुषस्य ख्यातिः साक्षात्कार उत्पद्यते। ततश्चाशेषगुणत्रयव्यवहारेषु वैतृष्ण्यां यद्भवति तत्परं श्रेष्ठं फलभुतं वैराग्यम्। तत्परिपाकनिमित्ताच्च चित्तोपशमपरिपाकादविलम्बेन कैवल्यमिति।

अत्रेदमनुसन्धेयम्– परापरवैराग्ययुक्तः पुरुषः जीवन्मुक्तो भवति। अतः अवश्यं परापरवैराग्ये सम्पादनीये। तेन वश्यात्मना (वश्यः स्वाधीनः विषयपारतन्त्र्यशुन्य आत्मा अन्तकरणं यस्य तेन)यतमानेन वैराग्येण विषयस्तोतः खिलीक्रीयते। सर्वचित्तवृत्तिनिरोधरूपः योगः प्राप्तुं शक्यते।

तत्परं पुरुषख्यातेः गुणवैतृष्णम् (यो.सू-१.१६)इति परवैराग्यसम्पन्नस्य स्थितिः मुण्डकोपनिषदि लभ्यते। तथा हि–

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे॥(मुण्डकोपनिषत् २.२८)

इति।

योगयुक्तात्मनः यतमानस्य चित्तचाञ्चल्यनिमित्तानि प्रारब्धकर्माण्यपि योगमहिम्ना अभिभूतानि भवन्ति इति गूढार्थदीपिकायाम्। तत्र कश्चन विचारः प्रस्तुतः स यथाग्रन्थमत्र लिख्यते।

कथमतिबलवतामारब्धभोगानां कर्मणामभिभवः, उच्यते– उपायत उपायात्। उपायः पुरुषकारस्तस्य लौकिकस्य वैदिकस्य वा प्रारब्धकर्मापेक्षया प्राबल्यात्। अन्यथा लौकिकानां कृष्यादिप्रयत्नानां वैदिकानां ज्योतिष्टोमादिप्रयत्नानां च वैयर्थ्यापत्तेः। सर्वत्र प्रारब्धकर्मसदसत्त्वविकल्पग्रासात्प्रारब्धकर्मसत्त्वे तत एव फलप्राप्तेः किं पौरुषेण प्रयत्नेन,तदसत्त्वे तु सर्वथा फलासंभवात्किं तेनेति। अथ कर्मणः स्वयमदृष्टरूपस्य दृष्टसाधनसंपत्तिव्यतिरेकेण फलजननासमर्थत्वादपेक्षितः कृष्यादौ पुरुषप्रयत्न इति चेत्। योगाभ्यासेऽपि समं समाधानं तत्साध्याया जीवन्मुक्तेरपि सुखातिशयरूपत्वेन प्रारब्धकर्मफलान्तराभावात्। अथवा यथा प्रारब्धफलं कर्म तत्त्वज्ञानात्प्रबलमिति कल्प्यते दृष्टत्वात्, तथा तस्मादपि कर्मणो योगाभ्यासः

प्रबलोऽस्तु शास्त्रीयस्य प्रयत्नस्य सर्वत्र ततः प्राबल्यदर्शनात्।

तथा चाऽह भगवान्वशिष्ठः–

सर्वमेवेह हि सदा संसारे रघुनन्दन।
सम्यक्प्रयुक्तात्सर्वेण पौरुषात्समवाप्यते॥
उत्छास्त्रं शास्त्रितं चेति पौरुषं द्विविधं स्मृतम्।
तत्रोच्छास्त्रमनर्थाय परमार्थाय शास्त्रितम्॥

उच्छास्त्रं शास्त्रप्रतिषिद्धिमनर्थाय नरकाय। शास्त्रितं शास्त्रविहितमन्तःकरणशुद्धिद्वारा परमार्थाय चतुर्ष्वर्थेषु परमार्थाय मोक्षाय।

शुभाशुभाभ्यां मार्गाभ्यां वहन्ती वासना सरित्।
पौरुषेण प्रयत्नेन योजनीया शुभे पथि॥
अशुभेषु समाविष्टं शुभेष्वेवावतारय।
स्वमनः पुरुषार्थेन बलेन बलिनां वर॥
द्रागभ्यासवशाद्याति यदा ते वासनोदयम्।
तदाऽभ्यासस्य साफल्यं विद्धि त्वमरिमर्दने॥
संदिग्धायामपि भृशं शुभामेव समाहर।
शुभायां वासनावृद्धौ तात दोषो न कश्चन॥
अव्युत्पन्नमना यावद्भवानज्ञाततत्पदः।
गुरुशास्त्रप्रमाणैस्त्वं निर्णीतं तावदाचर॥
ततः पक्वकषायेण नूनं विज्ञातवस्तुना।
शुभोऽप्यसौ त्वया त्याज्यो वासनौघो निरोधिना॥ इति।

तस्मात्साक्षिगतस्य संसारस्याविवेकनिबन्धनस्य विवेकसाक्षात्कारादपनयेऽपि प्रारब्धकर्मपर्यवस्थापितस्य चित्तस्य स्वाभाविकीनामपि वृत्तीनां योगाभ्यासप्रयत्नेनापनये सति जीवन्मुक्तः परमो योगी। इति शम्।

☆ ☆ ☆

# कुन्तकस्यावदानम् : तुलनात्मकमध्ययनम्

सीतानाथ आचार्यः*

यथा तावद् दार्शनिकचिन्तायां यथा च मानविकज्ञानविज्ञानधाराया बहुविस्तृते विभागान्तरसमवाये भारतीयमनीषाया निरवद्यमवदानं विद्योततेतरां विश्वविदग्धपरिषदि तथैव काव्यस्य विरचनविस्तरे समीक्षापरिसरे च भारतीयायाः कविप्रतिभायाः काव्यमीमांसाप्रज्ञायाश्च महिममयं स्थानं चिराय चकास्ति। संस्कृतसाहित्यसृष्टेर्मनोरमाणि निदर्शनानि सुप्राचीने वैदिकवाङ्मये सुलभरूपाण्येव। संस्कृतसाहित्यमीमांसायाः प्रारम्भिकं सुनिर्दिष्टं विवरणं यद्यपि महाकालेन कवलीकृतं तथापि खृष्टजन्मनो बहोः कालात् पूर्वत एव संस्कृतकाव्यतत्त्वविषयकं चिन्तनजातं प्रचरद्रूपमासीदित्यनुमानस्य दृढतरं प्रमाणं परिप्राप्यते। सेयं संस्कृतभाषानिबद्धा काव्यमीमांसाधारा सुप्राचीनकालतः प्रवहन्ती बह्वीः शताब्दीः समभिव्याप्य विराजन्ती काले काले प्रादुर्भूतानां काव्यरहस्यनिर्ध्यानपराणां विविधदिग्गामिना भावनावैचित्र्येण विवृद्धिमापन्ना साहित्यतत्त्वमीमांसाया वैश्विके परिमण्डले विशिष्टतमं स्थानमादधाना साम्प्रतिकसाहित्यसृष्टिसमीक्षाविधानपि यथोचितं समुपयोगितामावहतीत्यत्र नास्ति विप्रतिपत्तेर्लेशोऽपि।

अतुलचन्द्रगुप्तसुरेन्द्रनाथदासगुप्तसुधीरकुमारदाशगुप्तक्षुदिरामदासप्रमुखा बहव आधुनिकाः साहित्यसमीक्षकाः संस्कृतसाहित्यसमीक्षापद्धतेर्गौरवं भूयो भूयो निगदितवन्तः। तेषु दिग्दर्शनन्यायेन सुधीरकुमारदाशगुप्तस्य मतमेव समुपस्थाप्यते। दाशगुप्तमहाभागेन संस्कृतकाव्यालोकग्रन्थस्य दशमे पृष्ठे यदुक्तं तस्य भावः संस्कृतेनोपस्थाप्यते। अलङ्कारशास्त्रं काव्यशास्त्रं वा एतादृश एको विषयो यत्र भारतीयानामात्मश्लाघाया बहूनि कारणानि विद्यन्ते। कस्मिन्नपि विषये पाश्चात्त्यकाव्यमीमांसाशास्त्रेषु यस्य तत्त्वस्य समीक्षायाः प्रारम्भिकी अवस्था संस्कृतकाव्यमीमांसाशास्त्रेषु तस्य परिपक्वः सिद्धान्तो दृक्पथमायाति। पुनः पाश्चात्त्यकाव्यतत्त्वसमीक्षायाः साम्प्रतिके समये अनेके विस्मयावहाः सिद्धान्ता भारतीयैराचार्यैः अष्टाभ्यो दशभ्यो वा शतकेभ्यः पूर्वं बाहुल्येन परिनिष्ठापिता इत्यत्रास्ति प्रमाणम्। तथाहि ब्राड्ले-रिचार्डस् (Bradly, A.C., Rechards,

---

*आशुतोषाध्यापकचरः, संस्कृतविभागे, कलिकाताविश्वविद्यालयस्य, कलिकातास्थस्य। राष्ट्रपतिपुरस्कारभाक्।

9.A.) इत्यादयः अद्यत्वे यद्यत्तत्त्वं समीक्षितुं प्रवृत्तास्तत्तत्तत्त्वं यदि तावत् सहस्रवत्सरेभ्यः पूर्वं प्रायेण परिपूर्णाभिमततया आनन्दवर्धनस्याभिनवगुप्तस्य चालोचनायां परिप्राप्तं भवति, यदि वा ओयालाटारपोटारः (Pater Walter) नवशतवत्सरपूर्ववर्तिनः कुन्तकस्य मार्गे भ्रमन्नभिलक्ष्यते तर्हि किमस्माकमानन्दो न जायते? तेन चानन्देनात्मशक्तेरुद्बोधः किं न भवति?

विशिष्टानां बहुनामालङ्कारिकाणां विविधेषु अलङ्कारग्रन्थेषु विद्यमानेष्वपि स्वकृतेर्नवीनस्य वक्रोक्तिजीवितग्रन्थस्य प्रणयनोद्देश्यं वर्णयता कुन्तकेनोक्तं–

लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये।
काव्यस्यायमलङ्कारः कोऽप्यपूर्वो विधीयते॥ इति।

वैचित्र्यमित्यस्यार्थो वक्रोक्तिः। तदेव लोकोत्तरचमत्कारकारि अलौकिककाव्यानन्दजनकम्। अस्यैव वक्रोक्त्यपरनामकस्य वैचित्र्यस्य निष्पत्तिप्रकारं प्रदर्शयितुमेव नवीनऽयमलङ्कारग्रन्थो निर्मीयते। रचितपूर्वे कस्मिन्नपि ग्रन्थे वैचित्र्यस्यास्य व्याख्यानं नास्ति। वैचित्र्यापरनामिकाया वक्रोक्तेः स्वरूपं विविधे प्रसङ्गे तेन बहुधा निरूपितम्। क्वचिदुक्तं प्रसिद्धप्रस्थानव्यतिरेकि वैचित्र्यम् अथवा शास्त्रादिप्रसिद्धशब्दार्थोपनिबन्धव्यतिरेकि वैचित्र्यम्। कुत्रापि कथितं - प्रसिद्धाभिधानव्यतिरेकि विचित्रैवाभिधा। एताभिरुक्तिभिर्वक्रोक्तेः स्वरूपमेव पर्यवस्यति यत् लौकिकभावप्रकाशिकाभ्य उक्तिभ्यस्तथा शास्त्रीयतत्त्वप्रतिपादिकाभ्यो वाग्भङ्गीभ्यो भिन्ना तावत् काव्यरचनाशैली। विलक्षणौ तावत् काव्ये व्यवहृतौ शब्दार्थौ। कुन्तकस्याभिमतं खण्डयितुं प्रवृत्तेन महिमभट्टेन यदुक्तं तेनापि वक्रोक्तेर्निरुक्तं स्वरूपं प्रतिष्ठितं भवति। तथा चोक्तं तेन–

प्रसिद्धमार्गमुत्सृज्य यत्र वैचित्र्यसिद्धये।
अन्यथैवोच्यते सोऽर्थः सा वक्रोक्तिरुदाहृता॥

खृष्टपूर्वचतुर्थशताब्दीसम्भवत्वेन सम्भावितस्य ग्रीकदार्शनिकस्य एरिष्टटलमहोदयस्य काव्यचिन्तया सह किञ्चन सादृश्यं बिभर्ति कुन्तकस्य वक्रोक्तिसमाश्रयेयं काव्यचिन्ता। तथाहि काव्यशैल्या ग्रथने व्यवहारसामान्यातिरिक्तस्य शब्दस्य रूपकस्य प्रसारितरूपबन्धस्य प्रयोगे गौरवमारोपितमनेन। तादृशो विलक्षणः प्रयोग एव साहित्यिकभाषां लौकिकभाषातः पृथक्करोति, साहित्यिकभाषाशैलीं स्वच्छां गतानुगतिकताया ऊर्ध्वं संस्थाप्य सरसां विधत्ते। लौकिकसाधारणशब्दव्यवहारतोऽपसृतिरियं साहित्यिकभाषाशैल्या अनितरसाधारणतायाः सरसतायाश्च हेतुभूता। एतदर्थं शब्दबन्धं प्रसारितं

संक्षेपितं रूपान्तरितं वा कुर्यात् कविः। आरिष्टटलेन तदीये Poetics इति ग्रन्थे भाषाया अष्टानामंशानामालोचनाया अन्तिमे Diction इत्यंशे एवमुक्तं– "The diction becomes distinguished and non-prosaic by the use of unfamiliar terms, I,e. Strange words, metaphors, lenthened forms, and everything that deviates from the ordinary modes of speech…what helps most, however, to render the Diction at once clear and non-prosiac is the use of the lenthened, curtailed and altered forms of words. That deviation from the ordinary words will, by making the language unlike that in general use, give it a non-prosaic appearance." (Ingram Bywaker इत्याख्येन विदुषानूदितम्)।

टिलियार्ड-(Tillyard), सोस्यूर (Saussure), मुकारभोस्कि (Mukarovasky) प्रमुखाः पाश्चात्त्यभाषाविज्ञानाश्रयिणो नन्दनतात्त्विका भाषां तथा साहित्यं निर्माणशैल्या दृक्कोणतो विचारयन्ति। तेषां विचारधारा शैलीविज्ञाननाम्नाभिधीयते। एतेषां प्रधानं वक्तव्यं तावत् साहित्यस्य भाषा प्रात्यहिकव्यवहारिकभाषातो भिन्नरूपा। दिग्दर्शनन्यायेन मुकारोभस्किमहाभागस्य समीक्षायाः पङ्क्तिविशेषः समुद्ध्रियते- "Poetic language is a different form of language with a different function that of the standard." अस्यायमाशयः - काव्यिकभाषा तावत् साधारणभाषाया भिन्नस्वरूपा; प्रचलिताया वृत्तेर्भिन्नया वृत्त्या युक्ता च। आलोकजाण्डारवारि महोदयेनोक्तं– "A figure of speech is a deviation from the plain and ordinary mode of speaking for the sake of greater effect; it is and unusual form of speech." उक्तेरस्या अयमाशयः– काव्यस्यालङ्कारस्तावत् महत्तमोद्देश्यसिद्धये सरलायाः साधारणायाः कथ्यभाषाया अपसृतिः अयम् (अलङ्कारः) तावद् भाषायाः स्वाभाविकेतरं रूपम्। फ्रान्स्देशीयकविना पलभालेरिमहाभागेन मन्यते काव्यभाषा प्रचलितभाषाधारेण एका (नवीना) भाषा तस्य मते कविस्तावद् भाषाप्रयोगविधौ व्यतिक्रमी, व्यतिक्रमस्य स्रष्टा- भाषामाध्यमेन रचनाकर्म कर्तुं, भाषायां वा रचनाकर्म कर्तुं– "a poet is a deviator, a maker of deviation…in order to work through a language, on a language." प्रतीच्यसाहित्यसमीक्षकाणां निरुक्तदृष्टिभिः सह कुन्तकस्य वक्रोक्तेः मौलस्वरूपचिन्ताया महदेव सादृश्यं

सुतरामेवापतति तुलनात्मकसाहित्यमीमांसकानां दृष्टौ। बङ्गीयकविसमीक्षकाणां काव्याश्रयिचिन्तायामपि कुन्तकस्य वक्रोक्तिभावनासाजात्यं दृष्टिपथमायाति। तथाहि मोहितलालमजुमदारेण साहित्यविचारे समीरितं– "भावके अविकल यथायथरूपे प्रकाश करिवार जन्य भाषाके साधारण धर्म हइते एकटि भिन्न धर्म ग्रहण कराइते हय।" उक्तेरस्या अयमाशयः - कवेर्भावस्य अविकलयथायथप्रकाशनाय भाषा साधारणधर्मतो भिन्नमेकं धर्मं ग्राहयितव्या। मोहितलालकथितो ग्राहयिष्यमाणोऽयं विलक्षणो भाषाधर्मः कुन्तकप्रोक्ताया वक्रोक्तेरनुरूपतां किं न व्रजति? भाषा ओ छन्द इति कवितायां रवीन्द्रनाथेनोक्तं–

मानुषेर जीर्ण वाक्ये मोर छन्द दिवे नव सुर
अर्थेर बन्धन हते निये तारे यावे किछु दूर
भावेर स्वाधीनलोके।

अस्यायं भावः–

जीर्णवाक्ये नृणां छन्दो मम दद्यात् सुरं नवम्।
अर्थबन्धात् कियद्दूरं वाक्यं तन्नेष्यते किल।
भावलोके निजायन्ते॥

विश्वकवेरनयोक्त्या एतदभिहितं भवति यत् छन्दसः स्पर्शेन मानवानां प्रात्यहिकं साधारणं वाक्यं नवीनतात्पर्यवाहिनि काव्यवाक्ये परिणमति। अतः साधारणवाक्याद् भिन्नतरं काव्यवाक्यमिति परिप्राप्तं भवति। वक्रोक्तितत्त्वं विहायापि कुन्तकस्य काव्यदर्शने प्रतिविम्बितानि तत्त्वान्तराणि अद्यत्वेऽपि प्रासङ्गिकतां न जहाति। तथाहि काव्यं तावदेका खण्डरहिता सम्पूर्णा सृष्टिरिति कुन्तकेन मन्यते। सालङ्कारस्य काव्यतेति कारिकांशस्य (१/६) व्याख्याने वृत्तावेवमुक्तम्– अलङ्करणसहितस्य सकलस्य निरस्तावयवस्य स्वतः समुदायस्य काव्यता कविकर्मत्वम्। अस्यायं भावः कविचित्तस्य भावराशिः प्रकाशस्य दुर्वारगतिवेगेन वाङ्मयमूर्तिं परिगृह्णन्ती काव्यसंज्ञां लभते। तादृशस्य भावस्योपलब्धिस्तथाभिव्यक्तिरिति द्वयमेव तावत् प्रतिभासाध्यम्। कवेरुपलब्धिर्यथा खण्डरहिता एका निरवयवा च तथा तस्य प्रकाशात्मकं शिल्पकर्मापि। काव्यस्वरूपस्यैतादृशाविभाज्यत्वस्वरूपचिन्तने आनन्दवर्धनाभिनवगुप्तयोराधमर्ण्यं कुन्तकस्यानस्वीकार्यम्। यथा वा भवतु वस्तुस्थितिः। कुन्तकस्यास्याः काव्यदृष्टेरानुरूप्यं साम्प्रतिकसाहित्यसमीक्षावर्त्मनि न दुर्लभम्। वक्तव्यस्यास्य समर्थनाय

रवीन्द्रनाथस्य साहित्यधर्मप्रबन्धतोंऽशविशेषः समुद्ध्रियते। तत्र तेनोक्तं– "सेइ भाव सेइ भावना सेइ आविर्भाव याके प्रकाश करते गेलेइ अलङ्कार आपनि आसे, तर्के यार प्रकाश नाइ, सेइ हल साहित्येर। अलङ्कार जिनिस टाइ चरमेर प्रतिरूप...सेइ अलङ्कृत वाक्यइ हच्छे रसात्मक काव्य।"

अस्यायं भावः - स भावः सा भावना स आविर्भावो यस्य यस्या वा प्रकाशे अलङ्कारः स्वत एव समायाति तर्कशास्त्रे यस्य प्रकाशो नास्ति, तत्सर्वमेव साहित्यस्य। चरमस्य प्रतिरूपं तावदलङ्करणम्...। इदमेवालङ्कृतं वाक्यं तावत् रसात्मकं काव्यम्। प्रतीच्यसाहित्यसमीक्षकेण एवारक्रोम्बिमहाभागेन (Abercrombie) तदीये "The Idea of Great Poetry" इत्याख्ये ग्रन्थे उक्तं– "Poetry does not cousist of separable qualities, if it exists at al, it exists as an indivisible whole."

अस्यायं भावः - काव्यस्योपादानानि विच्छेदयितुं न शक्यन्ते। काव्यं चेद् भवति तर्हि तदविभाज्यसामग्रिकरूपेण भवति। पाश्चात्त्यदार्शनिकेन क्रोचेमहाभागेन (Croce) तदीयेAesthetic इत्यभिधेये ग्रन्थे नवने अध्याये कलावस्तुनो बहिरङ्गविभागमनङ्गीकुर्वतोक्तं– "The fact that we divide a work of art into parts, a poem into seenes, episodes, similies, sentences...such division anihilates the work, as dividing the organism into heart, brain, nerves, muscles and so on turns the living being into corpse." अस्य भाव एवम्– अस्माभिः किञ्चन शिल्पकर्म अंशैर्विभाज्यते किमपि काव्यम् अर्थवस्त्वलङ्कारवाक्यादिभिर्विभाज्यते। तादृशो विभागो विनाशयति शिल्पकर्म कविकर्म च; यथा हृदयमस्तिष्कशिरास्नायुप्रभृतिभिः देहस्य विभागो जीवन्तं प्राणिनं शवरूपतां नयति। काव्यालङ्कारयोस्तादात्म्यसम्बन्धं प्रतिष्ठापयता पुनरपि तेनोक्तं– "One can ask oneself how an ornament can be joined to expression. Externally? in that case it must always remain separate. Internally? in that case either it does not assist expression and mars it, or it does form part of it and is not ornament but a coustituant element of expression, indistinguishable from the whole."

अस्यायमाशयः - एतत् तावत् स्वात्मना विचार्यम्- अलङ्कारः

कथमभिव्यक्त्या युक्तो भवति। बहिरङ्गभावेन? तथा सति अयं सर्वथा पृथग्भूतस्तिष्ठेत्। अथ अन्तरङ्गभावेन? तथात्वे अयमभिव्यक्तेः सहायतां न कुर्यात् परन्तु इमां नाशयेदिदि एको विकल्पः। अपरो विकल्पस्तावत् अयमभिव्यक्तेरङ्गीभूतो भवति, अलङ्काररूपेण न तिष्ठति, भवति परं समग्राया अभिव्यक्तेर्मौलिकोपादानरूपाः। ओयालटेयारपोटारस्य मते ग्रहणयोग्योऽलङ्कारः प्राधान्येन काव्यस्याङ्गभूतः प्रयोजनभूतो वा "...permissible ornament being for the most part structural or necessary." कवीनां भावाभिव्यक्त्यवसरे शब्दाः स्वतःस्फूर्ततया समागच्छन्तीति कवेर्मधुसूदनस्यानुभूतिः राजनारायणवसुं प्रति लिखिते पत्रे एवं प्रकाशितास्ति– "I had no idea, my dear fellow, that our mother tongue would place at my disposal such an exhastivematerial and you know, I am not a good scholar. The thought and images bring out words with themselves- words that I never thought I know, here is a mystery..." अस्यायं भावः– बन्धो! मम मातृभाषा काव्यरचनायाः कृते ममाधिकारे पर्य्याप्तानि उपकरणानि स्थापयेत् इति विषये मम धारणा नासीत्। नाहमुत्तमो विद्वानिति त्वया ज्ञातमेव। (काव्यिकः) भावः (काव्यिकी) भावमूर्त्तिश्च अभिव्यक्तये अज्ञातपूर्वानपि शब्दान् आत्मना सह स्वत आनयतः। एतदेव रहस्यम्। मधूसूदनस्यानयोक्त्या कवेर्भावाभिव्यक्त्या सह काव्यिकशब्दानां स्वाभाविकः कश्चन सम्बन्धोऽभिद्योत्यते। तात्त्विकदृष्ट्या काव्यस्याविभाज्यत्वेऽपि व्यवहारिकदृष्ट्या तस्य विश्लेषणं कुन्तकस्यानुमतम्।

कुन्तकेन साहित्यशब्दस्य व्याख्याने सातिशयं कृतित्वं प्रदर्शितम्। काव्यं साहित्यमिति पदद्वयं समार्थकतयाद्यत्वे प्रचलितमस्ति। परन्तु संस्कृतकाव्यमीमांसायाः प्राथमिके पर्याये शब्दार्थौ सहितौ काव्यमित्यादिप्रकारके काव्यलक्षणे प्राप्यमाणेऽपि काव्यार्थे साहित्यशब्दस्य प्रयोगो न तथा दृष्टिपथमायाति। काव्यसाहित्यशब्दयोरनर्थान्तरत्वं प्रतिपादयता कुन्तकेन साहित्यशब्दस्य त्रिविधं व्याख्यानं प्रत्यक्षवृत्त्या विहितम्। अपरं व्याख्यानद्वयञ्च परोक्षवृत्त्या संसूचितम्।

तत्र काव्ये शब्दसमुदायेन सह अर्थसमुदायस्य सौन्दर्यसम्पदा या समीचीना प्रतिस्पर्धा सा साहित्यशब्दवाच्येति प्रथमं व्याख्यानम्। काव्ये विद्यमानशब्दसमुदायान्तःपातिनां प्रातिस्विकशब्दानां (शब्दव्यक्तीनां वा) तथा

अर्थसमुदाये विद्यमानानाम् अवान्तरार्थानां सौन्दर्यसम्पादनविधौ या सङ्गता प्रतिस्पर्धा सा साहित्यशब्दवाच्येति द्वितीयं व्याख्यानम्। शब्दार्थव्यतिरिक्तानाम् अलङ्कारगुणरीतिप्रमुखानां काव्योपादानानां सुसञ्जसा स्थितिः साहित्यम् इति तृतीयं व्याख्यानम्। एतद्व्यतिरेकेणापि कविचेतसा सह सहृदयचेतसो भावसम्मीलनं तथा काव्ये वर्ण्यमानजागतिकपदार्थैः सह कविचेतसो भावसम्मीलनं तथा काव्ये वर्ण्यमानजागतिकपदार्थैः सह कविचेतसो विशिष्टं मिलनम् अर्थात् आनन्दवर्धनसम्मता जागतिकपदार्थानां विभावताप्राप्तिरिति साहित्यद्वितयमपि कुन्तकेन सूचितम्। साहित्यशब्दस्यैतादृशं व्याख्यानमलङ्कारग्रन्थान्तरे दुर्लभम्। परन्तु आधुनिकानां साहित्यसमीक्षकाणां भावनायाः समीपचरम्। दिङ्मात्रमुद्भितिर्यथा रवीन्द्रनाथस्य "बांलाजातीय साहित्य" इति प्रबन्धतः। तत्र तेनोक्तं– "सहित शब्द हइते साहित्येर उत्पत्ति। अतएव धातुगत अर्थ धरिले साहित्य शब्देर मध्ये एकटि मिलनेर भाव देखिते पाओया याय। से ये केवल भावे भावे भाषाय भाषाय ग्रन्थे ग्रन्थे मिलन ताहा नहे- मानुषेर सहित मानुषेर अतीतेर सहित वर्तमानेर दूरेर सहित निकटेर अत्यन्त अन्तरङ्ग योगसाधन साहित्य व्यतीत आर किछुर द्वाराइ सम्भवपर नहे।"

अस्यायमाशयः– सहितशब्दात् साहित्यशब्दस्योत्पत्तिः। अतो व्युत्पत्तिगतार्थदृष्ट्या साहित्ये एकस्य मिलनस्य भावः परिलक्ष्यते। तन्न केवलं भावेन सह भावस्य, भाषया सह भाषायाः ग्रन्थेन सह ग्रन्थस्य वा मिलनमिति न; परन्तु मनुष्येण मनुष्यस्य अतीतेन सह वर्तमानस्य दूरेण सह निकटस्य अतीवान्तरयोगसाधनं साहित्यमृते केनापि अन्येन न सम्भवति। कुन्तकेन यद्यपि रवीन्द्रनाथेनेव अतीवव्यापकेऽर्थे साहित्यशब्दस्य प्रयोगो न विहितस्तथापि कुन्तकस्य साहित्यशब्दव्याख्या न व्याप्तिरहिता आलङ्कारिकान्तराणां ग्रन्थेषु अदृष्टचरा च। कुन्तकेन शब्दार्थयोः सुसमञ्जसस्थितिरूपं यत् प्राथमिकं साहित्यव्याख्यानं प्रदर्शितं तस्यानुरूपं चिन्तनं कार्लाइलमहाभागस्य "The Hero AS Poet" इति ग्रन्थे एवं प्राप्यते– "For body and soul, word and idea, go strangely together here as everywhere." अस्यायं भावः– यतो देह आत्मा च, शब्दोऽर्थश्च अत्रेव सर्वत्र सविस्मयं सह गच्छतः। कालिदासस्य मतेऽपि यथा अर्धनारीश्वररूपेण पार्वतीपरमेश्वरौ नित्यसम्बन्धौ तथैव वागर्थावपि काव्ये नित्यसाहित्ययुक्तौ। तथा चोक्तं तेन–

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।

जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥ इति।

कुन्तकेन साहित्यशब्दस्य यत्तृतीयं व्याख्यानमुपन्यस्तं तेन सह ओयालटारपेटार महोदयेन रचनाशैली चिन्ताया ग्रन्थे विद्यमानायाः तस्योक्तेरंशविशेषः समुद्ध्रियते। तेनोक्तं– "All the laws of good writing aim at a similar unity or identity of the mind in all the process by which the word is associated to its import…style is in the right way when it tends towards that. All depends upon the original unity, the vital wholeness and identity, of the initiatory apprehensive of view." अस्यायमाशयः शब्दस्यार्थेन सह सम्बन्धीभवनस्य सर्वासु प्रक्रियासु उत्तमरचनाया नियमास्तादृशमैक्यं सारूप्यञ्च लक्ष्यीकुर्वन्ति। शब्दसमवायस्य वाक्यस्य वाक्याङ्गस्य समग्राया रचनायाः सङ्गीतस्य प्रबन्धस्य वा तदीयोपजीव्यवस्तुना सह एकीकरणस्य रीतिरेव (style) कुन्तकदृष्ट्या साहित्यमेव यर्थार्थो मार्गो यदि तदभिमुखिनी गतिर्विद्यते तस्य। प्रारम्भिकोपलब्ध्यात्मकदृष्टे मौलिके ऐक्ये तथा प्राणगतायां सामग्रिकतायां सारूप्ये च सर्वं विश्राम्यति। अत्र ऐक्यपदेन (unity) मार्गपदेन (style) यत् प्रतिपादितं तत्तावत् कुन्तकाभिमतसाहित्यपदस्य तृतीयव्याख्यानेन समीकर्तुं शक्यते। कविचेतसा सह सहृदयचेतसः सुमहत्सायुज्यवशादेव सहृदयः काव्यार्थोपभोगे समर्थो भवतीति द्वयोरनयोः हृदययोः साहित्यमनस्वीकार्यमिति कुन्तकोक्तचतुर्थव्याख्यानस्यानुरूपं चिन्तनम् आङ्गलसाहित्यसमीक्षापरिसरे परिलक्ष्यमाणमस्ति। तथा चोक्तं क्रोचेमहाभागेन– "The activity of judgement which criticizes and recognizes the beautiful is identical with what produces it. The only difference lies in the diversity of circumstances, since in the one case it is a question of aesthetic production, in the other of reproduction. The activity which judges is called test; the productive activity is called genius, genius and test are, therefore, substantially identical." अस्य भावार्थ एवं– विचारधर्मिता या काव्यसौन्दर्यं समीक्षते समाद्रियते च सा तया अभिन्ना या इदं सृजति। यः कश्चित् प्रभेदः स तावत् परिस्थितेः वैचित्र्याश्रयी। तथाहि एकस्मिन् क्षेत्रे इदं सौन्दर्यस्य सृजनम्। अपरस्मिन् क्षेत्रे इदं तावत् पुनः सृजनम्। या कार्यकारिता (काव्यं) विचारयति सा समीक्षेत्युच्यते, सृष्टिधर्मिणी

कार्यकारिता प्रतिभेत्युच्यते। समीक्षा प्रतिभा चेति द्वितयमभिन्नमेव।

काव्यविरचनकाले जागतिकवस्तुभिः सह कविचित्तस्य साहित्यं कुन्तकेन यन्निगदितं तदपि पाश्चात्त्यसाहित्यसमीक्षकाणां सम्मतमेव। दिङ्मात्रमुद्धृतिर्यथा शेलीमहाभागस्योक्तितः। या चेत्थम्– "Poetry turns all things to loveliness; it exalts the beauty of that which is most beautiful and aids beauty to that which is most reformed." अस्या अयं भावः- काव्यं सर्वं सुन्दरं करोति; इदं तावत् सुन्दरतममपि महिममयं करोति, असुन्दरतममपि सुन्दरं करोति। दशरूपककृतापि उक्तं- सुन्दरमसुन्दरं वा वस्तु कविना भाव्यमानं रसभावतां प्राप्नोति। तथाहि–

रम्यं जुगुप्सितमुदारमथापि नीचमुग्रं प्रसादि गहनं विकृतञ्च वस्तु।
यद्वाप्यवस्तु कविभावकभाव्यमानं तन्नास्ति यन्न रसभावमपैति लोके॥

कविचित्तेन सह साहित्यवशादेव जागतिकपदार्थानां तादृशी सौन्दर्यमयस्वरूपता प्रकाशिता भवति।

साहित्यशब्दव्याख्यानावसरे कुन्तकेनैकत्रोक्तम्–

अपर्यालोचितेऽप्यर्थे बन्धसौन्दर्यसम्पदा।
गीतवद्धृदयाह्लादं तद्विदां विदधाति यत्॥

तथाहि अर्थे अज्ञातेऽपि साहित्यं शब्दबन्धसम्पदा गीतवत् हृदयानन्दं सम्पादयति। प्राचीनेनालङ्कारिकेण कुन्तकेन काव्यिकशब्दानां गीतिधर्मिता यात्र समीरिता आधुनिकसाहित्यसमीक्षकाणां समीक्षायामपि तादृशी चिन्ता बाहुल्येन प्रचरद्रूपा। शब्दस्य गीतिधर्मिताविषये कार्लइलमहाभागेनोक्तम्– "...all speech, even the commonest speech, has something of song in it ...Poetry, therefore, we will call musical thought." अस्य भावार्थः– सर्वस्मिन् वाक्ये, अतीवसाधारणे वाक्येऽपि सङ्गीतस्यांशविशेषो विद्यते। अतः साहित्यं सङ्गीतमयो चिन्तेति ब्रूमः। साम्प्रतिकाः साहित्यचिन्तकाः काव्यिकानां शब्दानां सङ्गीतधर्मिताम् अर्थानाञ्च चित्रधर्मिताम् अभ्युपगच्छन्ति। तथा चोक्तं रवीन्द्रनाथेन तदीये साहित्येति प्रबन्धे– "अत एव चित्र एवं सङ्गीतइ साहित्येर प्रधान उपकरण चित्र भावके आकार देय, सङ्गीत भावके गतिद दान करे। चित्र देह एवं सङ्गीत प्राण।" अस्यायं भावः– अतश्चित्रं सङ्गीतञ्च साहित्यस्य प्रधाने उपादाने। चित्रं भावम् आकृतियुक्तं करोति सङ्गीतं भावं गतियुक्तं करोति। चित्रं देहभूतं सङ्गीतं प्राणभूतम्। कुन्तकेन यद्यपि अर्थस्य चित्रधर्मिताविषये किमपि

नोक्तं तथापि शब्दस्य सङ्गीतमयता तेन सुस्पष्टं कथिता।

काव्यिकशब्दविषये कुन्तकस्य यदभिमतं तस्य प्रासङ्गिकता साम्प्रतिकसाहित्यपरिसहेऽपि प्राप्यमाणैव। काव्यिकशब्दस्य वैशिष्ट्यमधिकृत्य तेनोक्तं विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि। तथाहि बहुषु पर्य्यायवाचके समार्थकेषु वा शब्देषु विद्यमानेष्वपि कविना तादृशः शब्द एव प्रयुज्यते यस्य परिवर्तनेन कवेर्विवक्षा व्याहता भवेत्। कुमारसम्भवस्य पञ्चमसर्गगते द्वयं गतं सम्प्रति शोचनीयतामित्यादिश्लोके शिववाचकेषु बहुषु शब्देषु विद्यमानेष्वपि कपालीति शब्दः कालिदासेन प्रयुक्तः। शब्दमिमं विहायापरः कश्चित् शब्दः वीमत्सरसस्य स्थायिभावभूतां जुगुप्सामभिव्यञ्जयितुं न समर्थः। प्रसङ्गेऽस्मिन् तेन बहवः कविप्रयुक्ताः शब्दाः समीक्षिताः। पाश्चात्यकाव्यसमीक्षायामपि एतादृशी चिन्ता परिदृश्यते। उयाल्टारपेटार-महाभागेन “Appreciations, Style” इति ग्रन्थे एकत्र एवमुक्तं– “one word for the one thing, the one thought, amid the multitude of words, terms, that might just do: …the unique word, phrase, sentense, paragraph, essay or song absolutely proper to the single mental presentation of vision within.” अस्यायं भावः– असङ्ख्येयेषु पदेषु च एकस्य वस्तुन एकस्याश्चिन्तायाः कृते एकः शब्दः …अद्वितीयः शब्दः वाक्यार्थः वाक्यम्, अनुच्छेदः प्रबन्धो गीतिर्वा इत्येतत्सर्वं (व्यस्तरूपेण समस्तरूपेण) मानसोपस्थापनाय पूर्णतः पर्याप्तम्। विषयेऽस्मिन् प्रख्यातस्य कवेः “the best words in the best order” [उत्तमाः शब्दा उत्तमक्रमेण विन्यस्ताः काव्यं भवति।] इति काव्यसंज्ञाया विश्लेषणे ड्रिङ्कउयाटार महोदयेन “The Lyric” इति ग्रन्थे यदुक्तं तस्यांशविशेषः समुद्ध्रियते– “By word we mean as colridge must have meant, words used for a purpose which they alone can serve. Poetry is the communication through words of certain experiences that can be communicated in no other way.” अस्यायं भवेद् भावार्थः– शब्द इत्यनेन अस्माभिर्बोधयितुमिष्यते यथा कोलरिजेन बोधयितुमिषितं काव्यं स एव शब्दो यः शब्द उद्देश्यविशेषं साधयितुं व्यवह्रियते, य उद्देश्यं काव्यं तावत् शब्दमाध्यमेन कविचित्रस्य विशिष्टाया अभिज्ञतायाः सञ्चारणं, या अभिज्ञता अनुभूतिर्वा अन्येन केनापि पथा प्रकाशयितुं शक्यते।

संस्कृतकाव्यमीमांसकेषु कुन्तक एव केवल आलङ्कारिको यः

काव्यजीवितभूताया वक्रोक्तेस्तथा सर्वेषामपि कविकर्मणां भित्तिभूमौ प्रतिभां वैशद्येन प्रतिष्ठापितवान्। विषयेऽस्मिन् नूनमेवानन्दवर्धनेन विहितम्। अन्यैरालङ्कारिकैः केवलं काव्यकरणत्वेन प्रतिभायाः स्वीकृतिर्विहिता। परन्तु प्रतिभायाः कार्यकारिताविषये इदं किमपि नालोचितम्। वक्रोक्तेः कविप्रतिभामूलकत्वं व्यवस्थापयता कुन्तकेनोक्तं - वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते। तच्चैवं व्याख्यातं - वैदग्ध्यकविकर्मकौशलं तस्य भङ्गी विच्छित्तिः तया भणितिः। अन्यत्र क्वचित् क्वचित् वक्रोक्तिः कविव्यापार इत्युक्तम्। कविकर्म वा कविकौशलं वा कविव्यापारो वा पूर्वमेव प्रतिभासम्भवमिति कुन्तकेन क्वचित् सुस्पष्टविधया क्वचिदस्पष्टविधया प्रकाशितम्। उत्तरकालिकानामलङ्कारिकाणां विवरणादपि तदेव स्पष्टीभवति। तथाहि काव्यस्वरूपे आलङ्कारिकाणां विप्रतिपत्तिप्रदर्शनावसरे कुन्तकमतमुद्धरता रुय्यकेणोक्तं– वक्रोक्तिजीवितकारः वक्रोक्तिमेव प्राधान्यात् काव्यजीवितमुक्तवान्, व्यापारस्य प्राधान्यञ्च काव्यस्य प्रतिपदे। तत्र टीकाकृता जयरथेनोक्तं– व्यापारस्येति कविप्रतिभोल्लिखितस्य कर्मणः, कविप्रतिभानिवर्तितत्वमन्तरेण वक्रोक्तिरेव न स्यात्। कुन्तकस्य मते सर्वमेव काव्यं कविप्रतिभासम्भवं तत्रालङ्कारो वा रीतिर्वा ध्वनिर्वा रसो वा किमपि अन्यद् वा काव्यचमत्कृतेरुत्सभूतं भवतु नाम। अतश्च कुन्तकेन काव्यानामुत्कर्षापकर्षविचारो न कृतः। तस्य मते सर्वमेव कविकर्म काव्यपदवाच्यमलौकिकानन्ददायकञ्च स्यात् यदि तत् कविप्रतिभासम्भवं भवेत्। एवं कुन्तकेन सर्वेषां कविकर्मणां मूलं प्रतिभा व्यवस्थापिता। पाश्चात्त्यसाहित्यसमीक्षायां काव्यसृष्टौ सामान्ये न शिल्पसृष्टौ च प्रतिभाकल्पनादीनां या गौरववती भूमिका परिगणिता तया साम्यमतितरां बिभर्ति कुन्तकस्येयं प्रतिभातत्त्वचिन्ता। दिग्दर्शनन्यायेन कतिचन पाश्चात्त्यमतान्यत्र समुल्लिख्यन्ते। पञ्चदशशताब्दीयेन दुरार(Durer) महोदेन समीरितं– “Genius is unaccountable and inexhastible. Brought to perfection by study and observation it is the true source of original works of art.” अस्यायं भावः - प्रतिभा तावत् कारणनिरपेक्षाविषयिण्या मौलिकसृष्टेर्यथार्थकारणतां याति। देकार्तमहोदयेनोप्युक्तम्– “Genius, the gift of nature was looked upon as essential for poetic production.” अस्यायमाशयः - प्रकृतिदत्ता प्रतिभैव काव्यरचनाविधौ आवश्यकी। कान्तिचन्द्रपाण्डेमहाभागेन तदीये “Comparative Aesthetic” इति ग्रन्थे

वेकन-(Becon)मतमुद्धरतेवमुक्तं– "According to him (Becon) imagination produces poetry, memory produces history and reason produces philosophy." अस्यायं भावः कल्पना काव्यं शक्तेः जायते, स्मृतिशक्तेः इतिहासः प्रादुर्भवति युक्तिशक्तेः दर्शनं प्रादुर्भवति इति वेकनस्य मतम्।

रीतिचिन्तनेऽपि कुन्तकस्य स्वतन्त्रा दृष्टिः परिलक्ष्यते। विभावनादिभिः देशभित्तिकतया व्यवस्थापितं रीतितत्त्वं निराकृत्य कविस्वभावभेदमूलकं रीतितत्त्वं व्यवस्थापितं कुन्तकेन। कुन्तकस्य रीतिविषयिणीयं दृष्टिः आधुनिकसाहित्यसमीक्षकाणां रीतिचिन्तासमीपसञ्चारिणी ओयारस्फोल्डमहाभागेनोक्तं– "It (style) is that element of literary composition in which ...the writer unconsciously expresses his tempartment or circumstances." अस्यायं भावः– रीतिरियं साहित्यिकरचनायास्तादृशमुपकरणं यत्र कविरजानन्नेव आत्मनः स्वभावम् अवस्थां वा प्रकाशयति। अन्येऽपि ओयालटारपेटार-हाडसन-प्रमुखाः पाश्चात्त्यसमीक्षका रीतिविषयेऽनुरूपां मतधारां पोषयन्ति।

एवं वक्रोक्तेः स्वरूपसामान्यचिन्तने तस्याश्च काव्यात्मत्वव्यवस्थापने तात्त्विकदृष्ट्या काव्यसायविभाज्यस्वरूपत्वप्रतिष्ठापने काव्यसमार्थकतया साहित्यशब्दस्य व्याख्याने काव्यिकशब्दवैलक्षण्यविचारे कविकर्मणि प्रतिभाया गौरववत्या भूमिकाया उपगमे कविस्वभावभेदवशाद् रीतिभेदस्वीकरणे च कुन्तकस्य काव्यस्य समीक्षा सुतरामेव विलक्षणा साम्प्रतिकसाहित्यसमीक्षापद्धत्या सह सादृश्यं भजमाना देदीप्यते। कुन्तकस्य काव्यसमीक्षाया विद्यते साम्प्रतिकसमयसङ्गतिरिति प्रदर्शयता सुरेन्द्रनाथदासगुप्तेनोक्तं– निविष्ट हइया अनुधावन करिले देखा याय ताँहार प्राचीन परिभाषा मध्य दिशा सुस्पष्ट हइया उठियाछे। अस्यायमाशयः - साभिनिवेषं चिन्तने क्रियमाणे प्रतिभाति यत् तस्य ग्रन्थे अत्याधुनिकसाहित्यविचारपद्धतेराभासः तस्य प्राचीनपरिभाषामाध्यमेन स्पष्टत्वं गतः।

☆ ☆ ☆

# राधावल्लभकृतनाट्यद्वयस्य समीक्षा

सौम्यजित् सेनः*

## ०. उपोद्घातः

वैदिकं तथा लौकिकं संस्कृतमिव आधुनिकसंस्कृतसाहित्यवपुरपि विशालमित्यत्र नास्ति किमपि चित्रम्। अतः परीक्षितं स्वमहिम्ना च दृढीकृतमिदं सत्यं यदूनविंशविंशैकविंशशतकेषु विरचितानि संस्कृतसाहित्यानि कात्स्न्येंन ऐतिह्याधुनिकतयोः (Tradition and Innovation) सेतुरिव संयोगं स्थापयन्ति जनगणमानसं च मोहयन्ति वरीवर्तन्ते।

आधुनिकसंस्कृतसाहित्यस्य परिव्याप्तिर्बृहती व्यापिका सर्वदिग्गामिनी च। तस्यायं रत्नभाण्डः समुज्ज्वलः सञ्जातोऽनेकभारतीयबुद्धिदीप्त्या, सुप्रभोऽभूदनेकमणिमाणिक्यादिप्रभया, समृद्धश्च संबभूव बह्वदम्यमनीषासंस्पर्शेन। रत्नकोशस्यास्यैव भारतहीरकहारस्यान्यतममौक्तिकस्वरूपाः तावत् श्रीराधा-वल्लभ-त्रिपाठिमहाभागाः।

मदीयोऽयं प्रबन्धस्तु तस्यैव कविवर्यस्य स्वकपोलकल्पितकृतिद्वयस्या-लोचनात्मकः। ते तावत्– धीवरशाकुन्तलम् , मशकधानी।

उपर्युक्तयो रूपकयोः पर्यालोचनेनास्मन्नयनपथमारोहति काचिद्विशिष्टता यदाधुनिकसंस्कृत-रूपकाणि भरतमुनिकृतनाट्यशास्त्रेण प्रभावितानि सन्त्यपि कात्स्न्येंन नानुकुर्वन्ति नाट्यशास्त्रम्। आधुनिकविज्ञानावेशाविष्टमानवसभ्यतायां नाट्यकारैरेतैर्नित्यं वितन्यन्ते परिवर्तनानि। अतः समागतपरिवर्तितस्वरूपसम्मित-नाट्यनिचयानामालोचनपुरःसरं तेषां यन्मूल्याङ्कनं सुतरां काङ्क्षितं, तद्धि नानाविधदृष्टिकोणतो भवितुं शक्यम्।

## १. भाषागतदृष्ट्या

विंशशतके संस्कृतसाहित्ये भाषाव्यवहारविषयिणी विविधा परीक्षा विहितेति दृश्यते।राधावल्लभपादानां नाटकानां भाषायां क्वचिदाधुनिकसूक्तिप्रवचनानामपि प्रयोगो द्रष्टुं शक्यते। यथा 'धीवरशाकुन्तले'–

'रक्षका एव भक्षका जाताः।'[१] इति।

---

*अतिथि-अध्यापकः, संस्कृतविभागे, हरिणघाटामहाविद्यालयस्य, नदीयामण्डलस्थस्य, पश्चिमवङ्गेषु।

[१]प्रेक्षणसप्तकम् , पृ. ३०

'इदानीं सत्यवादी हरिश्चन्द्रोऽसि संवृत्तः।'[२] इति।

## २. अभिव्यक्तिगतदृष्ट्या

आधुनिकसंस्कृतनाट्यकृद्भिः प्रयोजनानुसारं हिन्दी-वङ्ग-ओडिया-आङ्गल-प्रभृतीनां भाषाणां व्यवहारो विधीयत इत्यत्र नास्ति किमपि चित्रम्। संस्कृतं खलु बद्धकासारभाषेति वक्तुं सर्वथा साम्प्रतमसाम्प्रतम्। तथाहि केरोसिन्-वैडमिन्टन्-टेनिस्-पोलिस्-बस्-म्याक्सि-पोटली-वडिश-हल्लाबोल्-इंक्वायरीकमिशन्-भोट-व्यालटवक्स-इत्यादीनां बहुलप्रचलितानां व्यवहारिकशब्दानां सम्यग् बहुविचित्रितः प्रयोगः सन्दृश्यते। केचित्तु sorry-nonsense-rubbish-silence-इत्यादीनामाङ्गलशब्दानामेवाविकलं व्यवहारं कुर्वन्ति। दिङ्मात्रमुदाहरणं यथा धीवरशाकुन्तलमित्यतः–

धीवरः– हे! हे! किमर्थं धक्कयसि।

श्यालः– एष राज्ञा अङ्गुलीयकमूल्यसम्मितो धनराशिरपि प्रसादीकृतः। (मुद्राणां पोटलीमर्पयति।)

मशकधानीत्यतः–

श्रेष्ठी– यदा पुलिसेन तव...

श्रेष्ठी– अहं तव कृते इंक्वायरी कमिशन् उपवेशयामि।

## ३. वस्तुदृष्ट्या

अन्यासां भाषाणां साहित्यैः समं संस्कृतसाहित्यस्यानेकांश एव विंशशतके 'कालस्य दर्पणमि'व नः पुरतः प्रत्यक्षीभवति। तथाहि 'द्वितीयविश्वयुद्धस्य प्रतिक्रिया', 'भयावहनियोग-समस्या', 'सन्त्रासवादः', 'नक्शाल्-आन्दोलनम् ', 'उद्वास्तुसमस्या', 'राजनैतिकनेतृवर्गाणां दुर्नीतिः', 'एडस्-व्याधिः', 'नारीनिर्यातनम् ', 'शिशुश्रमः', 'पणप्रथा', 'छात्रसमाजे विशृङ्खला', 'बाल्यविवाहः', 'शिक्षाव्यवस्थातः संस्कृतस्य विताडनम् ', 'जातिसमस्या', 'विधवानां समस्या', 'कृष्णायाः कन्याया मनोव्याथा', इत्यादयो नैके साम्प्रतिकविषयाः साम्प्रतं समायाता नाटकीयविषयवस्तुत्वेन। तस्मादेव विंशैकविंशशतकयोः संस्कृत-साहित्यस्य विविधशाखासु विशेषतो दृश्यकाव्येषु ऐतिह्यस्याधुनिकतायाश्च मिथः संहिता सुतरामेव नो दृक्पथमुपैति। अतः परम्पराप्राप्त-नान्दीप्रस्तावनाभरतवाक्यादिभिः साकं

---

[२]तदेव पृ. २९

प्रधानेतिवृत्तसङ्गीतभाषाप्रयोगेषु संलक्ष्यते प्रत्ययातीतमभिनवत्वम्।

साहित्यं खलु समाजस्य दर्पणस्वरूपम्। अतः समाजे घटमानामुपर्युक्तानां विषयाणां प्रतिच्छविस्तु आधुनिकसंस्कृतसाहित्ये निपतत्येवेत्यत्र नास्ति सन्देहलवोऽपि। तस्मादेव राधावल्लभवर्य्याणां 'धीवरशाकुन्तलमि'ति प्रेक्षणकं कविताकामिनीविलासेन काल्या दासेन कालिदासेन प्रणीतस्य 'अभिज्ञानशकुन्तलमि'ति प्रख्यातनाटकस्य प्रसङ्गम् एकमुपजीव्य रचितं सदपि वस्तुदृष्ट्या किञ्चिद्वैशिष्ट्यं बिभर्त्ति। अत्र नायकस्य धीवरस्य प्रियया समं राज्ञो दुष्यन्तस्य पत्न्याः शकुन्तलाया नामसाम्यात् धीवरस्य कीदृशी दुर्दशा सञ्जातेति नितरां प्राञ्जलगिरा समुपन्यस्तमत्र नाट्यकृता। तेन साकं समाजे प्रभावोपेत-जनानां प्रभावः सम्यक्तया प्रदर्शितोऽस्मिन् प्रेक्षणके। राधावल्लभस्य मशकधानीति व्यङ्गहास्यरसात्मके प्रेक्षणके तु धनभोगसर्वस्वसमाजस्य नग्नचित्रं चित्रितं नाट्यकृता सुनिपुणतया। तथाह्युक्तम् – "It delineates a pathetic story of human deceit and oppression by the powerful corrupt rich on the powerless poor."[३] इति।

दरिद्राणामुपरि धनिजनानामत्याचारस्य निर्ममवृत्तमत्र परिस्फुटम्। अपराधी यदि प्रभावोपेतराजनैतिकनेतृ-जनस्यात्मीयो भवेत्तदा तत्कृताः 'सप्तहत्या अपि क्षन्तव्या' इति साम्प्रतिकं तथ्यमेवात्र मूलम्। तथाह्यधस्तात् समुद्धृतेन पुरुषश्रेष्ठिकथोपकथनेन नाट्यकर्त्तुर्वैदग्ध्यभङ्गीभणितिः स्पष्टं प्रकाश्यते–

"पुरुषः– स्वामिन् मा अस्मै कुप्यतु। अयं मुख्यमन्त्रिणः श्यालस्य भागिनेयस्य भ्रातृव्यो वर्तते।

श्रेष्ठी– अत एवायं मम सेवकेषु नियुक्तिं प्राप्तवान्।"[४] इति।

तथाहि 'प्रेक्षणसप्तकमि'ति ग्रन्थस्य भूमिकायां स्वयमेव राधावल्लभो वक्ति– "मुक्तिः, मशकधानी, गणेशपूजनम् चेति त्रिषु प्रेक्षणकेषु यद्यपि मनोविनोदो नर्मालापशैली च विद्यते, तथापीमानि साम्प्रतिकलोकतन्त्र-व्यवस्थां, मनुष्यस्य सङ्घर्षं चाधिकृत्य गभीरान् प्रश्नानुपस्थापयन्ति।"[५] इति।

## ४. चरित्रगतदृष्ट्या

---

[३] सिद्धेश्वर चट्टोपाध्याय (बुडोदा) ओ ताँर रचित अथ किम् पृ.१२

[४] प्रेक्षणसप्तकम् , पृ.४९

[५] तदेव, भूमिका

नाटकस्य नायकस्वरूपविषये साहित्यदर्पणे विश्वनाथेनाभ्यधायि–

प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान्।
दिव्योऽथ दिव्यादिव्यो वा गुणवान् नायको मतः॥ इति।

किन्तु आधुनिकसंस्कृतनाटकेषु धीरोदात्तादिनायकानां स्थाने समाजस्थनिम्नमध्यवर्गीयचरित्राणां नायकत्वेनोपस्थापनं विधीयत इति दरीदृश्यते। प्रादेशिकनाट्यरीतिं पाश्चात्त्यनाट्यधारां वोपजीव्याधुनिकै-र्नाट्यकारैः 'भावनाट्यानि' (Abstract Plays), 'प्रतीकनाट्यानि' (Symbolic Plays) , 'नुक्कडनाट्यानि' 'वीथीनाट्यानि' (Street Plays) वा विरच्यन्ते। तेषु राधावल्लभः मूर्धन्यतामधिकृत्य विराजते। यथा राधावल्लभपादानां 'धीवरशाकुन्तलमि'ति नाटके समाजस्य प्रान्तवर्गीयो धीवर एव नायकः। 'मशकधानी'ति प्रेक्षणके च यद्यपि समाजस्य उच्चश्रेणीस्था जना एव नायकत्वेन वृतास्तथापि तेषां मध्ये श्रेष्ठिचरित्रादीनामिव नैकेषामेव मूर्खत्वं शिक्षाभावत्वं वा स्फुटमिति विशेषः।

## ५. मञ्चनविधिगतदृष्ट्या

आधुनिकसंस्कृतनाटकेषु भरतमुनिप्रकल्पिताया रङ्गमञ्चव्यवस्थायाः प्रभूतं परिवर्तनमालक्ष्यत इति तद्विषयकं विचारणं नितरां काङ्क्षितम्। अर्वाचीनैर्नाट्यकारै रङ्गमञ्चरूपेण यस्य कस्यचिदपि स्थानस्य ग्रहणं क्रियते। तथाहि साम्प्रतं संस्कृतनाटकानि तु कदाचिद् वृक्षतले कदाचिद्वा मुक्तगगने अभिनीयन्ते। दक्षिणभारते प्रसिद्धं सम्प्रत्यपि भारतस्य सर्वकोणेषु प्रचलितं 'वीथीनाटकम् ' अस्यैव साक्ष्यमावहति। अतो दर्शकास्थनस्थलेऽन्धकारो नटादीनां शरीरोपरि चालोकपात इति तत्त्वं तु अद्यतननाटकेषु नैव परिलक्ष्यते। एकस्यां भूमौ एकस्यैवालोकस्य तले जीवन्तो दर्शका सजीवानि च नाटकीयपात्राणि समागच्छन्त्यभिनयशब्दस्य जीवनवृत्तमित्येवार्थात्। एतदेव वैशिष्ट्यं वादलसरकाराविष्कृतस्य 'तृतीयनाटकम् ' (3rd Theatre) इति तत्त्वस्यास्य। तथाहि वादलसरकारेणात्र स्वमतमुपस्थापितं यत्– "Theatre can show very little, but whatever it can show is here, now. The performers and the spectators come to the same place, on the same day, at the same time; otherwise the event of theatre will not happen. […] That is the strength. That should be emphasized."[६] इति।

---

[६]Badal Sircar's Third Theatre: Features and Functions,

राधावल्लभप्रणीतानि प्रेक्षकाण्यपि मञ्चनविधिगतदृष्ट्या विशेषेण वैशिष्ट्यमावहन्ति। नाट्यशास्त्र-परम्परायां रूपकस्यावान्तरभेदेषु उपरूपकेषु वा प्रेक्षणकं हि पठितं दृश्यकाव्यम्। तल्लक्षणं लक्षयद्भिः 'शृङ्गारप्रकाश'कारैः 'नाट्यदर्पण'कारैश्च निगदितं यत्–

रथ्या-समाज-चत्वर-सुरालयादौ प्रवर्त्यते बहुभिः।

पात्रविशेषैर्यत् तत् प्रेक्षणकं कामदहनादि॥ इति।

रथ्यासु समाजेषु (मेलायां लोकोत्सवेषु वा) चत्वरेषु सुरालयेष्वपि वाभिनेतुं शक्यते प्रेक्षणकम्। तस्मादेव 'प्रेक्षणसप्तकम्' इति ग्रन्थस्य भूमिकायां राधावल्लभपादैर्ज्ञापितं यत्– "वस्तुत आचार्यैर्लोकनाट्यपरम्पराया एव सङ्ग्रहः प्रेक्षणकं लक्षयद्भिरकारि। दक्षिणभारतेषु प्रसिद्धं सम्प्रत्यपि प्रचलितं 'वीथीनाट्यकम्' तथैव यक्षगानप्रभृतीनि लोकनाट्यानि प्रेक्षणकेन संवदन्ति। आधुनिका 'नुक्कड-नाटक' (स्ट्रीटप्ले) इति यदामनन्ति, तदपि वस्तुतः प्रेक्षणकस्यैव नवोत्थानम्।" इति।

## ६. सङ्गीतगतदृष्ट्या

भरतमुनिप्रणीते नाट्यशास्त्रे न केवलं नाट्यतत्त्वं, प्रयोगतत्त्वमपि विस्तरेणालोचितमिति तु सर्वैरेव ज्ञायते। नाट्यशास्त्रस्य पञ्चमाध्याये पूर्वरङ्गविधानप्रसङ्गे भरतेन सङ्गीतविषयः समुपस्थापितः। नेपथ्य-सङ्गीतविषयिणी चर्चाप्यत्रावाप्यते–

एतानि तु बहिर्गीतान्यन्तर्यवनिकागतैः।

प्रयोक्तृभिः प्रयोज्यानि तन्त्रीभाण्डकृतानि च॥

इति। प्रसङ्गेऽस्मिन् सागरनन्दिनयोऽवश्यमनुसन्धेयः। रङ्गमञ्चात् सूत्रधारो यदा निष्क्रान्तो भवति, तदा सूत्रधार इव रूपगुणसम्पन्नः स्थापकः समागमिष्यति, ध्रुवासंज्ञका गीतिश्च नाट्यकार्यानुसारं भविष्यतीति 'नाटकलक्षणरत्नकोषे' व्याख्यातम्। तदुच्यते–

स्थापकस्य प्रवेशे तु कर्तव्यार्थनुगा ध्रुवा।

सुवाक्यमधुरैः श्लोकैः नानाभावरसान्वितैः॥ इति। भरतकथिता सैव ध्रुवा गीतिरद्यत्वे श्रूयते रवीन्द्रनाथ-गीरिशकार्नाड-सिद्धेश्वर-राधावल्लभादीनां नाटकेष्वपीति मन्ये। ध्रुवायाः समेऽपि भेदा यद्यपि न सन्ति, तथापि

क्वचित्प्रावेशिक्याः क्वचिद्वा गेयपदस्य क्वचित्पुनः मृदङ्गलयस्य प्रयोगेण तदेवैतिह्यं समरेखयैव प्रचलतीत्यत्र नास्ति काचिद्विमतिः।

सङ्गीतेः समप्रभावो निरीक्ष्यते राधावल्लभीयप्रेक्षणकेष्वपि। तदीये 'धीवरशाकुन्तलमि'ति नाटके शौण्डिकापणगीतमसामान्यं रूपमाधत्त इत्यत्र नास्ति काचिद्विप्रतिपत्तिः। तथाहि प्रेक्ष्यतां तावत्संगीतेरनन्यः प्रयोगः–

पिबत सन्ततम्
हसत सन्ततम्।
जयत भीतिमपि मृत्युकरालां
पायं पायं मधुरां हालाम्।
इयं मोहिनी तथोन्मादनी
चुम्बत सततं जिह्वामधरम्
चषकं चषकं जपत सन्ततम्॥ इति।

## ७. प्राच्यपाश्चात्त्यनाट्यतत्त्वविदां प्रभावगतदृष्ट्या

आधुनिकसंस्कृतसाहित्यस्य नाट्यकारा नूनमेव भरतभामहानन्दवर्धनादिभिरालङ्कारिकैर्यथा प्रभावितास्तथैव प्रभाविता ब्रेक्ट्-बेकेट्-आरिष्टटल्-प्लेटो-प्रभृतिभिः पाश्चात्त्यविद्वद्भिः। तेषां रचनासु वङ्गसाहित्ये प्रख्यातस्य 'तृतीयनाट्यमि'त्यस्य (3rd Theatre) तत्त्वस्य पथिकृदाचार्यस्यापि सुतरां प्रभावः समलक्षि। एतदतिरिच्य नाटकेषु तेषु कालिदासभासादीनां प्रयोगपद्धतिरप्यनुसृता दृश्यत इति तेषां प्रभावोऽपि नैवाग्राह्यः।

भरतमुनिप्रणीते नाट्यशास्त्रे नाट्यपरिवेशनावसरे विनोदनेन समं शिक्षाविषयकं सुनिर्दिष्टं मतमपि प्रकाशितमित्यवलोक्यते। तथाहि भरतभारती–

दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्।
विश्रान्तिजननं काले नाट्यमेतद्भविष्यति॥
धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम्।
लोकोपदेशजननं नाट्यमेतद्भविष्यति॥ इति।

अत आनन्दप्रदानमुपदेशप्रदानञ्चेत्येतद्द्वयमेव काव्यस्य प्राणभूतं फलम्। तथाहि ज्ञायते यत् काव्यस्य नाट्यस्य वा शिक्षामूलकमुपयोगित्वं प्राचीननाट्यतत्त्वविदां नासीज्ज्ञानागोचरमिति सुवचम्।

राधावल्लभपादानां 'धीवरशाकुन्तलमि'ति प्रेक्षणकस्य इतिवृत्तमेव कालिदासीयशाकुन्तलाद् गृहीतम्। परन्तु नाट्यकर्तुः स्वकीयपाण्डित्यप्रभया

तत्प्रेक्षणकमपि अनन्यरूपं प्रख्यातञ्चाभूदित्यत्र नास्ति संशयः। तेनैव स्वीकृतं भूमिकायां यत्– "इह सङ्कलितानि प्रेक्षणकानि प्रायशोऽसकृद् रङ्गमञ्चे प्रयोजितानि प्रशंसां च प्राप्तानि। तेषु क्वचित् पुरातनप्रबन्धोत्थापितेऽपि वस्तुनि सत्यप्यन्यच्छायायोनित्वे नवयुगसंकल्पा नवाः स्वप्ना नवा भावा वा समुन्मिषन्ति।" इति। महाकवेर्वचनानि नितरां रम्यभावभङ्ग्या राधावल्लभेन तदीयेषु प्रेक्षणकेषु परिवेशितानि। दिङ्मात्रमुदाहरणं यथा 'धीवरशाकुन्तलम् ' इत्यतः–

श्रेष्ठी– ...पश्य, महाकविः किं कथयति! किं कथयति महाकवि?–

'हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा!

महाकवेर्वचसि तव श्रद्धा नास्ति, मूर्ख! इति।

अपि च– धीवरः– किं कथयामि? तस्या अधरः किसलयरागः कोमलविटपानुकारिणौ वाहू। मन्ये मानुषीसु तादृशस्य रूपस्य सम्भव एव न स्यात्। इति।

## ८. उपसंहृतिः

एवमेव राधावल्लभपादा स्वकीयकर्मयज्ञेनाधुनापि समग्रं भारतमेव पावनीकृत्य स्वयशसा सुतरां देदीप्यन्ते। अतो ब्रेक्ट्-बेकेट्-वादलसरकारादीनां प्रतिष्ठिततत्त्वं तथा च भारतीयनाट्यशास्त्रविदां रसतत्त्वमित्येतयोर्द्वयोः समन्वयफलं तावत् राधावल्लभसिद्धेश्वरयोः कृतिततिरित्यत्र नास्ति किञ्चिदपि वैमत्यम्। अन्तिमे तु विंशशतकस्य मूर्धन्यभूतस्य नाट्यकारस्य श्रीहरिदाससिद्धान्तवागीशस्य सुललिता सुरभारती सश्रद्धं स्मर्यते – "वचश्चाप्यपूर्वं विशेषेण सर्वे रसज्ञाः पुराणाच्चिरायाद्रियन्ते॥" इति स्वल्पबुद्धिना मयका यदि नूत्ना अपूर्वा च काचिदपि वागत्रभवतां भवतां सकाश उपन्यस्ता, तदा तस्याः समादरः सुतरां प्रार्थित इति कृतं पल्लवितेनेति शिवम्।

☆ ☆ ☆

# वङ्गीयप्रतापनाटके हिन्दूनां सामाजिकदुरवस्थाया वर्णनम्

सुमन्तप्रामाणिकः*

प्राचीन संस्कृतसाहित्ये रामायणमहाभारतादिकम् अवलम्ब्य बहूनि नाटकानि विरचितानि सन्ति। परन्तु न केवलं रामायणमहाभारतादि अपि तु ऐतिहासिकघटनाः, जीवितचरितं, समसामयिकराज्यस्य तथा देशस्य वास्तविकीं समस्याम् अवलम्ब्याऽपि अधिकाधिकानि नाटकानि विरचयन्ति आधुनिकनाट्यकाराः।

वस्तुतः विंश-एकविंशशताब्द्योः संस्कृतसाहित्यं बहुधा विभजयितुं शक्यते। विश्वयुद्धद्वयं, स्वातन्त्र्यान्दोलनं, विधिभङ्गान्दोलनं, लवणसत्याग्रहः इत्यादेः पटभूमिकायां यथा विभिन्नप्रान्तीयभाषायां साहित्यिकगणः नाटकानि लिखितवन्तः तथैव संस्कृतभाषायामपि साहित्यिकाः बहूनि नाटकानि अलिखन्।

रानाप्रताप-शिवाजि-भगत्सिंह-प्रतापादित्यप्रभृतीनां राष्ट्रियनायकानां (National Hero) जीवनम् अवलम्ब्यापि बहूनि नाटकानि, काव्यानि विरचितानि।

आधुनिककविषु हरिदाससिद्धान्तवागीशः अन्यतमः। १८७६ क्रैस्ताब्दे अद्यतनबांलादेशस्ययशरराज्यस्य फरिदपुरमण्डले ऊणशियानामकग्रामे लब्धजन्मा हरिदाससिद्धान्तवागीशो भारतवर्षस्य स्वातन्त्र्यमुद्गायन् विशिष्ट एव। अस्य पिता गङ्गाधरविद्यालङ्कारः माता च विधुमुखीदेवी आस्ताम्।

अयं कविः बाल्यकालादेव महाकविरासीत्। पञ्चदशवर्षीय एवासौ कंसवधप्रभृतीनां ग्रन्थानां प्रणयनेन लब्धादरोऽभवत्। कवेरस्य सुप्रसिद्धनाटकेषु विराजसरोजिनी, मिवारप्रतापम् , शिवाजिचरितम् , वङ्गीयप्रतापञ्चेति सुप्रसिद्धानि। अनेन रुक्मिणीहरणप्रभृतीनि पद्यकाव्यान्यपि लिखितानि। त्रिषु नाटकेषु देशप्रेमभावना एव विद्यते।

अस्य हिन्दुत्वाभिमानं प्ररोचकमथ च यथार्थं दृश्यते यथा–

हिन्दुरेव हि हिन्दूनां विकृतः कुरुते क्षतिम् ।
मुद्गरीकृतलौहं हि लौहं दलति शाश्वतम्॥ (मिवारप्रतापनाटके)

एवं मिवारप्रतापस्य पञ्चमोऽङ्केऽपि 'हिन्दुभिरेव हिन्दूनां हिंसया संवृत्तोऽयं

---

*शोधच्छात्रः, साहित्यविभागे, आन्ध्रप्रदेशेषु तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य।

सर्वनाशो भारतस्य।' तद्वदेव वङ्गीयप्रतापनाटकेऽपि हिन्दुदेशे हिन्दूनां दुरावस्थायाः चित्रं दरीदृश्यते। अनेन वङ्गीयकविना षोडशशताब्द्याः दिल्लीयवनसम्राजः आकबरस्य तथा वङ्गीयसम्राजः प्रतापादित्यस्य युद्धस्य घटनां स्वीकृत्य १९१७ क्रैस्ताब्दे अष्टाङ्कविशिष्टमिदं नाटकं विरचितम्।

अस्मिन्नाटके प्रायः सर्वत्र हिन्दूनां दुरावस्थायाः वर्णनं दृश्यते। तदानीन्तनसमाजे हिन्दुदेशे हिन्दूनां कीदृशी परिस्थितिरासीत् इत्यस्मिन् विषये वङ्गीयप्रतापनाटकदर्शनेन ज्ञातुं प्रभवन्ति सामाजिकाः। तत्र प्रथमोऽङ्क एव शङ्करचक्रवर्त्तिनः कथानुसारं शेरखाँननवाबस्य हिंस्रकर्मचारिभिः प्रपीडिताया जनतायाः साहाय्यार्थं प्रायतत। नवाबस्य कोपभाजनं भूत्वा स दण्डभयाच्च आत्मानं परित्रातुकामः अरण्ये पलायितवान्। शङ्करः दुःखेन कथयति– अहो! सम्प्राप्तोऽस्मि साम्प्रतमवस्थानुरूपं स्थानम्। कुतः–

स्वाधीनताविरहितः परिदुर्बलाङ्गः
आक्रान्तिमात्रमतिभीतिपलायमानः।
अङ्गैः किलाङ्गमभिगुप्य श्रृगालतुल्यः
घोरं वनं विशति शङ्करचक्रवर्त्ती॥ (व.प्र-१/९)

तस्मिन् समये प्रायेणैव हि साधवः कारावन्धनम्, असाधवः सयशःपदोन्नतिम्, निरपराधाः प्राणदण्डम्, सापराधाः सादरमुक्तिम्, गुणिनो निग्रहातिशयम्, निर्गुणाश्च परमानुग्रहानुभवन्ति। अतः नाटकेऽस्मिन् प्रथमोऽङ्के शङ्करचक्रवर्त्ती हिन्दून् उद्दिश्य अवदत्– "धिक् धिक् पशुप्रायान् पुरुषान्। येषां हि साहसशून्यं मनः, अलसतामयं शरीरम्, काफेर इत्यनुक्तिः पुरस्कारः, यवनपदलेहनञ्च वृत्तिः। अपि च बलप्रकाशो दुर्बलपीडने, सहिष्णुता वेत्रप्रहारे, गाढोद्यमः परमानुगत्ये, सन्तोषः संलापमात्रे, निवृत्तिः स्वाधीनतायाम्, वैराग्यञ्च पुरुषकारे।" इति (व.प्र.पृ-५)

अरण्ये प्रतापादित्येन साकं वार्तालापप्रसङ्गे शङ्करेण स्वकीयमनस्ताप एवं वर्णितः–

नवीनस्त्रीमात्रं गणयति विलासोपकरणं
प्रजानां सर्वस्वं करगतनिजस्वं च मनुते।
तृणस्तेये दण्डं प्रणयति परप्राणहरणं
निरीहाणां खेलाकुतुकमसुभिः पूरयति च॥

एतच्छ्रुत्वा प्रतापेनापि स्वकीयविचाराः प्रकटीकृताः–

विधर्म्यधीना बत भारतप्रजा
नदीप्रवाहे पतिता लता यथा।
नैवोन्नतिं गच्छति निष्फलोद्यमा
परानुगत्यं हि लघीयसां क्रिया॥ (व.प्र-१/२५)

उपर्युक्तश्लोकद्वयेन अस्माभिः ज्ञातुं शक्यते मुघलयुगे हिन्दुदेशे हिन्दूनां कीदृशी दूरावस्था आसीदिति। हिन्दवः नारीः देवी प्रतिमा गणयन्ति। परन्तु यवनाः स्त्रीमात्रं विलासोपकरणं गणयन्ति। अतएव दुःखेन प्रतापादित्येन हिन्दून् उद्दिश्य विधर्म्यधीना बत् भारतप्रजाः नदीप्रवाहे पतिता लतया सह तुलनां कृतम्।

नाटकस्यास्य तृतीयोऽङ्केऽपि हिन्दुनारीणां प्रति अत्याचारस्य चित्रं परिलक्ष्यते। अस्मिन्नङ्के कार्यस्थलं शङ्करस्य गृहं वर्तते। नवाबेन सुरेन्द्रनाथो नाम निजसेनापतिरपराधिनो विशेषतश्च शङ्करस्य पत्नीं ग्रहीतुं प्रेषितः। शङ्करः स्वभवनं धर्मपत्नीं च सूर्यकान्तगुहस्य संरक्षणे निधाय पलायितवान्। सूर्यकान्तः सुरेन्द्रनाथं निवर्तयितुं बहुवारं प्रार्थयामास किन्तु सुरेन्द्रनाथो नानुमेने तस्य वचनम्।

ततः सूर्यकान्तस्तारस्वरेणेदं निगदितवान्–

सतीकुलशिरोमणिं द्विजवरस्य पत्नीं द्विजो
भवन्नपि समीहसे यवनभोगसम्पत्तये।
कदापि भविता न ते फलवतायमाशालता
सवीयहविषः स्रुतिः पतति कुक्कुरास्ये किमु॥ (व.प्र-३/८)

सन्दर्भेऽस्मिन् चिन्तयितुं शक्यते कथं हिन्दुरेव हि हिन्दूनां विकृतः कुरुते क्षतिम्। अत्र सुरेन्द्रनाथो ब्राह्मणवंशजो भूत्वाऽपि नवाबभोगाय द्विजवरस्य शङ्करस्य पत्नीं ग्रहीतुमागतः। अतः सूर्य्यकान्तः सुरेन्द्रं ब्राह्मणकुलकलङ्कः तथा जन्मभूमिकुसन्तानम् इत्युक्त्वा ब्रवीति–

विप्रो भवन्नपि भवान् यवनार्थमद्य
विप्रस्य हि प्रसभमिच्छति सर्व्वनाशम्।
देवः पिशाचपरमोऽजनि देववैरी
कुर्य्यात् कलिर्नु विषयं किमतः परं वा॥ (व.प्र-३/४)

पञ्चमाऽङ्के इच्छामतीनदीतीरे यवनसैनिकाः वङ्गीयकृषकान् प्रति कीदृशम् अत्याचारं कृतवन्तः अस्मिन् विषये स्पष्टम् उक्तं हरिदासेन। अत्र यवनसैनिकाः सन्निहितक्षेत्रेभ्यो मूलकानि खादन्ति। कृषकः प्रविश्य अहो ! कस्त्वं मूलकं खादसि

इत्यपृच्छत्। सैनिकाः कृषकेण सह अयाचितम् आचरणम् आचरितवन्तः। सैनिका अर्धभुक्तं मूलकं कृषकाङ्गे निक्षिप्तवन्तः। कृषकः सक्रोधम् उवाद–

– अरे श्यालक! खादसि मम मूलकम् उपहससि च। तत्तिष्ठ, त्वां मूलकं खादयामि।

सैनिकाः – तदागच्छ दास्याः पुत्र!

इति प्रत्युत्तरं दत्तवन्तः। अतः अस्मिन्नङ्के कृषकं प्रति सैनिकानां व्यवहारम् अवलोक्य तदानीन्तनवङ्गीयसमाजे कृषकस्य का अवस्था आसीत् तदपि अवगच्छन्ति सामाजिकाः।

नाटकेऽस्मिन् दुर्ज्जननिधनं नाम सप्तमेऽङ्केऽपि तस्मिन् काले हिन्दूनां का अवस्था आसीत् इत्यस्मिन् विषये आधुनिकराष्ट्रीयतावादिकविना बहुत्र सुस्पष्टरूपेण वर्णितम्। अङ्केऽस्मिन् प्रतापपुत्रेण उदयादित्येन सह आकबरसेनापतेः मानसिंहस्य पुत्रस्य दुर्ज्जनसिंहस्य युद्धस्य तथा दुर्ज्जननिधनस्य वर्णनमस्ति। दुर्ज्जनेन सह उदयादित्यस्य वाक्कलहकाले दुर्ज्जनं प्रति हिन्दुस्थाने हिन्दूनां दुर्दशामवलोक्य उदयादित्येन प्रोक्तम्– हिन्दुः खलु हिन्दुदेशे पुनरपि हिन्दुराज्यं स्थापयितुमुद्युङ्क्ते, प्रतिबध्नाति च हिन्दूनामेव कश्चिदित्ययमप्यपूर्वो विस्मयप्रकारः। (व.प्र.पृ-१३२) तस्मिन् काले प्रदेशेऽस्मिन् अधर्मः सञ्जात इत्यस्मिन् विषये नास्ति सन्देहः। अतएव धर्मराज्यं स्थापयितुम् उदयादित्येन सक्रोधम् उक्तम्– भौमिक एवोच्छद्य युष्मत्प्रायान् यवनान् विधास्यति पुनरपि धर्म्मराज्यम्। (व.प्र.पृ-१३२)

एवम्प्रकारेण अस्माभिः दृष्टं आधुनिककविना हरिदाससिद्धान्तवागीशेन स्वीये वङ्गीयप्रतापनाटके हिन्दुस्थाने हिन्दूनां दूरावस्थाया निपुणहस्तेन वर्णनं कृतम्। तदानीन्तनसमाजे यवनैः हिन्दून् प्रति नृशंसः अत्याचारः कृतः, अस्याः घटनायाः एव मुख्यरूपेण अष्टमाङ्कविशिष्टे नाटकेऽस्मिन् हरिदासेन वर्णनं कृतम्। एषा धारा अद्याऽपि प्रचलिता अस्ति। हिन्दुरेव हि हिन्दूनां विकृतः कुरुते क्षतिम् अस्य वाक्यस्य प्रमाणं इदीनीन्तनकालेऽपि परिलक्ष्यते।

☆ ☆ ☆

# सम्प्रेषणोपागमः

एस.टि.पि. कनकवल्ली*

## ०. भूमिका

सामाजिकसांस्कृतिकदायित्वनिर्वहणार्थं शिक्षा यूनः प्रेरयति तथा तेषां ज्ञानम्, आत्मविश्वासञ्च संवर्धयति। शिक्षणोद्देश्यस्य पूर्तये सम्प्रेषणम् एकं साधनत्वेन कार्यं करोति। अस्यां प्रक्रियायां सम्प्रेषकः स्वाभिप्रायान्, भावांश्च अन्यत्र प्रापयितुं लिखितमौखिकादिदृश्यश्रव्यसाधनानां प्रयोगं करोति तेन शिक्षा रुचिकरा कर्तुं शक्या। 'सम्प्रेषणम्' इति पदम् आङ्गलभाषायाः Communication इत्यस्य पर्यायपदम्। लैटिन्भाषायाः Communicate (us) इति पदात् निष्पन्नोऽयं Communication शब्दः। अस्याऽर्थः to impact, make common इति। अत उच्यते– सम्प्रेषणम् काचित् तादृशी प्रक्रिया, यत्र व्यक्तिः परस्परं सामान्यावबोधमाध्यमेन आदानप्रदानार्थं प्रयतते। (Imparting or interchanging of thoughts.)

सम्प्रेषणमित्यस्यार्थः परस्परसूचनानां विचाराणाम् आदानप्रदानम्। शिक्षया शिक्षणेन च विना विचाराणां सूचनानाञ्च आदानप्रदानं न सम्भवति। अतः सम्प्रेषणम् एका तादृशी प्रक्रिया यत्र व्यक्तिः स्वज्ञानस्य आचरणेन, मुखमुद्रादिभिः, विचाराणाञ्च परस्परम् आदानप्रदानं करोति। एतेन प्राप्तान् सन्देशान् समुचितेषु अर्थेषु अवगन्तुं प्रेषयितुञ्च उपयुङ्क्ते।

## १. सम्प्रेषणस्य अर्थः

सम्प्रेषणं तादृशं किञ्चन माध्यमं येन समुचितरीत्या वा काऽपि सूचना प्रदातुं शक्यते। एकेन परस्परप्रतीकात्मकसङ्केतेन सम्प्रेषणम् अनूद्य प्राप्तिकर्तारं यावत् प्रेषयितुं शक्यते। सम्प्रेषणं तथैव कर्तव्यं यथा किमपि वा ज्ञानं भवतु तत् प्राप्तिकर्त्रा सम्यक् प्राप्तुं शक्यते।

## २. सम्प्रेषणकौशलानि

सम्प्रेषणस्य पञ्चाङ्गानि भवन्ति। तानि–

१. भाषणम्

---

*साहित्याचार्या, शिक्षाचार्या, विद्यावारिधिः।

२. श्रवणम्
३. पठनम्
४. लेखनम्
५. अशाब्दिकसङ्केतः

वस्तुतः सम्प्रेषणस्य प्रयोगः रोचकतया तथ्यानां-भावनानां-संवेगानां-विचाराणाम् आदानप्रदानार्थं पारस्परिकान्तःक्रियया एव कर्तव्यः। कदापि सम्प्रेषणं कठिनं भारयुक्तं वा न भवेत्। अध्यापकः पाठ्यवस्तुनं अत्यन्तरोचकतया छात्राणां समक्षं प्रस्तोतव्यं, येन छात्राः सहजतया एव तत् ज्ञानं प्राप्तुं शक्नुयुः। यथा उच्यते यत् कस्मिंश्चिदपि विषये क्षेत्रे वा नैपुण्यविकासः आवश्यकः तथैव व्यक्तित्वविकासार्थं सम्प्रेषणकलायाः ज्ञानमपि आवश्यकं भवति।

## ३. सम्प्रेषणस्य परिभाषाः

सम्प्रेषणस्य अर्थं स्पष्टयितुं केषाञ्चित् शिक्षाविदां मतानि उद्धृत्य परिभाषात्वेनात्र उपस्थाप्यन्ते। तानि यथा–

☞"सम्प्रेषणं काचिद् गतिशीला प्रक्रिया यत्र व्यक्तिः चेतनाचेतनावस्थयोः वा अन्येषां विचारान् साङ्केतिकरूपेण उपकरणैः प्रभावयति" इति एडरसन् वर्यस्याभिप्रायः।

☞लेलेण्डे-ब्राडन्महाभागानुसारम् "सम्प्रेषणं नाम तथ्यानां विचाराणां कार्यपद्धतेः वा अन्तः परिवर्तनं प्रसारणञ्च इति।"

☞ एडगर-डेले-महोदयानुसारम् "सम्प्रेषणं विचारविनिमयकाले मानसिकान् विचारान् भावांश्च परस्परं ज्ञातुमवगन्तुञ्च उपयुज्यमाना काचित् प्रक्रिया इति।"

## ४. सम्प्रेषणस्य प्रकृतिः

भावविनिमयस्य वाञ्छितलक्ष्यप्राप्तये एषा काचित् प्रक्रिया। इयञ्च व्यक्तीनां समूहानां विभागानाञ्च मध्ये सूचनाया आदानप्रदानं करोति। सम्प्रेषणं लिखितरूपेण मौखिकरूपेण च च्छात्राध्यापकयोर्मध्ये अन्तःप्रक्रियया सञ्जायते। सूत्राणां सङ्केतानां साहाय्येन एतस्य प्रसारणं भवति।

प्रत्येकं सङ्घटनस्य एका प्रणाली भवति। लक्ष्यप्राप्तये प्रणालीनां मध्ये सर्वदा अन्तःक्रिया जायते एव। प्रभाविसम्प्रेषणार्थं भाषणं लेखनं पठनं श्रवणमवबोधनञ्च इत्यादिविविधेषु सम्प्रेषणकौशलेषु सम्प्रेषकः दक्षः स्यात्। एवञ्च एतादृशमहत्त्वपूर्णसम्प्रेषणप्रक्रियायाः प्रकृतिः अधोलिखितैः अंशैः प्रकटयितुं शक्यते।

## ५. सम्प्रेषणस्य स्वरूपम्

१. सम्प्रेषणं पारस्परिकसम्बन्धस्थापनस्य काचित् प्रक्रिया।
२. विचारविमर्शेषु विचारविनिमयेषु च अत्र विशेषावधानं दीयते।
३. एषा काचित् द्विपाक्षिकी प्रक्रिया यत्र सन्देशसम्प्रेषकः सन्देशसङ्ग्राहकश्च उभावपि भवतः।
४. सम्प्रेषणं काचन सोद्देश्या प्रक्रिया भवति।




चित्रम् १

## ६. सम्प्रेषणप्रक्रिया

छात्रशिक्षकयोर्मध्ये जायमानं सम्प्रेषणम् अन्तःप्रक्रियेति उच्यते। सम्प्रेषणे त्रयः घटकाः सम्मिलिताः। ते च–

i. पाठ्यवस्तु ii. शिक्षणविधिः iii. शिक्षणोपकरणानि च

शिक्षणे चतस्रः प्रमुखक्रियाः भवन्ति ताश्च–

i. भाषणम् ii. श्रवणम् iii. पठनम् iv. लेखनम्

मौखिकसम्प्रेषणे भाषणं श्रवणञ्च प्रमुखक्रिये स्तः। एवं यस्मिन् भाषणकौशलं भवति मुद्रितसम्प्रेषणे पठनलेखनक्रिये प्रमुखे। छात्रशिक्षकयोर्मध्ये जायमाना अन्तःप्रक्रिया चित्रम् २ इत्यत्र द्रष्टुं शक्यते।

## ७. सम्प्रेषणस्य क्षेत्रम्

सम्प्रेषणस्य क्षेत्रमत्यल्पं व्यापकं विस्तृतञ्च भवति। एतत् सम्प्रेषकसङ्ग्राहकयोर्मध्ये निरन्तरं जायमाना प्रक्रिया, यथा सम्प्रेषकसङ्ग्राहकौ

स्वविचाराणां तथ्यानां भावनानाम् अभिवृत्तीनां दृष्टिकोणानाञ्च अन्तःक्रियां कुरुतः। एतत् सम्प्रेषणं द्विविधं भवति आन्तरिकसम्प्रेषणम् , बाह्यसम्प्रेषणम्।




चित्रम् २

## ८. सम्प्रेषणस्य प्रकाराः

शिक्षणाधिगमप्रक्रियां सक्रियां सजीवां गतिशीलां च विधातुं सम्प्रेषणस्य आवश्यकता नैरन्तर्येण वर्तते। शिक्षणे सम्प्रेषणमनेकप्रकारैः वर्गीकर्तुं शक्यते–




चित्रम् ३

समुचितसम्प्रेषणेन एव खलु स्पष्टाधिगमः जायते। एतादृशस्य सम्प्रेषणस्य कानिचन निश्चितोद्देश्यानि भवन्ति। तानि च यथा–

i. मानवसम्बन्धः ii. अभिप्रेरणम् iii. सूचना
iv. मुक्तविनिमयः v. प्रस्तावाभियोगश्च vi. अवगमनम्
vii. अशुद्धसूचनायाः निराकरणम् viii. प्रभावः

## ९. शैक्षिकसम्प्रेषणम्

शैक्षिकोद्देश्यानां प्राप्तये सम्प्रेषणम् अत्यन्तं सहायकं भवति। अत्र शिक्षकः, सन्देशदाता, छात्रः, सन्देशग्रहीता च भवति। सन्देशो नाम अत्र पाठ्यसहगामिनी क्रिया वा भवति। सम्प्रेषकसङ्ग्राहकयोर्मध्ये सम्प्रेषणप्रक्रियायाः कारणात् एते निम्नाङ्कितसम्बन्धाः भवन्ति।

i. उन्मुखीकरणम् ii. तदनुभूतेर्विकासः iii. प्रतिपुष्टिः
iv. भौतिकनैर्भयम् v. विश्वसनीयता vi. अन्तःक्रिया

## १०. लौकिकसम्प्रेषणम्

लौकिकसम्प्रेषणे व्यक्तिः स्वसन्देशं यदा अनेकान् जनान् प्रापयति तदेव लोकसम्प्रेषणमित्युच्यते। लोकससम्प्रेषणं सामुहिकरूपेण भवति। तस्य भाषा अत्यन्तं सरला, सुबोधा, रमणीया स्पष्टा च भवति।

## ११. सम्प्रेषणे अवरोधाः

i. साङ्घटनिकावरोधाः ii. भाषागतावरोधाः iii. वैयक्तिकावरोधाः
iv. मनोवैज्ञानिकावरोधाः v. भौतिकावरोधाः vi. पृष्ठभूमिकावरोधाः

## १२. सम्प्रेषणावरोधानां समाधानानि

☞ यावच्छक्यं सरला सुबोधा स्पष्टा च भाषा प्रयोक्तव्या।

☞ सन्देशः तथैव लेखनीयः यथा सन्देशसङ्ग्राहकः सौकर्येण अवगन्तुं शक्नुयात्।

☞ आवश्यकतायां सत्यां तस्य बिन्दोः पुनरावृत्तिरपि कर्तुं शक्यते।

☞ युगपद् बहूनां माध्यमानानां प्रयोगः अथवा आवश्यकतानुसारम् एकस्य अनन्तरं द्वितीयमाध्यमस्य प्रयोगः कर्तुं शक्यते।

☞ सन्देशः समुचितार्थे प्रेषितः नवेति ज्ञातुं प्रतिपुष्टेः व्यवस्था भवेत्।

## निष्कर्षः

अधुना शिक्षाक्षेत्रे समुचितसम्प्रेषणस्य महती आवश्यकता दृश्यते। मानवीयभावः सम्प्रेषणमाध्यमेन व्यक्त्यन्तरं प्रापयितुं शक्यते। चलच्चित्रम्, आकाशवाणी, दूरदर्शनं, ध्वनिमुद्रिका, सङ्गणकम् इत्यादि सम्प्रेषणस्य अनेके विधयः। सम्प्रेषणम् अनेकैः प्रकारैः माध्यमैः च कर्तुं शक्यते, येन सङ्ग्राहकपर्यन्तं स्वविचारान् भावान् च सम्प्रेष्य तेषु प्रभाव उत्पादयितुं शक्यते। अयमधिगम उद्देश्यानां प्राप्तौ सहकरोति। छात्राणाम् आन्तरिकप्रेरणं, जिज्ञासां च वर्धयति। अस्य प्रयोगेन भाषायाः विकासः सुष्ठु भवति। भाषायां रुच्युत्पादने अयमुपागमः अत्यन्तमुपकरोति।

☆ ☆ ☆

# परिशीलितग्रन्थसूची

१. सन्तोषमित्तल. (२००७). शैक्षिक तकनीकी एवं कक्षा-कक्ष प्रबन्ध. जयपुर : राजस्थान हिन्दी ग्रन्थ अकादमी।

२. सन्तोषमित्तल. (२००७). संस्कृतशिक्षण. जयपुर : राजस्थान हिन्दी ग्रन्थ अकादमी।

३. कम्भम्पाटि साम्बशिवमूर्तिः. (२००६). संस्कृतशिक्षणम्. जयपुर : दीपशिखा प्रकाशन।

४. सफाया, रघुनाथ. (१९९७). संस्कृतशिक्षण. चण्डीगढ : हरियाणा साहित्य अकाडमी।

# महाभारतकालिकशिक्षणव्यवस्थायाः वर्तमानसन्दर्भे उपादेयता

**मुकेश कुमारः** *

सर्वैरपि प्राच्यपाश्चात्त्यालोचकैः विश्वस्य आदिमः ग्रन्थः ऋग्वेदः इति मुक्तकण्ठेन जोघुष्यद्भिः इदमेव सिद्ध्यति यत सकलविश्वस्य ज्ञानधारायाः अग्रदूताः भारतीयाः महर्षयः एव अभूवन्। तद्यथोच्यते–

एतद्देशप्रसूतस्य सकाशादग्रजन्मनाम्।
स्वं-स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥ (मनुस्मृतिः २.२०) इति।

साम्प्रतिकयुगे हि ज्ञानप्रसारस्य स क्रमः पूर्णतया विखण्डितः दरीदृश्यते अत एव जगति जायमानानां सर्वासामपि समस्यानां एकमेव कारणं 'उत्तमशिक्षाया अभावः' इति समग्रमपि जगद् मुक्तकण्ठेन भणति। अत उत्तमोत्तमशिक्षणव्यवस्थां व्यवस्थापयितुम् अपि सुमहान् प्रयासः विधीयमानः दृश्यते। उत्तमोत्तमशिक्षणव्यवस्थायाः ज्ञानस्य च प्रसारकारणादेव खलु भारतं विश्वगुरुरूपेण आमनन्ति सर्वे। अतः सम्प्रत्यपि सा आशापूर्णदृष्टिः भारतोपरि निपतिता दृश्यते। भारतीयाश्च बहवो हि आध्यात्मिकगुरवः समग्रे विश्वे ख्यातनामानः जाता वर्तन्ते।

शिक्षणदृष्ट्या तु आसीत् कश्चन महनीयः रमणीयश्च कालः यदा जीवनस्य सर्वतोमुखविकासार्थं सुरभारत्यामुपनिबद्धशास्त्राणामेव अध्ययनपरम्परां प्रत्यपादयन् पूर्वसूरयः। तदा–

तत्रास्य माता सावित्री पिता त्वाचार्य उच्यते॥ (मनुस्मृतिः २.१७०)
तद्विज्ञानार्थं गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्॥1
स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति॥ (याज्ञवल्क्यस्मृतिः आचाराध्याये ३४)

इत्यादीनि श्रुतिस्मृतिवचनानि तदानीन्तनशिक्षणव्यवस्थाया आधारभूतानि आसन्। गुरुकुलपद्धत्याधारितं इदं शिक्षणम् ईषत्परिवर्तनं प्राप्य महाभारतकाले तत्कालस्यावश्यकतानुसारम् अवर्धत्। आसीच्च तत्र वैशिष्ट्यम् महाभारतस्य यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित् इत्यादिरूपेण। इदञ्चासीत् विद्याग्रहणप्रदानयोः व्यवस्थायाः मूलसूत्रम् यत् - न च विक्रीणते ब्रह्म ब्राह्मणाश्च तदा नृपः (आदिपर्व ६४.२०) इत्यादि। शिक्षणस्य वैशिष्ट्यानि तावत्–

---

*अतिथिप्राध्यापकः, मुक्तस्वाध्यायपीठे, राष्ट्रियसंस्कृतसंस्थाने।

## गुरुकुलव्यवस्था

महाभारतकाले शिक्षणं न केवलं गुरुकुलप्रशासनाधीनम् आसीद् अपि तु स्वयं विशिष्टा आचार्याः स्वशस्त्रशास्त्रादिकौशलबलेन बहूनां राज्ञामाश्रयं प्राप्य तत्र सुस्थिरा भूत्वा अध्ययनाध्यापन-यजन-याजन-शिक्षणादीनि कार्याणि सम्पादयन्ति स्म। उदाहरणभूता द्रोणाचार्याः। ते हि द्रुपदाय क्रुद्धाः भूत्वा हस्तिनापुरे समागत्य कौरवपाण्डवानां शिक्षणाभ्यासमकारयन्। तथापि कालेऽस्मिन् विशिष्टा गुरुकुलपरम्परा आसीदेव। तद्यथा–

पित्रोः अपेक्षया गुरोः श्रेष्ठतरत्वं प्रतिपादितम् उद्योगपर्वणि–

शरीरमेतौ कुरुतः पिता माता च भारत।
आचार्यशास्ता या जातिः सा पुण्या साजरामरा॥ (उद्योगपर्व ४४.८)

इदं सत्यमपि। यदि गुरोः गौरवं अकल्पयित्वा तेभ्य उत्तमां व्यवस्थां न कल्पयामश्चेत् कुतः वा प्रसन्नान्तरात्मा स सर्वोत्तमां शिक्षां दद्यात्। अतः प्रायः सम्प्रत्यपि शिक्षकाणां सर्वविधसुव्यवस्थाकल्पनार्थं यत्यते सर्वकारैः।

महाभारतकाले गुरुनिन्दा हि मानवदाहिका मन्यते स्म, तद्यथा–

गुरुणा वैरनिर्बन्धो न कर्त्तव्यः कदाचन।
अनुमान्यः प्रसाद्यश्च गुरुः क्रुद्धो युधिष्ठिर॥
सम्यङ्मिथ्या प्रवृत्तेऽपि वर्तितव्यं गुराविह।
गुरुनिन्दा दहत्यायुर्मनुष्याणां न संशयः॥ (अनुशासनपर्व १०७.४७-४८)

सम्प्रति तु गुरुशिष्याणां सम्बन्धेषु दृश्यमाणः विच्छेदः प्रायः साम्प्रतिकशिक्षणव्यवस्थायाः क्लेशकरः अंशः।

शिष्याणां कृते विशेषकर्त्तव्याकर्तव्यविवेकः बोध्यते स्म तदा, तद्यथा–

य आवृणोत्यमृतं सम्प्रयच्छन् तस्मै न द्रुह्येत् कृतमस्य जानन्।
गुरुं शिष्यो नित्यमभिवादयीत स्वाध्यायमिच्छेच्च सदाऽप्रमत्तः। (उद्योगपर्व ४६.१०)

गुरुकुले शिक्षणं प्राप्नुवता तत्रत्याः आचारव्यवहारादयो नियमाः अपि श्रद्धया परिपालनीयाः भवन्ति स्म। गुरौ गुरुपत्न्यां च समानव्यवहारः करणीयः भवति स्म यश्च अधुनातनकाले न भवत्येव। तदुक्तं-

समा गुरौ यथा वृत्तिर्गुरुपत्न्यां तथाऽचरेत्। (तत्रैव ४४.१३)

शिष्यभोजनं गुरोराज्ञया एव भवति स्म। तद्यथा–

गुरुणा समनुज्ञातो भुञ्जीतान्नमकुत्सयन्।

हविष्यभैक्ष्यभुक् चापि स्थानासनविहारवान्। (आश्वमेधिकपर्व ४६.३)

विद्याग्रहणं दानञ्च सौभाग्याय मन्यते स्म। अतः विद्याविक्रयः अतीव निन्दनीयं अमन्यन्त प्राञ्चः। तदुक्तम् आदिपर्वणि –

न च विक्रीणते ब्रह्म ब्राह्मणाश्च तदा नृप। (आदिपर्व ६४.२०)

किन्तु अधुनातन काले धनं प्रदाय सान्ध्यकक्षानां क्रमस्य असमीचीनत्वं तु शिक्षाविद्भिः भृशं वर्ण्यते।

इत्थं गुरुकुले स्थितयोः गुरुशिष्ययोः परस्परं सम्बन्धः दृढः आसीत्।

## गुरुदक्षिणा

एकलव्य-उत्तङ्कयोः गुरुदक्षिणाया उदाहरणं संसारे विरलतरमेव। गुरोः समीपे अध्ययनात्परं गुरुदक्षिणारूपेण समर्पणस्य परम्परा आसीत्। तत्र च प्रसन्नमनस्कः स्वसर्वस्वं समार्पयत् एकलव्यः इति विशेषः महाभारते।

गुरुणा द्रोणाचार्येण याचिते सति स्वधनुर्विद्यायाः आधारभूतं स्वीयम् अङ्गुष्ठमेव प्रादात् एकलव्यः।

अपरञ्च उदाहरणं भवति उत्तङ्कस्य। गुरुपत्न्या उक्त उत्तङ्कः गुरुदक्षिणारूपेण राज्ञः पौष्यस्य पत्न्याः कुण्डलानि आनीय सामर्पयत्।

शिष्या गुरुणा उक्तं सर्वं साधयितुं सन्नद्धा भवन्ति स्म। तदुदाहरणं लभ्यते आदिपर्वणि–

अर्जुनस्तु ततः सर्वं प्रतिजज्ञे परन्तपः। (आदिपर्व १३१.७) इति।

उत्तमशिष्येन गुरुसेवायां न कदापि प्रमादः आचर्यते स्म। अर्जुनः अपि मनसा वाचा कायेन च गुरुसेवायां संलग्नः अभवत्। तद्यथा–

अर्जुनः परमं यत्नमातिष्ठद् गुरुपूजने।

अस्त्रे च परमं योगं प्रियो द्रोणस्य चाभवत्॥ (तत्रैव १३१.२०)

अत एव स विश्वस्य सर्वश्रेष्ठधनुर्धरः बभूव। तथैव गुरुरपि विविधक्लिष्टनियमान् निर्माय शिष्यान् अनुशासनपालनार्थम् उग्ररूपेण प्राचोदयन्। शिष्या अपि नियमबद्धास्सन्तो स्वज्ञानप्राप्तौ जीवनसाफल्यं सम्पादयितुं वा सन्नद्धाः अभूवन्। अतः कठिनानुशासनस्य उग्रतेजस्वितायाश्च कारणेन आचार्यः विशिष्टस्थानं प्राप्नोति स्म। गुरुकुले विद्याग्रहणार्थं ब्रह्मचर्यं सम्यक् परिपालनीयं आसीत्। तदुक्तं–

ब्रह्मचर्येण या विद्या शक्या वेदितुमञ्जसा। (उद्योगपर्व ४४.५)

इत्थं महाभारतस्य अङ्गभूता भवति भगवद्गीता यत्र हि सर्वमुपनिबद्धं शिक्षातत्त्वम्। विविधाः तत्त्ववेत्तारः, न्यायनिर्णेतारः, शास्त्रज्ञातारश्च अमुं ग्रन्थं न केवलं ज्ञानराशिरूपेण अङ्गीकुर्वन्ति अपि तु अत्यन्तं श्रद्धधानाः सन्तः परमप्रामाणिकसत्यरूपेण पूजयन्ति। भगवद्गीतायामस्यां विविधविधिविमर्शानां सूक्ष्मावलोकनेन जन्मनः मृत्युपर्यन्तं केन कीदृशं कर्माचरणीयम्, कः कथं संसिद्धिं लभते इत्यादिकं सर्वमपि उपनिबद्धम्। इत्थं महाभारते विशिष्टा शिक्षणव्यवस्था व्यवस्थितरूपेण उपलभ्यते यस्याः विशिष्टतत्त्वानां स्वीकारेण अद्यतनशिक्षाव्यवस्थाऽपि सुष्ठु व्यवस्थापयितुं शक्नुमः इति शम्।

☆ ☆ ☆

## परिशीलितग्रन्थसूची


द्विवेदी, कपिलदेव. (२००२) वेदों में समाजशास्त्र, अर्थशास्त्र और शिक्षाशास्त्र. ज्ञानपुर : विश्वभारती अनुसन्धान परिषद्।

शर्मा, आलोक. (२००४) वेदाङ्ग शिक्षा का महत्त्व. जयपुर : राष्ट्रियसंस्कृतसाहित्यकेन्द्र।

मिश्र, लोकमान्य. (२०११) भारतीया पुरातनी शिक्षा. लखनऊ : मृगाक्षी प्रकाशनम्।

# Some special features of *Vedic* interpretation by Swami Dayananda Saraswati

Manabendu Sarkar*

'The *Vedas* are probably the earliest documents of the human mind and it is indeed difficult to say when the earliest portions of the *Vedas* came into existence. As the ancient Hindus seldom kept any historical record of their religious, literary and political realizations, it is difficult to determine the period of the *Vedas* with precision. Historians provide us many guesses but none of them is free from ambiguity'.[1]

The word "Veda" means wisdom, sacred knowledge or knowledge par excellence and 'it manifests the language of the Gods in human speech. The laws of the *Vedas* regulate the social, legal, domestic and religious customs of the Hindus to the present day. All the obligatory duties of the Hindus at birth, marriage, death etc. owe their allegiance to the *Vedic* ritual'[2]. The *Vedas* are *apauruṣeya*. They are supposed to have been directly revealed, and thus are called *śruti*.

The *Vedas* are not only the preacher; they are also the glory of Indian heritage. What is to be done or not at that time the *śruti* or *Vedas* are accepted as evidence *(pramāṇa)*. *Manu*, told in his book, titled *Manusmṛti– "dharmaṃ jijñāsamānebhyaḥ pramāṇaṁ paramaṁ śrutiḥ*".[3] Later on *Ācārya Patañjali* told the study of the *Veda* is essential, he quoted– *"brāhmaṇena niṣkāraṇo dharmaḥ ṣaḍaṇgo vedaḥ adhyeyo jñeyaśca."*

The whole Sanskrit literature has been influenced by the *Vedas*. Various discussions about the *mantras, yāga-yajña, viniyoga, upāsanā* are included in the *brāhmaṇa* and *āraṇyaka*. *Sṛṣṭitattva, ātmā, jīvatmā, brahma, mokṣa* etc. are described in the *upaniṣad*. The *gṛhyasūtras*

---

*Ph. D. Scholar, Department of Sanskrit, Jadavpur University.

[1] Internet, Hinduism.about.com

[2] *ibid*

[3] *Manusmṛti 2/13*

are maintaining the social conditions and the conflicting aspects of the society. Linguistically *śikṣā, vyākaraṇa* and *nirukta* taken together constitute the first lexicon of the *Vedas*. It is a matter of great wonder that at times interpretations about the *Vedic mantras* are myriad and very often they are contradictory in nature. Ācārya Yāska also came across such conflicts, so he referred to the various schools of *Vedic interpretations* in his *niruktam*. Such as *nairuktāḥ, aitihāsikāḥ, parivrājakāḥ, naidānāḥ, adhidaivatam, adhyātmam, ārṣam, yājñikāḥ, vaiyākaraṇāḥ, ācāryāḥ, ātmavādinaḥ, ātmapravādāḥ* etc.[4] Thus it can be said that in ancient India – even in the days of *Yāskācārya* various schools of *Vedic* interpretations were in vogue. *Yāska's* interpretation is really praiseworthy. Some *Vedic* scholars have ignored the etymological perfections of the *Vedas*. They specified that the *Vedas* are full of mutual contradictions, and do not have any clear meaning. *Kautsa* was one of them, he said *"anarthakā hi mantrāḥ"* and later on *Ācārya Yāska* (6th Century B.C. Approx) elaborately discussed on the view of *Kautsa* and said *"naiṣa sthāṇoraparādhaḥ yadenamandho na paśyati. Puruṣāparādhaḥ sa bhavati"*[5]. Mantras are effective if they are understandable and most of the time it is a laborious task to understand the meaning of the *Vedas*.

In nineteenth century Dayananda Saraswati, followed the interpretative methods of *Yāska*. He interpreted *Vedas* on the basis of rationalism and considered *Vedas* as great repositories of knowledge or wisdom admired by the modern interpreters.

According to Swami Dayananda Saraswati the *saṁhitā* portions of the *Vedas* are *apauruṣeya* and everything contained in the *Vedas* is the perfect truth but he was not ready to accept *brāhmaṇa, āraṇyaka, upaniṣad* as the *apauruṣeya* part of the *Vedas*. He cited that the *brāhmaṇa, āraṇyaka* and *upaniṣad* are the later parts of the *Vedas* and are narrated by the *Ṛṣis*. He said: *"kiñca 'mantrabrāhmaṇayorvedanāmadheyam iti kātyāyanokterbrāhmaṇabhagasyāpi veda sañjñā kuto na*

[4]Traditional Vedic Interpretations, PP 43-44.

[5]*Nirukta, 1. 16. 10.*

*svīkriyate?"*

According to *Kātyāyana* both *mantras* and *brāhmaṇas* are the parts of the *Vedas* but Swamijī disagreed and told *brāhmaṇa* cannot be a part of the *Vedas* because it has a historical and *paurāṇik* definition, the *brāhmaṇa* is the explanatory book of the *Vedas* and it has been narrated by the *Ṛṣis*. *"caturvedavidbhir-brāhmavidbhir-brāhmaṇair-maharṣibhiḥ proktāni yāni vedavyākhyānāni tāni brāhmaṇānīti"*[6]

In the *Vedas* Swami Dayananda Saraswati never found killing of human beings *(naramedha)*, killing of Cows *(gomedha)*, having the flesh of animals, cruelty in the *yajña* but in the *brāhmaṇa* he found all those things, according to him just because of this cruelty *paramāhiṃsaka* (Non-violence) some persons were not following the *Vedas*, and Gautam Buddha was one of them.

According to *Sāyaṇa* there is a history of the *Vedas* but Swami Dayananda does not accept the historical aspects of the *Vedas*. Before the creation of this world how would there can be a history? We can find history only in those books which were narrated after the creation of this world. In the *Vedas* we can find the names of Kings, Cities, Rivers and *Rṣis* but these names do not denote a person, but these words are compounds and adjectives. For example in the *Atharvaveda* we can find the name of *Ayodhyā "aṣṭācakrā navadvārā devānāṃ purayodhyā, tasyāṃ hiraṇyayaḥ kośaḥ svargo jyotiṣāvṛtaḥ"*[7]. "The human body is an invincible city of the gods, God Supreme and the divinities of nature. It has eight chakras: Muladhara, Svadhishthana, Manipur, Anahat, Vishuddhi, Lalana, Ajna and Sahasrara. It has nine gates: two eyes, two ears, two nostrils, mouth and the organs of excretion. In the city, there is a golden cave, replete with the golden light of Divinity, which is the heavenly path to heaven. This City is *Ayodhyā*, the Invincible."[8] So here the name of *Ayodhyā* is not the kingdom of *Raghuvaṁsa*. It means *"na yodhhuṃ śakyā"*, where war is not allowed, and

[6]*Mahābhāṣya 5.1.1.*

[7]*Atharva Veda 10.2.31*

[8]Atharva Veda, Vol.I, English translation by Dr.Tulsi Ram, P. 1098.

the founder of *Raghuvaṁsa* has given his kingdom name *Ayodhyā* from the *Vedas*. In the *Ṛgveda* we can find the name of *Kṛṣṇa* and *Arjuna* together but those names are not denoting a person's name but adjective *"ahaśca kṛṣṇamaharjunaṃ ca vi vartate rajasī vedyābhih"*[9]. "The dark half of the earth's daily round, the night, and the bright half, the day, revolve alternately in the terrestrial atmosphere along with their cognizable characteristics"[10]

There is only one God in the *Veda* and *Agni, Indra, Varuṇa, Rudra* etc. are the symbol *(Guṇa)* of the God. So these Gods are the qualitative adjective *(guṇavācī viśeṣaṇa)* of the God. *"indraṁ mitraṁ varuṇam-agnim-āhuratho divyaḥ sa suparṇo garutmān. ekaṁ sad viprā bahudhā vadantyagniṁ yamaṁ mātariśvānam-āhuḥ"*[11]. Reality is one, Truth is one, *Iśvara* is one and only One, not more than one. The learned and the wise speak of It in many ways. They say: It is *Indra*, glorious, *Mitra*, universal friend, *Varuna*, highest adorable, *Agni*, light of life, *Divya*, heavenly, *Suparna*, supreme beauteous, *Garutman*, supreme dynamic. They say: It is *Agni*, life and leader of existence, *Yama*, supreme controller, law and justice, and the judge, and *Matarishva*, supreme energy of the universe[12].

*Ācārya Sāyaṇa, Ācārya Uvata, Ācārya Mahīdhara* have interpreted the *Vedas* following the *viniyoga* but Svāmi Dayananda Saraswati did not accept this. He thinks according to the *pada, padārtha* and *devatā* of the *mantras viniyoga* should have been done. The God did not create *mantras* for the *viniyoga*.

"From his *Vedic* studies, Dayananda was convinced that there was no idol worship in the *Vedas*. The idol worship came after the Buddhism or the *Purāṇic* religion. Hence he has strongly criticized the idol worship on the *Vedic* background. In the same way, he was against *untouchability* as it was never found in the *Vedic* mantras or in the *Vedic*

[9]*Ṛg veda 06.9.1*

[10]*Ṛg Veda, Vol.II, English translation by Dr.Tulsi Ram, P. 594,*

[11]*Rv Ṛg Veda 1.164.46*

[12]*Ṛg Veda, Vol.I, English translation by Dr.Tulsi Ram, P. 742*

